Amarat Khan Kharaiti Lall Bhatia
II year Stud

KĀVYA-RATNĀVALĪ

SELECTIONS FROM CLASSICAL SANSKRIT POETS

Edited By

LAKSHMAN SARUP, M. A., D. Phil. (Oxon.),

University Professor of Sanskrit Literature, University of the Panjab, Lahore.

Published by

THE UNIVERSITY OF THE PANJAB

FOR

THE INTERMEDIATE EXAMINATION.

LAHORE.

Table of Contents

INTRODUCTION.

For the last forty eight years, ever since the University of the Panjab was established and incorporated, the Intermediate course in Sanskrit Poetry has consisted of the first five cantos of the *Kumārasambhava* or of the *Raghuvaṃśa*. Thus an average student's acquaintance with Sanskrit Poetry was merely confined to a part of a single poem of Kālidāsa. This knowledge of Sanskrit poetry was rather poor and quite an inadequate basis for the study of History of Sanskrit literature later at the B. A. stage. This course was therefore felt to be an anachronism. As a course suited to the requirements of Intermediate students of this University was not available, the University authorities decided to prepare a course of their own and entrusted to me the task of making suitable selections from Classical Sanskrit poets.

The Rāmāyaṇa of Vālmiki is, according to the literary tradition of Indian Scholars, the first secular poem, *Ādi Kāvya*, 'the first poem.' It is indeed the first ornate poem in Sankrit literature. As a popular national epic, it has exercised a very great influence on Indian thought and culture. It has been a perennial source of inspiration to all subsequent poets and dramatists.

There is a *Rāmopākhyāna* in the third *parvan* of the *Mahābhārata*. Stories of Rāma are found in many of the *Purāṇas*. The *Agni Purāṇa* V—XII. gives a detailed extract from Vālmīki. In the *Brahmāṇḍa Purāṇa* there is an *Adhyātma Rāmāyaṇa* in which Rāma figures as a god of the highest power. In the *Viṣṇu Purāṇa*, Rāma is an incarnation of God Viṣṇu. The *Bhāgavata* and the *Garuḍa* also contain stories of Rāma. In other *Purāṇas*, Rāma is mentioned either in the list of kings or as an *avatāra* of Viṣṇu.

Several court epics describe the adventures of Rāma and the authors of more than fifty Sanskrit dramas derive their inspiration from the Rāmāyaṇa of Vālmiki. The modern vernacular literatures like Tamil, Hindi, Bengali, Gujrati contain translations, or imitations or adaptations of Vālmiki. Public recitations, dramatic representations, religious festivals in honour of Rāma have kept the poem alive in India during the last two thousand years. Founders and teachers of different religious sects utilize the *Rāmāyaṇa* for propagating religious doctrines.

Even the unorthodox Jains drew upon the *Rāmāyaṇa.* The Jain monk Vimala Sūri composed in the first century A. D., a poem in Prakrit called the *Paümacariya (Padma carita),* based on the *Rāmāyaṇa* of Vālmiki. Guṇāḍhya's *Uttarapurāṇa* and Hemacandra's *Triṣaṣṭiślākāpuruṣacaritra* contain later versions of Vālmiki's poem.

The *Rāmāyaṇa* was popular among the heretical Buddhists by the time of Vasubandhu, i.e. the 4th century A. D. It served as a model for the poet Aśvaghoṣa A scene in the *Buddhacarita* is probably an imitation from the *Rāmāyaṇa.* Both the poems of Aśvaghoṣa are replete with references to Vālmiki and his work. Earlier Buddhist writers have also utilised the work of Vālmiki. In the Buddhist Literature of the Mahāyāna school, there is an encyclopaedic work called *Saddharma-smṛtyupasthāna.* It is an amplification of a canonical sūtra called the *Smṛty-upasthāna.* The work itself is lost but a long fragment is preserved by Śāntideva in his *Śikṣā samuccaya.* The subject matter of the fragment is the consequence of bad deeds in a previous existence together with the states of demons and hell. A description of Jambudvipa is also included. This description is only an edition of the *digvarṇanam* of the Rāmāyaṇa. Countries, rivers, oceans, islands, spirits etc. are enumerated in exactly the

Valmiki.

a temple.

parts of India

Asia and Southern

The prophecy has been fulfilled in a remarkable manner. An extract from the *Ayodhyā Kāṇḍa* is selected. It is a dialogue between Rāma and Sītā, on the eve of the former's banishment. It is the earliest expression of the ideals of Indian womanhood.

Aśvaghoṣa is often neglected in Indian Universities. Both his poems are *Mahākāvyas* and are written in the Vaidarbhī style. The *Saundaranandam* is certainly the more graceful of the two and there too, the fourth canto is the most beautiful. Kālidāsa is generally supposed to be a master of similes but in a few instances, Aśvaghoṣa has even surpassed Kālidāsa. Both Kālidāsa and Aśvaghoṣa have expressed an identical thought but the latter's comparison is the more striking e. g.

तं गौरवं बुद्धगतं चकर्ष भार्यानुरागः पुनराचकर्ष ।
सोऽनिश्चयान्नापि ययौ न तस्थौ तरंस्तरङ्गेष्विव राजहंसः ॥
सौन्दरनन्दे IV. 42.

and

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर् निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः शैलाधिराजतनया न ययौ न तस्थौ ॥
कुमारसंभवे V. 85.

Again

तां सुन्दरीं चेन्न लभेत नन्दः सा वा निषेवेत न तं नतभ्रूः ।
द्वन्द्वं ध्रुवं तद्विकलं न शोभेतान्योन्यहीनाविव रात्रिचन्द्रौ ॥
सौन्दरनन्दे IV. 7.

and

परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत् ।
अस्मिन्द्वये रूपविधानयत्नः पत्युः प्रजानां विफलोऽभविष्यत् ॥
कुमारसंभवे VII. 66.

Abstruse doctrines of Buddhist philosophy are expressed in the simplest language and illustrated with the most common comparisons, e. g.

स्नेहेन कश्चिन्न समोऽस्ति पाशः स्रोतो न तृष्णासममस्ति हारि ।

रागाग्निना नास्ति समस्तथाग्निस्तच्चेत् त्रयं नास्ति सुखं च तेऽस्ति ॥
सौन्दरनन्दे V. 28.

दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।
दिशं न काञ्चिद् विदिशं न काञ्चित्स्नेहक्षयात्केवलमेति शान्तिम् ॥
सौन्दरनन्दे XVI. 28.

तथा कृती निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।
दिशं न काञ्चिद् विदिशं न काञ्चित् क्लेशक्षयात्केवलमेति शान्तिम् ॥
सौन्दरनन्दे XVI. 29.

Examples need not be multiplied. Aśvaghoṣa is not a bad poet and deserves to be better studied. I have included the fourth canto from his *Saundaranandam*. The poet has painted a charming picture of Nanda's conjugal happiness. The contrast between Nanda's love of his wife and his reverence for the Buddha is vividly described.

Kālidāsa is a prince among poets. He has been admired in India from the earliest times and is also appreciated in the Western world. He is popularly known as the Shakespeare of India. It was the *prastāvanā* of the *Śakuntalā* which suggested to the well known German poet Geothe, the adoption of a prologue for his master piece, the *Faust.* Geothe's admiration of the *Śakuntalā* was expressed in the well known lines. A student should be better acquainted with Kālidāsa, so two cantos from two of his court epics—one from each—are selected. The fifth canto of the *Kumārasambhava* gives a pathetic description of the austerities of Pārvatī. Further it contains a beautiful dialogue between Umā and Śiva, disguised as a student. It is universally popular in India. The fourth canto of the *Raghuvaṃśa* gives an account of the tour of conquest of Raghu and is equally important. It is a spirited and martial narrative. Hariṣeṇa's panegyric of Samudragupta's great conquest might have served as a model for Kālidāsa.

Bhartṛhari is one of the most popular poets of Classical

Sanskrit. He is generally identified with the author of the *Vākpadīya*, and is assigned to the 7th century A. D. on the authority of the Chinese pilgrim Hieun Tsang. Fifty stanzas from the *Nīti* and the *Vairāgya Śatakas* are selected. An interesting feature of the poetry of Bhartṛhari is the parallelism of thought with Shakespeare. Bhartṛhari looks upon man as an actor and the world as a stage. The following stanza expresses his views on the subject.

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनुर्
नरः संसारान्ते विशति यमधानीयवनिकाम् ॥

'For a moment man is a boy, for a moment a youth, eager for love. For a moment he is bereft of wealth, for a moment at the height of prosperity. Then with limbs worn out by oldage, and with his person adorned with wrinkles, like an actor, he enters, at the end of life, the curtained stage of death.'

With this may be compared the lines of Shakespeare from *As You Like It*, Act ii Scene vii, lines, 139-166.

Somadeva, the author of the *Kathā-saritsāgara* was a brahmin of Kashmir. His work is not original but is a compilation based on an earlier work called the *Bṛhatkathā* of Guṇāḍhya. Somadeva undertook the task of writing the *Ocean of Stories* at the instance of Sūryavatī, queen of king Ananta of Kashmir. He killed himself in 1081 A. D. The queen immolated herself on his funeral pyre. The history of Kashmir during this period is a history of intrigue, revolt, bloodshed, and treachery. King Ananta surrendered his throne twice, once in 1063 A. D. and again in 1077 A. D., when his eldest son Kalaśa openly attacked his own father. The *Ocean of stories* was probably written before the second surrender in 1077 A. D., say about 1070 A. D. The object was to divert the mind of the unhappy queen. And this object has been very well accomplished for Somadeva is a charming story-teller. His style is simple and

elegant and his arrangement masterly. The whole work contains 22000 *ślokas*, nearly twice as much as the Iliad and Odyssey put together.

Only one hundred *ślokas* from Somadeva had to be selected. The difficulty was to find a suitable story which in its connected form should neither fall short nor exceed the prescribed length. The story of Devasmitā answers very well for this purpose. It is an edifying tale and has been translated into English several times. Tawney's prose translation in Penzer's edition is well known. And a metrical version prepared by Rev. B. H. Wortham appeared in the J. R. A. S. XVI. 1-12 in 1884.

An analysis of the story of Devasmitā shows four principal *motifs*. a. Murder of a child for obtaning offspring b. Token or index of chastity c. The bitch and the pepper incident d. Entrapped suitors.

a. The belief in the murder of a child for obtaining offspring is common and has survived up to the present day. Sir Richard Temple noted many such cases in the Andaman Islands between 1893-6 and published the result of his observation in the *Indian Antiquary* for May 1923. Mr. Penzer has mentioned a few more cases of this kind.§ The belief in the efficacy of innocent blood as a cure against several ailments is found in many countries.

Jagannāthā Paṇḍita is the last great poet of Classical Sanskrit literature. Fifty stanzas are selected from his *Bhāminīvilāsa*.

The *Rāmāyaṇa* of Vālmiki is pre-Buddhist in origin. It must have been composed at a time when Sanskrit was the speech of the common people. Had it been merely confined to literary circles only, it could never have become so

§ See, *The Ocean of Stories*, i. 93.

universally popular with the masses. As already in the time of the Buddha, Sanskrit was no longer the speech of the common people, the *Rāmāyaṇa* should, on linguistic grounds alone, be assigned to the seventh century B. C. Professor H. Jacobi is of the same opinion. Jagannātha Paṇḍita flourished during the reign of Emperor Shahjahan, i.e. the 17th century A. D. The present selection therefore covers a period of literary activity from the seventh century B. C. to the 17th century A. D. i. e. roughly speaking, a period of about 2400 years.

[illegible]

अथ श्रीवाल्मीकीयरामायणेऽयोध्याकाण्डे षड्विंशे सर्गे

सीतारामयोः संवादः ।

अभिवाद्य तु कौसल्यां रामः सम्प्रस्थितो वनम् ।
कृतस्वस्त्ययनो मात्रा धर्मिष्ठे वर्त्मनि स्थितः ॥ १ ॥

धर्मिष्ठेऽतिशयेन धर्मवति वर्त्मनि मार्गे स्थितो रामः कौसल्यामभिवाद्य प्रणम्य वनं सम्प्रस्थितो वनं गन्तुं प्रवृत्त आसीदिति शेषः ॥ १ ॥

विराजयन्राजसुतो राजमार्गं नरैर्वृतम् ।
हृदयान्याममन्थेव जनस्य गुणवत्तया ॥ २ ॥

राजसुतो रामो नरैर्रामदर्शनाकांक्षिजनैर्वृतं राजमार्गं विराजयन् प्रकाशयन् गुणवत्तया गुणविशिष्टत्वेन पूर्वभाषी प्रियवादी चेत्याद्युक्तगुणविशिष्टतया जनस्य हृदयानि आममन्थेव क्षोभयति स्म इव ॥ २ ॥

वैदेही चापि तत्सर्वं न शुश्राव तपस्विनी ।
तदेव हृदि तस्याश्च यौवराज्याभिषेचनम् ॥ ३ ॥

तत्सर्वं अभिषेकविघातादिकं वनगमनवृत्तान्तं तपस्विनी रामाभिषेकार्थव्रतोपवासादिनियमविशिष्टा वैदेही न शुश्राव । तस्यास्तु हृदि तदेव यौवराज्याभिषेचनं स्थितमासीत् ॥ ३ ॥

देवकार्यं स्वयं कृत्वा कृतज्ञा हृष्टचेतना ।
अभिज्ञा राजधर्माणां राजपुत्री प्रतीक्षति ॥ ४ ॥

देवकार्यं देवपूजां देवतानामाराधनं कृत्वा । देवकार्यं करणे हेतुः । कृतज्ञत्वं—देवैरेवं राज्यप्रदानोपकृतत्वेन कृतज्ञतया देवपूजा । अथवा कृतज्ञा अभिषिक्तभर्तृविषये पट्टमहिषीभिर्गन्धपुष्पादिना कृतपादार्चनादिसमाचारज्ञेत्यर्थः । हृष्टचेतना हृष्टमनस्का राजधर्माणामभिज्ञा तत्त्वज्ञात्री । अथवा अभिषिक्तराजासाधारणलक्ष-

णानि श्वेतच्छत्रचामरपुरस्कृतभद्रासनादीनि ज्ञातवती राजपुत्री सीता प्रतीक्षते स्म ॥ ४ ॥

प्रविवेशाथ रामस्तु स्ववेश्म सुविभूषितम् ।
प्रहृष्टजनसम्पूर्णं ह्रिया किञ्चिदवाङ्मुखः ॥ ५ ॥

सुविभूषितं प्रहृष्टजनसम्पूर्णं प्राप्तानन्दसखीजनविशिष्टं स्ववेश्म स्वकीयं गृहं किञ्चिद् ह्रिया सीतायै कथमिदमन्याय्यं स्वमातापितृकृतं कथयामीति लज्जया अवाङ्मुखोऽधोमुखः । अथवा न वाक् वचनं यस्मिन्तन्मुखं यस्य स रामः प्रविवेश ॥ ५ ॥

अथ सीता समुत्पत्य वेपमाना च तं पतिम् ।
अपश्यच्छोकसन्तप्तं चिन्ताव्याकुलितेन्द्रियम् ॥ ६ ॥

भर्तुर्विगतहर्षत्वावाङ्मुखत्वादिदर्शनात्कम्पमाना सीता समुत्पत्य स्वासनात् सम्यगुत्थाय चिन्ताव्याकुलितेन्द्रियं चिन्तया इमां कथं सह नयामीति विचारेण व्याकुलितानि इन्द्रियाणि यस्य तम्, अत एव शोकसन्तप्तम् शोकाक्रान्तपीतमपश्यत् ॥ ६ ॥

तां दृष्ट्वा स हि धर्मात्मा न शशाक मनोगतम् ।
तं शोकं राघवः सोढुं ततो निवृततां गतः ॥ ७ ॥

धर्मात्मा परमधर्मप्रवर्तको राघवो रामस्तां सीतां दृष्ट्वा सीतानयनयुक्त्यभावमूलकसम्भावितसीतावियोगजनितं शोकं सोढुं गूढं कर्तुं न शशाक । ततस्तस्माद्धेतोर्विवृततां व्यक्तदुःखतां गतः प्राप्तः । एतावत्पर्यन्तं शोकरहितस्य रामस्येदानीं शोकाविर्भावः संजातः । एतेन प्रियाया अग्रे न किञ्चित्पुंसो गोप्यमिति लोकव्यवहारो दर्शितः ॥ ७ ॥

विवर्णवदनं दृष्ट्वा तं प्रस्विन्नममर्षणम् ।
आह दुःखाभिसन्तप्ता किमिदानीमिदं प्रभो ॥ ८ ॥

प्रस्विन्नं हस्तगतराज्यस्यान्यगामित्वं स्ववनप्रव्राजनं च कथमस्यै निवेदयिष्यामीति शोकेन प्राप्तप्रस्वेदम् । अमर्षणं वियोगदुःखासहिष्णुं शोकधारणात्क्षमं संजातदुःखं नियन्तुमशक्तं तं रामं दृष्ट्वा दुःखाभिसन्तप्ता चेष्टालक्षिततद्दुःखजनितदुःखेनाभिसन्तप्ता सीता आह हे प्रभो इदानीं हर्षकाले इदं वैवर्ण्या-

दिकं किं कथम् ॥ ८ ॥

अथ बार्हस्पतः श्रीमान्युक्तः पुष्येण राघव ।
प्रोच्यते ब्राह्मणैः प्राज्ञैः केन त्वमसि दुर्मनाः ॥ ९ ॥

बार्हस्पतो बृहस्पतिदेवत्यः श्रीमान् कर्मारम्भकर्तॄणां सफलसमृद्धिप्रापकः श्रीकरः अत एव युक्तोऽभिषेकयोग्यः पुष्यः पुष्यनक्षत्रम् । 'पुष्येण' इति पाठे बृहस्पतिदेवता पुष्येण नक्षत्रेण युक्ता संगता अत एव अभिषेकार्हत्वम् । प्राज्ञैर्ब्राह्मणैः प्रोच्यते । अस्मिन्हर्षकाले त्वं तु केन हेतुना दुर्मना असि ॥ ९ ॥

न ते शतशलाकेन जलफेननिभेन च ।
आवृतं वदनं वल्गुच्छत्रेणाभिविराजते ॥ १० ॥

शतशलाकेन शतं शलाका यस्मिंश्छत्रे शलाकाशतविशिष्टेन जलफेननिभेन जलफेनसदृशेन । तयोः श्वेतत्वात्सादृश्यम् । छत्रेण आवृतं वल्गु सुन्दरं वदनं मुखं न विराजते । अत्र हेतुं वदेति तात्पर्यम् ॥ १० ॥

व्यजनाभ्यां च मुख्याभ्यां शतपत्रनिभेक्षणम् ।
चन्द्रहंसप्रकाशाभ्यां वीज्यते न तवाननम् ॥ ११ ॥

मुख्याभ्यां च चक्रवर्तिमात्रवृत्तिभ्यां व्यजनाभ्यां चामराभ्यामित्यर्थः । शतपत्रं कमलम् । शतपत्रनिभे कमलसदृशे ईक्षणे नेत्रे यस्मिंस्तत्तवाननं न वीज्यते ॥ ११ ॥

वाग्मिनो बन्दिनश्चापि प्रहृष्टास्त्वां नरर्षभ ।
स्तुवन्तो नाद्य दृश्यन्ते मङ्गलैः सूतमागधाः ॥ १२ ॥

वाग्मिनश्चतुराः । बन्दिनः स्तुतिपाठकाः । मङ्गलैर्मङ्गलवचनैः । सूताः पुरावृत्तकथाशंसिनः । मागधा वंशशंसकाः स्तुतिवंशज्ञाः ॥ १२ ॥

न ते क्षौद्रं च दधि च ब्राह्मणा वेदपारगाः ।
मूर्ध्नि मूर्धाभिषिक्तस्य ददति स्म विधानतः ॥ १३ ॥

क्षौद्रं मधु । मूर्धाभिषिक्तस्य कृतसाशिरःस्नानस्य तव मूर्ध्नि विधानतो न ददति स्म ॥ १३ ॥

न त्वां प्रकृतयः सर्वाः श्रेणीमुख्याश्च भूषिताः ।
अनुव्रजितुमिच्छन्ति पौरजानपदास्तथा ॥ १४ ॥

श्रेणीमुख्याः परिषत्प्रधानाः पौरजानपदाः प्रकृतयः प्रजाः ॥ १४ ॥

चतुर्भिर्वेगसम्पन्नैर्हयैः काञ्चनभूषणैः ।
मुख्यः पुष्परथो युक्तः किं न गच्छति तेऽग्रतः ॥ १५ ॥

वेगसम्पन्नैरतिवेगविशिष्टैर्हयैर्युक्तो मुख्यः श्रेष्ठः पुष्परथः प्रचुरपुष्पभूषितरथविशेषो लीलागमनप्रयोजन उत्सवाय कल्पितो रथः किं नाग्रतो गच्छति नीयते ॥१५॥

न हस्ती चाग्रतः श्रीमान्सर्वलक्षणपूजितः ।
प्रयाणे लक्ष्यते वीर कृष्णमेघगिरिप्रभः ॥ १६ ॥

सर्वलक्षणपूजितः सर्वशुभलक्षणसम्पन्नः कृष्णमेघगिरिप्रभः कृष्णमेघकृष्णगिर्युभयसदृशः श्रीमान् सर्वसम्पत्तिहेतुर्हस्ती प्रयाणे न लक्ष्यते ॥१६॥

न च काञ्चनचित्रं ते पश्यामि प्रियदर्शन ।
भद्रासनं पुरस्कृत्य यान्तं वीर पुरःसरम् ॥ १७ ॥

काञ्चनचित्रं स्वर्णमयचित्रविशिष्टं भद्रासनं कल्याणहेतुभूतासनविशेषं पुरस्कृत्य हस्ताग्रे धृत्वा यान्तं ते पुरःसरमग्रगं सेवकं भृत्यविशेषं न पश्यामि ॥१७॥

अभिषेको यदा सज्जः किमिदानीमिदं तव ।
अपूर्वो मुखवर्णश्च न प्रहर्षश्च लक्ष्यते ॥ १८ ॥

यदाभिषेकः सज्ज इदानीं तस्मिन्नेवैतस्मिन् वर्तमानकाल उक्तराजचिह्नाभावो मुखवर्णश्चापूर्वः कदाप्यननुभूतो हर्षकाले हर्षाभावश्च किमिति ॥१८॥

इतीव विलपन्तीं तां प्रोवाच रघुनन्दनः ।
सीते तत्रभवांस्तातः प्रव्राजयति मां वनम् ॥ १९ ॥

इतीव अनेन प्रकारेण विलपन्तीं दुःखेन भाषमाणां विविधप्रकारेण लपन्तीं पृच्छन्तीं तां सीतां रघुनन्दनः प्रोवाच हे सीते तत्रभवान् पूज्यस्तातः पिता मां वनं प्रव्राजयति ॥ १९ ॥

कुले महति सम्भूते धर्मज्ञे धर्मचारिणि ।
शृणु जानकि येनेदं क्रमेणाभ्यागतं मम ॥ २० ॥

उत्कटाप्रियश्रवणेन सीताया अत्यन्तमोहो मा भूदिति चित्तदार्ढ्यार्थं त्रिविधगुण-

कीर्तनेन संबोधयति। कुले येन क्रमेण हेतुना इदं प्रव्राजनमागतं तच्छृणु ॥२०॥

राज्ञा सत्यप्रतिज्ञेन पित्रा दशरथेन वै।
कैकेय्यै मम मात्रे तु पुरा दत्तौ महावरौ ॥ २१ ॥

महावरौ द्वे वरे महत्त्वं त्वनिवार्यत्वेन ॥ २१ ॥

तयाद्य मम सज्जेऽस्मिन्नभिषेके नृपोद्यते।
प्रचोदितः स समयो धर्मेण प्रतिनिर्जितः ॥ २२ ॥

अद्य नृपेणोद्यते नृपस्योद्योगो यस्मिन् प्रस्ताविते ममाभिषेके सज्जे प्रसक्ते सति तया स समयः समयेन त्वयाचितमवश्यं दास्यामीति शपथेन सहितः प्राचीनो वरसङ्केतः पूर्वदत्तं वरद्वयं देहीति प्रचोदितः प्रकर्षेण प्रेरितः प्रार्थितः। मम पिता धर्मेण प्रतिनिर्जितो धर्मवशीभूतः कृतशपथः स्वायत्तीकृतः स्ववशे कृतः ॥ २२ ॥

चतुर्दश हि वर्षाणि वस्तव्यं दण्डके मया।
पित्रा मे भरतश्चापि यौवराज्ये नियोजितः ॥ २३ ॥

पित्रा वरनिर्जितपितृनियोगेन भरतो यौवराज्ये नियोजितः ॥ २३ ॥

सोऽहं त्वामागतो द्रष्टुं प्रस्थितो विजनं वनम्।
भरतस्य समीपे ते नाहं कत्थ्यः कदाचन ॥ २४ ॥

विजनं सज्जनरहितं वनं प्रस्थितः स पित्राज्ञप्तोऽहं त्वां द्रष्टुमागतस्तेन मत्प्रव्रजनेन हेतुना भरतस्य समीपे कदाचन समयेऽहं न कत्थ्यो न श्लाघनीयः। त्वया मद्गुणवर्णनं न कर्तव्यम् ॥ २४ ॥

ऋद्धियुक्ता हि पुरुषा न सहन्ते परस्तवम्।
तस्मान्न ते गुणाः कत्थ्या भरतस्याग्रतो मम ॥ २५ ॥

ऋद्धियुक्ताः प्राप्तैश्वर्याः पुरुषाः परस्तवं परकीयातिस्तुतिं न सहन्ते। तस्माद्धेतोर्मम गुणा भरतस्याग्रतो भरतसमीपे न कत्थ्या न श्लाघनीयाः ॥ २५ ॥

अहं ते नानुवक्तव्यो विशेषेण कदाचन।
अनुकूलतया शक्यं समीपे तस्य वर्तितुम् ॥ २६ ॥

अहं त्वया विशेषेण विशिष्य सर्वश्रेष्ठरूपेण नानुवक्तव्यः। मम विशिष्टवर्णनं भरतस्य प्रतिकूलम्। तस्य प्रतिकूलं नाचरणीयमिति। कुतः? तस्य समीपे अनु-

कूलतया वर्तितुं शक्यम् नान्यथा ॥ २६ ॥

तस्मै दत्तं नृपतिना यौवराज्यं सनातनम् ।
स प्रसाद्यस्त्वया सीते नृपतिश्च विशेषतः ॥ २७ ॥

नृपतिना दशरथेन तस्मै भरताय यौवराज्यं दत्तम् । स यौवराज्यदाता दशरथो विशेषतस्त्वया प्रसाद्यः ॥ २७ ॥

अहं चापि प्रतिज्ञां तां गुरोः समनुपालयन् ।
वनमद्यैव यास्यामि स्थिरीभव मनस्विनि ॥ २८ ॥

गुरोर्दशरथस्य । स्थिरीभव मद्वियोगहेतुकानवस्थितिं न प्राप्नुहीत्यर्थः । मनस्विनीति दृढमनस्का ॥ २८ ॥

याते च मयि कल्याणि वनं मुनिनिषेवितम् ।
व्रतोपवासपरया भवितव्यं त्वयानघे ॥ २९ ॥

मयि याते सति गते सति ॥ २९ ॥

कल्यमुत्थाय देवानां कृत्वा पूजां यथाविधि ।
वन्दितव्यो दशरथः पिता मम जनेश्वरः ॥ ३० ॥

कल्यं प्रातः । जनेश्वरो राजा ॥ ३० ॥

माता च मम कौसल्या वृद्धा सन्तापकर्शिता ।
धर्ममेवाग्रतः कृत्वा त्वत्तः सम्मानमर्हति ॥ ३१ ॥

वृद्धा ज्ञानवयोभ्यामधिका सन्तापकर्षिता मद्वियोगहेतुकसन्तापं प्राप्ता धर्ममेवाग्रतः कृत्वा अनुसृत्येत्यर्थः । सम्मानं सत्कृतिम् ॥ ३१ ॥

वन्दितव्याश्च ते नित्यं याः शेषा मम मातरः ।
स्नेहप्रणयसम्भोगैः समा हि मम मातरः ॥ ३२ ॥

शेषाः कौसल्यातिरिक्ता मम मातरो वन्दितव्याः । तत्र हेतुः । मम स्नेहप्रणयसम्भोगैः । स्नेहोऽतिप्रीतिः । प्रणयोऽतिसौहार्दम् । भोगः पालनम् । तैः समाः कौसल्यासदृश्यस्तत्तुल्यतया वन्द्याः ॥ ३२ ॥

भ्रातृपुत्रसमौ चापि द्रष्टव्यौ च विशेषतः ।
त्वया भरतशत्रुघ्नौ प्राणैः प्रियतरौ मम ॥ ३३ ॥

भ्रातृपुत्रसमौ भ्रात्रा पुत्रेण च समौ । मम प्राणैः प्राणेभ्यः प्रियतरौ भरतशत्रुघ्नौ त्वया द्रष्टव्यौ ॥ ३३ ॥

विप्रियं च न कर्तव्यं भरतस्य कदाचन ।
स हि राजा च वैदेहि देशस्य च कुलस्य च ॥ ३४ ॥

विप्रियं विरुद्धं नैव कर्तव्यम् । न केवलं स देशस्य राजा किन्तु कुलस्य पालकोऽपि ॥ ३४ ॥

आराधिता हि शीलेन प्रयत्नैश्चोपसेविताः ।
राजानः सम्प्रसीदन्ति प्रकुप्यन्ति विपर्यये ॥ ३५ ॥

शीलेन अकुटिलवृत्या तदनुकूलस्वाचरणेन आराधिताः स्वेप्सितधर्मपालकत्वसिद्धिं प्राप्ताः प्रयत्नैरालस्यत्यागादिभिस्तदपेक्षितसाधकव्यापारैरुपसेवितास्तद्व्यापारजनितसुखं प्राप्ता राजानः सम्प्रसीदन्ति । विपर्यये शीलाद्यभावे ॥ ३५ ॥

औरस्यानपि पुत्रान् हि त्यजन्त्यहितकारिणः ।
समर्थान् सम्प्रगृह्णन्ति जनानपि नराधिपाः ॥ ३६ ॥

अहितकारिणः पुत्रानपि त्यजन्ति। जनान् सम्बन्धशून्यजन्तूनपि समर्थाननुकूलकारिणः सम्प्रगृह्णन्ति स्वीकुर्वन्ति ॥ ३६ ॥

सा त्वं वसेह कल्याणि राज्ञः समनुवर्तिनी ।
भरतस्य रता धर्मे सत्यव्रतपरायणा ॥ ३७ ॥

धर्मे प्रजापालने रता प्रीता भरतस्य समनुवर्तिनी अनुकूला त्वं इह अयोध्यायां राज्ञो दशरथस्य समीपे वस ॥ ३७ ॥

अहं गमिष्यामि महावनं प्रिये त्वया हि वस्तव्यमिहैव भामिनि ।
यथा व्यलीकं कुरुषे न कस्यचित्तथा त्वया कार्यमिदं वचो मम॥३८॥

अहं महावनं गमिष्यामि त्वया इहैव वस्तव्यम् । यथा कस्यचिन्मतिपित्रादेर्व्यलीकमप्रियं न कुरुषे तथैव त्वया कार्यम् । तथेदमपि मे वचः कर्तव्यं अनुष्ठेयमित्यर्थः ॥ ३८ ॥

इति श्रीवाल्मीकीयरामायणेऽयोध्याकाण्डे षड्विंशः सर्गः ॥

अथ श्रीवाल्मीकीयरामायणेऽयोध्याकाण्डे सप्तविंशः सर्गः ।

एवमुक्ता तु वैदेही प्रियार्हा प्रियवादिनी ।
प्रणयादेव सङ्क्रुद्धा भर्तारमिदमब्रवीत् ॥ १ ॥

प्रियार्हा प्रियभाषणार्हा अथवा प्रियोऽर्हो योग्यः पूज्यो यस्याः सा । तदुपरि प्रियवादिनी । तथाप्येवमुक्ता अप्रियमुक्ता गृहनिवासे नियुक्ता । प्रणयादेव स्नेहादेव संक्रुद्धा कथं मम पृथक्स्थितिमादिशतीत्यमर्षवती । न तु वैरात् स्नेहकारणफलकक्रोधवती वैदेही इदमब्रवीत ॥ १ ॥

किमिदं भाषसे राम वाक्यं लघुतया ध्रुवम् ।
त्वया यदपहास्यं मे श्रुत्वा नरवरोत्तम ॥ २ ॥

हे नरवरोत्तम नरश्रेष्ठ राम लघुतया मयि क्षुद्रत्वावलम्बनेन ध्रुवं निश्चितं अत्यन्तनिःसारं इदं किं भाषसे । त्वया यदुक्तं तच्छ्रुत्वा मे मम स्त्रिया अपि अपहास्यं भवति । नरवरस्यास्य वाक्यस्यासंभावितत्वं प्रदर्शितम् । अथवा ममापहास्यं ममातिशयितो हासो जायते ॥ २ ॥

वीराणां राजपुत्राणां शस्त्रास्त्रविदुषां नृप ।
अनर्हमयशस्यं च न श्रोतव्यं त्वयेरितम् ॥ ३ ॥

यत्त्वयेरितं तद्वीराणामनर्हमयोग्यं अत एव अयशस्यं यशोनिवर्तकमित्यर्थः । अत एव न श्रोतव्यं श्रोतुमयोग्यम् ॥ ३ ॥

आर्यपुत्र पिता माता भ्राता पुत्रस्तथा स्नुषा ।
स्वानि पुण्यानि भुञ्जानाः स्वं स्वं भाग्यमुपासते ॥ ४ ॥

हे आर्यपुत्र पित्रादयः स्वानि पुण्यानि स्वस्य कर्मफलानि भुञ्जाना अनुभवन्तः स्वं स्वं स्वस्यैव फलप्रदं भाग्यं स्वानुष्ठितं शुभाशुभं कर्मैव उपासते उपजीवन्ति न पुत्राद्यनुष्ठितम् ॥ ४ ॥

भर्तुर्भाग्यं तु नार्येका प्राप्नोति पुरुषर्षभ ।
अतश्चैवाहमादिष्टा वने वस्तव्यमित्यपि ॥ ५ ॥

हे पुरुषर्षभ ! एका केवलं नारी तु भर्तुर्भाग्यं भर्तृकृतकर्मफलं भर्तुरर्धशरीरभूता प्राप्नोति भुङ्क्ते । अतस्तव वनवासादेशेनैव त्वत्पितृभ्यां सर्वकर्मणि सहधर्मचारित्वादहमपि वने वस्तव्यमित्यादिष्टा । तवादेशेनैव ममापि वनादेशः सिद्ध इत्यर्थः ॥ ५ ॥

न पिता नात्मजो वात्मा न माता न सखीजनः ।
इह प्रेत्य च नारीणां पतिरेको गतिः सदा ॥ ६ ॥

यदेवमतो न पित्रादिरिह लोके प्रेत्य परलोके च नारीणां गतिः, किन्तु एकः पतिरेव मुख्यो गतिः । आत्मा स्वकीयमात्रयत्नः ॥ ६ ॥

यदि त्वं प्रस्थितो दुर्गं वनमद्यैव राघव ।
अग्रतस्ते गमिष्यामि मृद्नन्ती कुशकण्टकान् ॥ ७ ॥

हे राघव ! यदि त्वमद्यैव दुर्गं वनं प्रस्थितस्तदापि कुशादीन् कुशरूपकण्टकान् मृद्नन्ती स्वपद्भ्यां मर्दयन्ती मृदूकुर्वन्ती । न च ते दुःखं दास्यामीति ध्वनितम् । अहं ते अग्रतो एतेन गमने विलम्बाभावः सूचितः । गमिष्यामि ॥ ७ ॥

ईर्ष्यां रोषं बहिष्कृत्य भुक्तशेषमिवोदकम् ।
नय मां वीर विस्रब्धः पापं मयि न विद्यते ॥ ८ ॥

ईर्ष्यादिकं स्त्रिया वनगमनसाहसं कथमितीर्ष्या तां । स्ववाक्योल्लङ्घनेन रोषं बहिष्कृत्य त्यक्त्वा विस्रब्धो निःशङ्को मयि कृतविश्वासस्त्वं माम् हे वीर । स्ववीरत्वस्य लोके ख्यापनाय । अन्यथा कुतस्तत्ख्यातिरिति ध्वनिः । नय । त्यागप्रयोजकं पापमपराधो मयि न विद्यते । ननु त्वया वने किं प्रयोजनमत आह । भुक्तशेषमुदकमिव । यथा कान्तारयायिना दुष्प्रापपानीयं पीतशेषं कमण्डलुस्थितमुदकमवश्यमेव नेयमेवं अहमपि त्वया नेया ॥ ८ ॥

प्रासादाग्रैर्विमानैर्वा वैहायसगतेन वा ।
सर्वावस्थागता भर्तुः पादच्छाया विशिष्यते ॥ ९ ॥

प्रासादाग्रैः पञ्चम्यर्थे तृतीया । सार्वभौमवासोत्तमभवनाग्रेभ्यो विमानैः स्वर्लोकादिस्थिताकाशयानेभ्यो वैहायसगतेन अणिमाद्यष्टैश्वर्यसिद्धिसंपन्नोचितविहायःसंबन्धिगमनाद्वा आकाशगमनाच्च सर्वावस्थागता सर्वावस्थासु आगता दुरवस्थापन्नापीत्यर्थः । सकलगुणरहितस्यापि पत्युः पादच्छाया पादसेवा इतरधर्मापेक्षया विशिष्यते अधिकं भवति ॥ ९ ॥

अनुशिष्टास्मि मात्रा च पित्रा च विविधाश्रयम् ।
नास्मि सम्प्रति वक्तव्या वर्तितव्यं यथा मया ॥ १० ॥

यथा मया भर्तृविषये वर्तितव्यं तथा मात्रा पित्रा च विविधाश्रयं विविधप्रकारं अनेकदृष्टान्तमनोहरं अनेकवारं वा अनुशिष्टास्मि शिक्षितास्मि । अतः सम्प्रति इदानीं न वक्तव्या पतिसेवाविषये उपदेष्टव्या भवतेति शेषः ॥ १० ॥

अहं दुर्गं गमिष्यामि वनं पुरुषवर्जितम् ।
नानामृगगणाकीर्णं शार्दूलगणसेवितम् ॥ ११ ॥

पुरुषवार्जितं भृत्यादिरहितं यथा स्यात्तथा गमिष्यामि ॥ ११ ॥

सुखं वने निवत्स्यामि यथैव भवने पितुः ।
अचिन्तयन्ती त्रींल्लोकांश्चिन्तयन्ती पतिव्रतम् ॥ १२ ॥

त्रींल्लोकान् अचिन्तयन्ती त्रैलोक्यैश्वर्यमप्यगणयन्ती पतिव्रतं पत्या सहवासरूपं व्रतं पतिविषयं व्रतं पतिशुश्रूषणं पतिसेवारूपधर्मं चिन्तयन्ती ध्यायन्ती । तत्र क्लेशशङ्कापि न कर्तव्या । पितुर्भवने इव वने निवत्स्यामि ॥ १२ ॥

शुश्रूषमाणा ते नित्यं नियता ब्रह्मचारिणी ।
सह रंस्ये त्वया वीर वनेषु मधुगन्धिषु ॥ १३ ॥

नियता नियमयुक्ता ब्रह्मचारिणी तपश्चरणशीला वेदविहितव्रतपरायणा कामभोगवर्जिता वा मधुगन्धिषु पुष्परसगन्धविशिष्टेषु मकरन्दसुरभिषु वनेषु त्वया सह रंस्ये विहरिष्ये ॥ १३ ॥

त्वं हि कर्तुं वने शक्तो राम संपरिपालनम् ।
अन्यस्यापि जनस्येह किं पुनर्मम मानद ॥ १४ ॥

अन्यस्यापि जनस्य अबलास्त्रीबालकादिजनसमूहस्य ॥ १४ ॥

साहं त्वया गमिष्यामि वनमद्य न संशयः ।
नाहं शक्या महाभाग निवर्तयितुमुद्यता ॥ १५ ॥

उद्यता वनगमनोद्योगं कुर्वती अहं निवर्तयितुं न शक्या । मद्गमननिवृत्तिवार्ता न वक्तव्या न्यायप्राप्तानुगमनत्वात् ॥ १५ ॥

फलमूलाशना नित्यं भविष्यामि न संशयः ।
न ते दुःखं करिष्यामि निवसन्ती त्वया सदा ॥ १६ ॥

फलमूलाशना स्वार्जितफलमूलभोजना भविष्यामि । अतस्ते दुःखं विशिष्टान्नपानादीच्छया भोजनाद्युद्योगेन श्रमजनितखेदं न करिष्यामि न उत्पादयिष्यामि॥१६॥

अग्रतस्ते गमिष्यामि भोक्ष्ये भुक्तवति त्वयि ।
इच्छामि सरितः शैलान्पल्वलानि सरांसि च ॥ १७ ॥

ते तव अग्रतो अग्रे गमिष्यामि । भुक्तवति कृतभोजने त्वयि सति भोक्ष्ये । शैलान्पर्वतान् । पल्वलानि अल्पसरांसि । सरांसि महातडागांस्त्वया सह निर्भीताहं द्रष्टुमिच्छामीत्यर्थः ॥ १७ ॥

द्रष्टुं सर्वत्र निर्भीता त्वया नाथेन धीमता ।
हंसकारण्डवाकीर्णाः पद्मिनीः साधुपुष्पिताः ॥ १८ ॥

हंसाश्च कारण्डवा जलकुक्कुटाश्च तैराकीर्णा व्याप्ताः पद्मिनीः कमलिनीः ॥ १८ ॥

इच्छेयं सुखिनी द्रष्टुं त्वया वीरेण सङ्गता ।
अभिषेकं करिष्यामि तासु नित्यमनुव्रता ॥ १९ ॥

तासु पद्मिनीषु पद्मिनीयुक्तजलेषु त्वामनुव्रता अभिषेकं स्नानं करिष्यामि ॥१९॥

सह त्वया विशालाक्ष रंस्ये परमनन्दिनी ।
एवं वर्षसहस्राणि शतं वापि त्वया सह ॥ २० ॥

वर्षसहस्राणि शतं वा त्वया सह वसन्ती तेषां व्यतिक्रमं वनवासदुःखं न वेत्स्यामि किन्तु क्षणमिव तावन्तं कालं नेष्यामि किं पुनः चतुर्दश समा इत्यर्थः ॥ २० ॥

व्यतिक्रमं न वेत्स्यामि स्वर्गोऽपि हि न मे मतः ।
त्वया विना नरव्याघ्र नाहं तदपि रोचये ॥ २१ ॥

व्यतिक्रमं व्यतीतम् । अहं स्वर्गसुखमपि न रोचये न इच्छामि त्वया विना स्वर्गोऽपि मे न मतः । तव सहवाससुखसदृशं न स्वर्गसुखमित्यभिप्रायः ॥ २१ ॥

अहं गमिष्यामि वनं सुदुर्गमं मृगायुतं वानरवारणैश्च ।
वने निवत्स्यामि यथा पितुर्गृहे तवैव पादावुपगृह्य सम्मता ॥२२॥

मृगैरायुतं मृगैरासमन्तायुतं युक्तं वानरवारणैः वानराश्च वारणा हस्तिनश्च तैश्च युक्तमिति शेषः । सुदुर्गमम् गहनं वनं गमिष्यामि वने तस्मिन्कानने तव सम्मता त्वत्सम्मतिविषयभूताहं तवाज्ञावर्तिनी पितुर्गृहे इव निवत्स्यामि ॥२२॥

अनन्यभावामनुरक्तचेतसं त्वया वियुक्तां मरणाय निश्चिताम् ।
नयस्व मां साधु कुरुष्व याचनां नातो मया ते गुरुता भविष्यति ॥२३॥

अनन्यभावां त्वदतिरिक्तविषयकप्रीतिरहितां अतएव अनुरक्तचेतसं त्वद्विषयक-परमानुरागयुक्तचित्तां अत एव त्वया वियुक्तां त्वद्वियोगे मरणाय निश्चितमतिं मां नयस्व । याचनां मामिकां वनानुगमनयाचनां साधु कुरुष्व चरितार्थां सम्पादय । अतो मन्नयनात्ते गुरुता भारः क्लेशो न भविष्यति ॥ २३ ॥

तथा ब्रुवाणामपि धर्मवत्सलां न च स्म सीतां नृवरो निनीषति ।
उवाच चैनां बहु सन्निवर्तने वने निवासस्य च दुःखितां प्रति ॥२४॥

तथा तेन प्रकारेण ब्रुवाणां धर्मवत्सलां धर्मप्रियां सीतां नृवरो रामो न निनीषति स्म नेतुं नैच्छत् । अत एवास्याः निवर्तने वनगमनप्रवृत्तिनिवृत्त्यर्थं वने निवासस्य दुःखितां वनवाससम्बन्धिदुःखं बहु यथा स्यात्तथा उवाच ॥ २४ ॥

इति श्रीवाल्मीकीयरामायणेऽयोध्याकाण्डे सप्तविंशः सर्गः ॥

अथ श्रीवाल्मीकीयरामायणेऽयोध्याकाण्डे अष्टाविंशः सर्गः ।

स एवं ब्रुवतीं सीतां धर्मज्ञां धर्मवत्सलः ।
न नेतुं कुरुते बुद्धिं वने दुःखानि चिन्तयन् ॥ १ ॥

धर्मवत्सलः धर्मप्रियः स रामो वने दुःखानि चिन्तयन्विचारयन् सीतां नेतुं बुद्धिं निश्चयं न कुरुते ॥ १ ॥

सान्त्वयित्वा ततस्तां तु बाष्पदूषितलोचनाम् ।
निवर्तनार्थे धर्मात्मा वाक्यमेतदुवाच ह ॥ २ ॥

बाष्पदूषितलोचनामश्रुव्याप्तनेत्रां तां सीतां सान्त्वयित्वा निवर्तनार्थे निवृत्तिरूपप्रयोजनार्थमेतद्वचनमुवाच ॥ २ ॥

सीते महाकुलीनासि धर्मे च निरता सदा ।
इहाचरस्व धर्मं त्वं यथा मे मनसः सुखम् ॥ ३ ॥

इहैव अयोध्यायामेव स्थित्वा यथा मे मम मनसः सुखं भवति तथा धर्मं मदाज्ञप्तमत्पित्रादिसेवनं चर कुरु ॥ ३ ॥

सीते यथा त्वां वक्ष्यामि तथा कार्यं त्वयाबले ।
वने दोषा हि बहवो वसतस्तान्निबोध मे ॥ ४ ॥

वने वसतः पुरुषस्य बहवो दोषाः क्लेशाः सन्तीति शेषः । तान्दोषान्मे मत्तः निबोध जानीहि । अहं वच्मीत्यर्थः ॥ ४ ॥

सीते विमुच्यतामेषा वनवासकृता मतिः ।
बहुदोषं हि कान्तारं वनमित्यभिधीयते ॥ ५ ॥

एषा मतिर्वनगमननिश्चयो विमुच्यताम् । बहुदोषं अहिकण्टकादियुक्तत्वात् कान्तारं महारण्यं अभिधीयते कथ्यते अभिज्ञैरिति शेषः ॥ ५ ॥

हितबुद्ध्या खलु वचो मयैतदभिधीयते ।
सदा सुखं न जानामि दुःखमेव सदा वनम् ॥ ६ ॥

सदा नित्यमसुखं सुखविरोधि वनम् । सुखं वने नास्ति । सुखं सुखदं न भवति । किन्तु दुःखं दुःखहेतुमेव जानामि । एतद्वचो हितबुद्ध्या त्वद्विषयकातिप्रीत्येत्यर्थः ।

न तु त्वद्भरणक्लेशेन मया अभिधीयते कथ्यते ॥ ६ ॥

गिरिनिर्झरसम्भूता गिरिनिर्दरिवासिनाम् ।
सिंहानां निनदा दुःखाः श्रोतुं दुःखमतो वनम् ॥ ७ ॥

गिरिनिर्झरसम्भूताः पर्वतनदीशब्दप्रवृद्धाः गिरिनिर्दरिवासिना गिरिदरीषु पर्वतकन्दरेषु निवसनशीलानां सिंहानां निनदाः शब्दाः श्रोतुं दुःखा दुःखप्रदाः अतो वनं दुःखं दुःखजनकम् ॥ ७ ॥

क्रीडमानाश्च विस्रब्धा मत्ताः शून्ये तथा मृगाः ।
दृष्ट्वा समभिवर्तन्ते सीते दुःखमतो वनम् ॥ ८ ॥

शून्ये निर्मानुषे प्रदेशे विस्रब्धा निःशङ्काः सन्तः क्रीडमानाः क्रीडन्तोऽतएव मत्ता मृगाः सिंहशार्दूलादयोऽस्मान्दृष्ट्वा अपूर्वदर्शनात्समभिवर्तन्ते हन्तुमभिमुखमायान्ति ॥ ८ ॥

सग्राहाः सरितश्चैव पङ्कवत्यस्तु दुस्तराः ।
मत्तैरपि गजैर्नित्यमतो दुःखतरं वनम् ॥ ९ ॥

सग्राहा ग्राहसहिताः सनक्राः पङ्कवत्यो बहुपङ्का अतिकर्दमविशिष्टाः सरितो नद्यो मत्तैर्गजैरुपलक्षिताश्च अत एव दुस्तरास्तरितुमशक्याः सन्ति । अतो वनं दुःखतरम् ॥ ९ ॥

लताकण्टकसंकीर्णाः कृकवाकूपनादिताः ।
निरपाश्च सुदुःखाश्च मार्गा दुःखमतो वनम् ॥ १० ॥

मार्गाः पन्थानो लताकण्टकसंकीर्णा लताकण्टकैर्व्याप्ताः कृकवाकूपनादिताः कृकवाकुभिर्वनकुक्कुटैरुपनादितास्तन्नादयुक्ता इत्यर्थः । निरपाः जलरहिताश्च सन्तीति शे[illegible] १० ॥

सुप्यते पर्णशय्यासु स्वयंभग्नासु भूतले ।
रात्रिषु श्रमखिन्नेन तस्माद्दुःखमतो वनम् ॥ ११ ॥

भूतले न तु पर्यङ्के । तत्रापि पर्णशय्यासु न तु मृदुतूलास्तरणेषु । तत्रापि स्वयमेव भग्नासु जीर्णतया स्वयमेव पतितासु रात्रिषु नत्वहःसु श्रमखिन्नेन फलमूलाद्याहरणश्रमदुःखितेन वनवासिना सुप्यते । अतोऽस्माभिरपि तथा स्वपितव्यमिति भावः ॥ ११ ॥

अथ श्रीवाल्मीकीयरामायणेऽयोध्याकाण्डे एकोनत्रिंशः सर्गः ।

एतत्तु वचनं श्रुत्वा सीता रामस्य दुःखिता ।
प्रसक्ताश्रुमुखी मन्दमिदं वचनमब्रवीत् ॥ १ ॥

एतद् वियोगबोधकं रामस्य वचनं श्रुत्वा दुःखिता अत एव अश्रुमुखी सीता इदमब्रवीत् ॥ १ ॥

ये त्वया कीर्तिता दोषा वने वस्तव्यतां प्रति ।
गुणानित्येव तान्विद्धि तव स्नेहपुरस्कृता ॥ २ ॥

वने वस्तव्यतां वासं प्रति त्वया मे ये दोषाः कीर्तितास्तान् मां प्रति गुणानेव विद्धि । यतोऽहं तव स्नेहेन पुरस्कृता त्वद्विषयकस्नेहमात्रदर्शनशीलाहमस्मीत्यर्थः । अनेन त्वत्स्नेहविषयस्य दोषो न कोऽपीति भावः ॥ २ ॥

त्वया च सह गन्तव्यं मया गुरुजनाज्ञया ।
त्वद्वियोगेन मे राम त्यक्तव्यमिह जीवितम् ॥ ४ ॥

"अर्धो वा एष आत्मनो यत्पत्नी" इति ब्राह्मणवचनात् जायापत्योरेकात्मत्वात् त्वद्विषयादेश एव मद्विषयादेश इत्यर्थः ॥ ५ ॥

पतिहीना तु या नारी न सा शक्ष्यति जीवितुम् ।
काममेवंविधं राम त्वया मम निदर्शितम् ॥ ७ ॥

या नारी पतिहीना पतिवियुक्ता सा जीवितुं न शक्ष्यति । एवं त्वया दर्शितं भरतानुकूलतयात्र वासस्थित्युपदेशेन । त्वदुपदिष्टभरतानुकूल्येन स्थातुमशक्यत्वादिति भावः ॥ ७ ॥

अथ श्रीवाल्मीकीयरामायणेऽयोध्याकाण्डे त्रिंशः सर्गः ।

सान्त्व्यमाना तु रामेण मैथिली जनकात्मजा ।
वनवासनिमित्तार्थं भर्तारमिदमब्रवीत् ॥ १ ॥

मैथिली मिथिलादेशप्रादुर्भूता जनकात्मजा सीता वनवास एव निमित्तं प्रयोजनं तस्मै इदं वचनमब्रवीत् ॥ १ ॥

सा तमुत्तमसंविग्ना सीता विपुलवक्षसम् ।
प्रणयाच्चाभिमानाच्च परिचिक्षेप राघवम् ॥ २ ॥

उत्तमसंविग्ना वियोगहेतुकात्युद्वेगं प्राप्ता । उत्तममत्यन्तं कम्पमाना अति भीता । अभिमानादहमस्यानन्येति मां त्यक्तुमयमसमर्थ इति गर्वात्प्रणयात् स्नेहात् विपुलवक्षसं शूरं राघवं परिचिक्षेप निनिन्द ॥ २ ॥

किं त्वामन्यत वैदेहः पिता मे मिथिलाधिपः ।
राम जामातरं प्राप्य स्त्रियं पुरुषविग्रहम् ॥ ३ ॥

स वैदेहो विदेहकुलोत्पन्नो मे पिता पुरुषविग्रहं आकारेण पुरुषं क्रियया तु स्त्रियमेव पुरुषवेषं जामातरममन्यत । यदि मां त्यक्त्वा वनं गतं त्वां शृणुयात् । काचित्स्त्री पुरुषवेषं कृत्वा मत्कन्यामुपयेमे इति मन्येत । तव तत्त्वं न ज्ञातवानित्यर्थः । यदि जानीयान्मां तुभ्यं न प्रयच्छेदिति शेषः ॥ ३ ॥

अनृतं वत लोकोऽयमज्ञानाद्यदि वक्ष्यति ।
तेजो नास्ति परं रामे तपतीव दिवाकरे ॥ ४ ॥

लोको यद् वक्ष्यति वदति तदनृतम् । कुतः ? अज्ञानादेव लोकोऽयं वदति । अथवा वतेति खेदे । रामे यत्तेजस्तत्तपति दिवाकरे नास्तीति यदि मां न नेष्यसीति शेषः । तद दिवाकरे सूर्ये इव तपति त्वयि अज्ञानात्त्वन्निश्चितमन्नयनाभावहेतुविषयकज्ञानाभावाद्धेतोः रामे परं तेजो नास्तीति अनृतं मिथ्या अयं लोको जनो वक्ष्यति वदिता तेन तद्वचनेन मम खेदो भवितेति सूचितम् । अपरो व्याख्यामार्गः । यदि मां विहाय वनं गमिष्यासि तदा दिवाकर इव रामे परं तेजोऽस्तीति

अज्ञानाद् लोकेन यत्कथितं तदनृतं भविष्यतीति शेषः ॥ ४ ॥

किं हि कृत्वा विषण्णस्त्वं कुतो वा भयमस्ति ते ।
यत्परित्यक्तुकामस्त्वं मामनन्यपरायणाम् ॥ ५ ॥

किं कृत्वा किं मनसि विचार्य त्वं विषण्णः प्राप्तविषाद उदासीनः । भयं वा कुतः । यद्यस्मात्त्वं मां परित्यक्तुकामोऽसि ॥ ५ ॥

द्युमत्सेनसुतं वीरं सत्यवन्तमनुव्रताम् ।
सावित्रीमिव मां विद्धि त्वमात्मवशवर्तिनीम् ॥ ६ ॥

द्युमत्सेनसुतं सत्यवन्तं सत्यवत्संज्ञकमनुव्रतां तद्वशवर्तिनीं सावित्रीमिव मां आत्मवशवर्तिनीं विद्धि जानीहि ॥ ६ ॥

न त्वहं मनसा त्वन्यं द्रष्टास्मि त्वदृतेऽनघ ।
त्वया राघव गच्छेयं यथान्या कुलपांसनी ॥ ७ ॥

यथा अन्या कुलपांसनी अन्यं पश्यति, एवं अहं मनसापि अन्यं न द्रष्टास्मि । अतस्त्वदृते त्वां विना नात्र स्थास्ये । अतो हे राघव त्वया सह गच्छेयम् ॥ ७ ॥

स्वयं तु भार्यां कौमारीं चिरमध्युषितां सतीम् ।
शैलूष इव मां राम परेभ्यो दातुमिच्छसि ॥ ८ ॥

चिरं बहुकालमध्युषितां स्वसमीपवर्तिनीं कौमारीं कुमारावस्थायामेव परिणीतां सतीं मां शैलूष इव जायाजीवो नर्तननट इव परेभ्यो स्वयं दातुं तत्सन्निधौ स्थापयितुं किमिच्छसि ॥ ८ ॥

यस्य पथ्यंचरामात्थ यस्य चार्थेऽवरुध्यसे ।
त्वं तस्य भव वश्यश्च विधेयश्च सदानघ ॥ ९ ॥

यस्य भरतस्य मां पथ्यंचरामिष्टानुवर्तिनीमात्थ कथयसि यस्यार्थे प्रयोजनार्थमवरुध्यसे मामवरोधयसि निवारयसे, इह स्थापयसि तस्य त्वमेव वश्योऽनुकूल इष्टानुवर्ती विधेयो नियोज्यश्च भव । नाहं तदिष्टानुवर्तिनी तद्विधेया चेह वसामि । अहं तु त्वामनुयास्यामीत्यर्थः ॥ ९ ॥

स मामनादाय वनं न त्वं प्रस्थितुमर्हसि ।
तपो वा यदि वारण्यं स्वर्गो वा स्यात्त्वया सह ॥ १० ॥

तपो वा तपश्चरणं वा अरण्यमरण्यवासो वा स्वर्गो वा स्वर्गगमनं वा त्वया सह भवत्विति शेषः । अतो मां अनादाय अगृहीत्वा प्रस्थितुं नार्हसि ॥ १० ॥

न च मे भविता तत्र कश्चित्पथि परिश्रमः ।
पृष्ठतस्तव गच्छन्त्या विहारशयनेष्विव ॥ ११ ॥ wall in bar bed...

पथि तव पृष्ठतो गच्छन्त्या विहारशयनेषु । विहार उद्यानसंचारः । सुप्ताया इव अरण्ये वने परिश्रमो न भविष्यति ॥ ११ ॥

कुशकाशशरेषीका ये च कण्टकिनो द्रुमाः ।
तूलाजिनसमस्पर्शा मार्गे मम सह त्वया ॥ १२ ॥

मार्गे त्वया सह गच्छन्त्या मम कुशादयस्तूलैरजिनैः प्रियकादिमृगविशेषाजिनैश्च समा कोमलस्पर्शा भविष्यन्तीति शेषः ॥ १२ ॥

महावातसमुद्धूतं यन्मामवकिरिष्यति ।
रजो रमण तन्मन्ये परार्ध्यमिव चन्दनम् ॥ १३ ॥

महावातसमुद्धूतं महावातनीतं यद्रजो मां त्वत्सहचारिणीमित्यर्थः । अवकिरिष्यति आच्छादयिष्यति तत्परार्ध्यमुत्तमं श्रेष्ठं चन्दनचूर्णमिवाहं मन्ये ॥ १३ ॥

शाद्वलेषु यदा शिश्ये वनान्तर्वनगोचरा ।
कुथास्तरणयुक्तेषु किं स्यात्सुखतरं ततः ॥ १४ ॥

यदा यस्मिन्काले वनगोचरा वनं प्राप्ताहं वनान्तर्वनमध्ये शाद्वलेषु दूर्वादिबालतृणयुक्तभूमिषु । कुथाश्चित्रकम्बला आस्तरणानि तैर्युक्तेषु विलक्षणचित्रकम्बलरूपास्तरणविशिष्टेषु तल्पेष्विति शेषः । सुप्ताया मम ततः शाद्वलशयनात्किं सुखतरं स्यात् किमधिकं सुखं स्यान्न किमपीत्यर्थः ॥ १४ ॥

पत्रं मूलं फलं यत् त्वमल्पं वा यदि वा बहु ।
दास्यसे स्वयमाहृत्य तन्मेऽमृतरसोपमम् ॥ १५ ॥

पत्राद्यन्यतमं यद्दास्यसे तदमृतरसोपमं स्यादिति शेषः ॥ १५ ॥

न मातुर्न पितुस्तत्र स्मरिष्यामि न वेश्मनः ।
आर्तवान्युपभुञ्जाना पुष्पाणि च फलानि च ॥ १६ ॥

आर्तवानि तत्तदृतुसमुत्पन्नानि पुष्पाणि फलानि च भुञ्जानाहं मात्रादिकं न स्मरिष्यामि ॥ १६ ॥

न च तत्र ततः किञ्चिद्द्रष्टुमर्हसि विप्रियम् ।
मत्कृते न च ते शोको न भविष्यामि दुर्भरा ॥ १७ ॥

तत्र वने ततो मद्गमनात् किञ्चिद्विप्रियमनिष्टं दुःखं द्रष्टुं नार्हसि । मत्कृते मन्निमित्तं ते शोकश्च न भवेत्, अतो दुर्भरा दुःखेन भर्तव्या न भविष्यामि ॥ १७ ॥

यस्त्वया सह स स्वर्गो निरयो यस्त्वया विना ।
इति जानन्परां प्रीतिं गच्छ राम मया सह ॥ १८ ॥

त्वया सह यो यस्मिन्देशे वासः स स्वर्गो मे स्वर्गसमः । त्वया विना यो वासः स निरयो निर्गतोऽयः कल्याणं यस्मात् नरकोपमः । एवं परां वियोगासहां प्रीतिं, तव साहित्येन नरकोऽपि स्वर्गस्त्वया विना स्वर्गोऽपि नरक इति मम निश्चयं जानन् त्वं मया सह गच्छ ॥ १८ ॥

अथ मामेवमव्यग्रां वनं नैव नयिष्यसे ।
विषमद्यैव पास्यामि मा वशं द्विषतां गमम् ॥ १९ ॥

अव्यग्रां वनगमनविषयभीतिरहितां मां न नयिष्यसे नेष्यसे तर्हि अद्यैव त्वत्सन्निधावेव विषं पास्यामि । द्विषतां भरतादीनां वशं गमं न प्राप्नुयाम् ॥ १९ ॥

पश्चादपि हि दुःखेन मम नैवास्ति जीवितम् ।
उज्झितायास्त्वया नाथ तदैव मरणं वरम् ॥ २० ॥

पश्चात्त्वद्गमनोत्तरकालं दुःखेन मम जीवितं नैव स्यादत एव त्वयोज्झिताया-स्त्यक्ताया मम मरणं वरं श्रेष्ठमस्ति ॥ २० ॥

इमं हि सहितुं शोकं मुहूर्तमपि नोत्सहे ।
किं पुनर्दशवर्षाणि त्रीणि चैकं च दुःखिता ॥ २१ ॥

दुःखिता त्वद्वियोगहेतुकातिदुःखविशिष्टेत्यर्थः ॥ २१ ॥

इति सा शोकसन्तप्ता विलप्य करुणं बहु ।
चुक्रोश पतिमायस्ता भृशमालिङ्ग्य सस्वरम् ॥ २२ ॥

आयस्ता आयासं प्राप्ता । सस्वरं सशब्दम् ॥ २२ ॥

सा विद्धा बहुभिर्वाक्यैर्दिग्धैरिव गजाङ्गना।
चिरसंनियतं बाष्पं मुमोचाग्निमिवारणिः ॥ २३ ॥

दिग्धैर्विषलिप्तबाणैर्विद्धा ताडिता गजाङ्गना इव बहुभिर्वियोगादिसूचकै रामोक्तैर्वाक्यैर्विद्धा उक्ता सा सीता चिरसन्नियतं बहुकालनिरुद्धं बाष्पमग्निमरणिरिव मुमोच ॥ २३ ॥

तस्याः स्फटिकसंकाशं वारि सन्तापसम्भवम्।
नेत्राभ्यां परिसुस्राव पङ्कजाभ्यामिवोदकम् ॥ २४ ॥

सन्तापसम्भवं वियोगश्रुतिहेतुकसन्तापजनितं स्फटिकसंकाशं स्फटिकसूक्ष्मगुटिकाबद्धासमानं तस्या नेत्राभ्यां पङ्कजाभ्यां मकरन्दरूपमिव निर्मलमुदकमिव अश्रुवारि परिसुस्राव ॥ २४ ॥

तत्सितामलचन्द्राभं मुखमायतलोचनम्।
पर्यशुष्यत बाष्पेण जलोद्धृतमिवाम्बुजम् ॥ २५ ॥

सितामलचन्द्राभं सिते शुक्लपक्षेऽमलोऽन्धकारनिवर्तको यश्चन्द्रः पूर्णिमाचन्द्र इत्यर्थः। तत्सदृशमायते लोचने यस्मिस्तन्मुखं संतापसंभवेनोष्णेन बाष्पेण जलोद्धृतं जलान्निःसृतं अम्बुजमिव पर्यशुष्यत ॥ २५ ॥

तां परिष्वज्य बाहुभ्यां विसंज्ञामिव दुःखिताम्।
उवाच वचनं रामः परिविश्वासयंस्तदा ॥ २६ ॥

दुःखितां वियोगश्रवणहेतुकदुःखाक्रान्तामत एव विसंज्ञामिव संज्ञारहितामिव तां सीतां परिष्वज्य विश्वासयन् विश्वासमुत्पादयन् उज्जीवयन् उवाच ॥ २६ ॥

न देवि तव दुःखेन स्वर्गमप्यभिरोचये।
नहि मेऽस्ति भयं किञ्चित्स्वयम्भोरिव सर्वतः ॥ २७ ॥

तव दुःखेन हेतुना प्राप्यं स्वर्गमपि न रोचये नेच्छामि स्वयम्भोर्ब्रह्मणो नारायणस्य इव मे सर्वतः सर्वजन्तुभ्यो भयं नास्ति ॥ २७ ॥

तव सर्वमभिप्रायमविज्ञाय शुभानने।
वासं न रोचयेऽरण्ये शक्तिमानपि रक्षणे ॥ २८ ॥

तवाभिप्रायं सहगमनविषयकत्वदिच्छामविज्ञाय तत एव हेतोस्तवारण्ये वासं

न रोचये त्वां वनं नेतुं नाङ्गीकृतवान् ॥ २८ ॥

यत्सृष्टासि मया सार्धं वनवासाय मैथिलि ।
न विहातुं मया शक्या प्रीतिरात्मवता यथा ॥ २९ ॥

यद्यस्माद्धेतोर्मया सार्धं वनवासाय सृष्टा निश्चयं प्राप्ता, अतो विहातुं त्यक्तुं मया त्वं न शक्या । आत्मवतात्मज्ञेन यथा प्रीतिर्दया हातुमशक्या ॥ २९ ॥

धर्मस्तु गजनासोरु सद्भिराचरितः पुरा ।
तं चाहमनुवर्तिष्ये यथा सूर्यं सुवर्चला ॥ ३० ॥

हे गजनासोरु। गजनासा हस्तिशुण्डः। शुण्डादण्डसदृशोरुविशिष्टे यो धर्मो वानप्रस्थधर्मः सद्भिः सपत्नीकैः राजर्षिभिः पुरा आचरितस्तं पतिव्रतास्त्रीसहचरणधर्ममनुवर्तिष्ये प्रवर्तयिष्यामि । यथा सूर्यं तत्पत्नी सुवर्चला अनुवर्तते तथा त्वं मामनुवर्तस्वेति शेषः ॥ ३० ॥

न खल्वहं न गच्छेयं वनं जनकनन्दिनि ।
वचनं तन्नयति मां पितुः सत्योपबृंहितम् ॥ ३१ ॥

सत्योपबृंहितं सत्यसंयुक्तं पितुर्वचनं मां वनं नयति । अतो वनमवश्यमेव गच्छेयम् ॥ ३१ ॥

एष धर्मश्च सुश्रोणि पितुर्मातुश्च वश्यता ।
आज्ञां चाहं व्यतिक्रम्य नाहं जीवितुमुत्सहे ॥ ३२ ॥

पितुर्मातुश्च वश्यतेत्येष एव धर्मः । तं व्यतिक्रम्य उल्लङ्घ्य जीवितुं नोत्सहे ॥ ३२ ॥

अस्वाधीनं कथं दैवं प्रकारैरभिराध्यते ।
स्वाधीनं समतिक्रम्य मातरं पितरं गुरुम् ॥ ३३ ॥

अस्वाधीनमप्रत्यक्षत्वात्तादृशं दैवं प्रकारैः स्वेप्सितक्रियाभिर्भावनामात्रसाध्याराधनप्रकारैः कथमभिराध्यते । गुरूपदिष्टं पितृवचनकरणं स्वाधीनं प्रत्यक्षस्वसेवावशत्वविशिष्टं मात्रादिकं समतिक्रम्य ॥ ३३ ॥

यत्र त्रयं त्रयो लोकाः पवित्रं तत्समं भुवि ।
नान्यदस्ति शुभापाङ्गे तेनेदमभिराध्यते ॥ ३४ ॥

यत्र मातापित्राद्याराधने सति त्रयं धर्मार्थकामरूपं भवति तत्र त्रयो लोकाश्चा-

राधिता भवन्ति । अतस्तत्समं मात्राद्याराधनसदृशं पवित्रं पुण्यजनकं भुवि कस्मिंश्चिद्देशे अन्यन्नास्ति । तेन हेतुना इदं पितृवचनमभिराध्यते परिपाल्यते ॥३४॥

न सत्यं दानमानौ वा यज्ञो वाप्याप्तदक्षिणः ।
तथा बलकराः सीते यथा सेवा पितुर्मता ॥ ३५ ॥

पितुः सेवा यथा बलकरी प्राबल्यसम्पादिका मता निश्चिता तथा सत्यादयो न बलकराः । आप्तदक्षिणः, आप्ता ब्राह्मणैः प्राप्ता दक्षिणा यस्मिन् स यज्ञश्च न बलकरो न परलोकाभ्युदयसाधकः ॥ ३५ ॥

स्वर्गो धनं वा धान्यं वा विद्या पुत्राः सुखानि च ।
गुरुवृत्त्यनुरोधेन न किञ्चिदपि दुर्लभम् ॥ ३६ ॥

गुरुवृत्त्यनुरोधेन गुरूणां पित्रादीनां वृत्तिः शुश्रूषणं तदनुरोधेन तदनुवर्तनेन गुर्वादिसेवानुरूपेण स्वर्गादिकं किंचिदपि दुर्लभं न भवतीत्यर्थः ॥ ३६ ॥

स मा पिता यथा शास्ति सत्यधर्मपथे स्थितः ।
तथा वर्तितुमिच्छामि स हि धर्मः सनातनः ॥ ३८ ॥

मा माम् । शास्ति आज्ञापयति । वर्तितुमनुष्ठातुम् ॥ ३८ ॥

मम सन्ना मतिः सीते नेतुं त्वां दण्डकावनम् ।
वसिष्यामीति सा त्वं मामनुयातुं सुनिश्चिता ॥ ३९ ॥

यतो वने वसिष्यामीति दृढनिश्चयेन त्वं मामनुयातुं निश्चिता, अतस्त्वां दण्डकावन नेतुं मम या मतिस्त्वद्विरुद्धासीत्सेदानीं सन्ना विशीर्णा नष्टेत्यर्थः ॥ ३९ ॥

सा हि दिष्टानवद्याङ्गि वनाय मदिरेक्षणे ।
अनुगच्छस्व मां भीरु सहधर्मचरी भव ॥ ४० ॥

सा त्वं हि यतोऽधुना वनाय वनगमनाय दिष्टा मयानुज्ञाता आज्ञप्ता, अतो मामनुगच्छस्व ॥ ४० ॥

अथ अश्वघोषविरचिते सौन्दरनन्दकाव्ये चतुर्थः सर्गः ।

मुनौ ब्रुवाणे ऽपि तु तत्र धर्मं
धर्मं प्रति ज्ञातिषु चादृतेषु ।
प्रासादसंस्थो मदनैककार्यः
प्रियासहायो विजहार नन्दः ॥ १ ॥

तत्र तस्मिन् नगरे मुनौ भगवति बुद्धे धर्मं ब्रुवाणेऽपि उपदिशत्यपि, धर्मं प्रति च ज्ञातिषु अन्यबन्धुबान्धवादिषु आदृतेषु आदरवत्सु सत्सु, मदनैककार्यो मदनं सम्भोगादिकमेव एकं प्रधानं कार्यं यस्य सः, अत एव प्रियासहायः पत्नी-द्वितीयः कामिन्याः सहितो नन्दो नाम राजपुत्रो बुद्धस्य कनीयान् भ्राता प्रासाद-संस्थः प्रासादेष्वेव स्थितः सन् विजहार विहारं चकार ॥ १ ॥

स चक्रवाक्येव हि चक्रवाकस्
तया समेतः प्रियया प्रियार्हः ।
नाचिन्तयद्वैश्रमणं न शक्रं
तत्स्थानहेतोः कुत एव धर्मम् ॥ २ ॥

स हि प्रियार्हः प्रियायै अर्हो योग्यः पूज्यो वा चक्रवाकश्चक्रवाक्या इव, तया प्रियया समेतो युक्तः, वैश्रमणं कुबेरं नाचिन्तयत् न कदापि स्मृतवान् । न च शक्रं इन्द्रम् । तत्स्थानहेतोस्तस्येन्द्रस्य स्थानं स्वर्गाख्यं तस्य हेतोस्तदर्थं धर्मं तु कुत एव स्मृतवान् । विषयपरायणः स राजपुत्रः स्वर्गादिकमपि न मनसि कदाचित् कृतवान् ॥ २ ॥

लक्ष्म्या च रूपेण च सुन्दरीति
स्तम्भेन गर्वेण च मानिनीति ।
दीप्त्या च मानेन च भामिनीति
यासौ बभाषे त्रिविधेन नाम्ना ॥ ३ ॥

लक्ष्म्या कान्त्या रूपेण गौरवर्णादिना च सुन्दरी इति, स्तम्भेन दर्पेण ।

स्तम्भो दर्पोऽवलेपो ऽभिमानोऽहंकारः। यथाह कविः। 'स्तंभते पुरुषः प्रायो यौवनेन धनेन च'। गर्वेण अभिमानेन च। गर्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः। अवज्ञासविलासांगदर्शनाविनयादिकृत् ॥ मामिनी इति, दीप्त्या शोभया मानेन सत्कारेण च भामिनी इति यासौ त्रिविधेन त्रिप्रकारेण नाम्ना बभाषे उच्यते स्म। लक्ष्म्यादिगुणैर्युक्ता सा राजपुत्रप्रिया सुन्दरी मानिनी भामिनी इति च नामत्रयेण व्यवह्रियते स्म ॥ ३ ॥

सा हासहंसा नयनद्विरेफा
पीनस्तनात्युन्नतपद्मकोशा।
भूयो बभासे स्वकुलोदितेन
स्त्रीपद्मिनी नन्ददिवाकरेण ॥ ४ ॥

यथा पद्मिनी दिवाकरेण सूर्योदयेन भासते, तथैव सा स्त्रीपद्मिनी राजस्नुषा एव पद्मिनीरूपा स्वकुलोदितेन स्वकुले उदितेन उत्पन्नेन उद्गतेन वा नन्ददिवाकरेण नन्दात्मकेन सूर्येण बभासे दिदीपे। कीदृशी सा स्त्रीपद्मिनी ? हासहंसा हासो हास्यं तदेव हंसस्थानीयं यत्र सा। पद्मिन्यां साक्षादेव हंसो भवति, अत्र तु राजस्नुषायां हास्यमेव हंसस्थानीयं तयोर्धवलरूपत्वात्सादृश्यम्। नयनद्विरेफा द्विरेफो भ्रमरः पद्मिन्यां साक्षादेव भ्रमरास्तिष्ठन्ति, अत्र तु नयने नेत्रे एव द्विरेफस्थानीये। तयोः श्यामरूपत्वात्सादृश्यम्। पीनस्तनात्युन्नतपद्मकोशा, पद्मिनी अत्युन्नतपद्मकोशा अत्युन्नतः अत्युच्चैर्भूतः पद्मकोशः कमलकुड्मलो यस्यामेवं भूता भवति। इयं राजस्नुषा तु तथैव पीनस्तना पीनौ अत्युन्नतौ स्तनौ यस्या एवंभूता। पद्मकोशस्थानीयौ हि स्तनौ। दिवाकरेण पद्मिनीव सा नन्देन विकासं लेभे ॥ ४ ॥

रूपेण चात्यन्तमनोहरेण
रूपानुरूपेण च चेष्टितेन।
मनुष्यलोके हि तदा बभूव
सा सुन्दरी स्त्रीषु नरेषु नन्दः ॥ ५ ॥

अत्यन्तमनोहरेण चेतोहारिणा रूपेण, रूपानुरूपेण रूपसदृशेन च चेष्टितेन ललिताङ्गव्यापारादिना, तदा हि तस्मिन् समये यतः सा मनुष्यलोके सर्वत्र पृथिव्यां

स्त्रीषु कामिनीषु मध्ये सुन्दरीति नाम्ना प्रसिद्धा बभूव । नरेषु पुरुषेषु मध्ये तु नन्दो राजपुत्रः सुन्दर इति नाम्ना प्रसिद्धो बभूवेति शेषः । अनुपमसौन्दर्येण शरीरव्यापारेण च तावुभावपि दम्पती सर्वप्रथमत्वेन प्रसिद्धिमापतुः ॥ ५ ॥

सा देवता नन्दनचारिणीव
कुलस्य नन्दीजननश्च नन्दः ।
अतीत्य मर्त्याननुपेत्य देवान्
सृष्टावभूतामिव भूतधात्रा ॥ ६ ॥

सा सुन्दरी नन्दनचारिणी नन्दनमिन्द्रप्रमदवनमुद्यानमुच्यते तस्मिन् चारिणी परिभ्रमणशीला देवतेव, नन्दश्च कुलस्य निजवंशस्य नन्दीजनन आनन्दोत्पादकः, मर्त्यान् मनुष्यान् अतीत्य अतिशय्य देवान् सुरांश्च अनुपेत्य अप्राप्य इव, भूतधात्रा ब्रह्मणा तौ सृष्टौ निर्मितौ अभूताम् । मनुष्यानपेक्ष्य श्रेष्ठतया देवानपेक्ष्य किञ्चिदूनतया च उभयोर्मध्यवर्तिनाविव तौ ब्रह्मणा निर्मिताविति भावः ॥ ६ ॥

तां सुन्दरीं चेन्न लभेत नन्दः
सा वा निषेवेत न तं नतभ्रूः ।
द्वन्द्वं ध्रुवं तद्विकलं न शोभे-
तान्योन्यहीनाविव रात्रिचन्द्रौ ॥ ७ ॥

चेत् यदि नन्दस्तां सुन्दरीं न लभेत प्राप्नुयात्, सा नतभ्रूः, नते धनुषाकारे भ्रुवौ यस्याः सा सुन्दरी वा तं नन्दं न निषेवेत भजेत् तदा ध्रुवं निश्चितमेव तद् द्वन्द्वं युगलं विकलं विचलितचित्तं उद्विग्नमिव सत् न शोभेत शोभां न प्राप्नुयात् । अन्योन्यहीनौ रात्रिचन्द्राविव । यथा रात्रिश्चन्द्रेण विना चन्द्रश्च रात्र्या विना न शोभते । चन्द्रहीनाया रात्रेस्तमोभूयस्त्वात्, चन्द्रस्य च दिने नीरसत्वादप्रकाशकत्वाद्वेति । सर्वकालं सदैव निवसन्तौ तौ दम्पती नितरां मनस्तोषमापतुः ॥ ७ ॥

कन्दर्परत्योरिव लक्ष्यभूतं
प्रमोदनान्द्योरिव नीडभूतम् ।
प्रहर्षतुष्ट्योरिव पात्रभूतं
द्वन्द्वं सहारंस्त मदान्धभूतम् ॥ ८ ॥

तद् द्वन्द्वं दम्पतियुगलं कन्दर्परत्योः कन्दर्पः कामो रतिस्तदर्धाङ्गिनी तयोर्लक्ष्यभूतं आदर्शस्थानमिवासीत् । लक्ष्मभूतमिति पाठे तु कन्दर्परत्योश्चिन्हभूतमित्यर्थः । कन्दर्परत्योर्देहहीनत्वेन दृष्टगोचरत्वात्तदेव द्वन्द्वं तयोश्चिन्हभूतमिति भावः । कन्दर्परतिसदृशं तद् द्वन्द्वं सौन्दर्यादिगुणैरित्याशयः । प्रमोदनान्द्योश्च नीडभूतं कुलायभूतमाश्रयभूतमिव । प्रमोद आन्तरो हर्षः, नान्दी च बाह्यैर्गीतवादित्रादि-साधनैरुत्पन्नमनुकूलज्ञानविषयीभूतं आनन्दमुच्यते । प्रहर्षतुष्ट्योश्च प्रहर्षश्च तुष्टिश्च प्रहर्षतुष्टी तयोः पात्रभूतमाधारस्थानमिव तद् द्वन्द्वमासीत् । प्रमोदातिशयः प्रहर्षः, मनसो वृत्त्यन्तरेष्वप्रसक्तिस्तुष्टिः । एवं भूतं तद् द्वन्द्वं मदेन अन्धभूतं विषयासक्तत्वाद् विवेकरहितं सत् अरंस्त रेमे । सम्भोगादिसुखं यथाकामं अलभत ॥ ८ ॥

परस्परोद्वीक्षणतत्पराक्षं
परस्परव्याहृतसक्तचित्तम् ।
परस्पराश्लेषहृताङ्गरागं
परस्परं तन्मिथुनं जहार ॥ ९ ॥

किञ्च तन्मिथुनं द्वन्द्वं परस्परोद्वीक्षणतत्पराक्षं परस्परस्य अन्योन्यस्य उद्वीक्षणे निरीक्षणे दर्शने, तत्परे आसक्ते अक्षिणी नेत्रे यस्य तत्, मिथुनविशेषणमेतत् । परस्परव्याहृतसक्तचित्तं अन्योन्यभाषणे सक्तं तत्परं चित्तं यस्य तत् । परस्परस्य आश्लेषेण आलिंगनेन हृतो गृहीतोऽङ्गरागो येन तत्, एवं भूतं तन्मिथुनं परस्परं जहार, अन्योन्यस्य मनो बाह्यचेष्टितं च हृतवदित्यर्थः । तौ दम्पती सर्वकालमन्योन्यस्य दर्शने भाषणे आलिंगने चासक्तचित्तावभूतामित्यभिप्रायः ॥ ९ ॥

भावानुरक्तौ गिरिनिर्झरस्थौ
तौ किन्नरीकिंपुरुषाविवोभौ ।
चिक्रीडतुश्चाभिविरेजतुश्च
रूपश्रियान्योन्यमिवाक्षिपन्तौ ॥ १० ॥

भावानुरक्तौ भावयति करोति रसानिति भावः । भावैर्मनोविकारैरनुरक्तौ प्रेमपाशबद्धौ, गिरिनिर्झरस्थौ गिरिः पर्वतः । निर्झरो जलप्रवाहः । पार्वत्यजलप्रवा-

हस्य तीरे स्थितौ किंनरीकिंपुरुषौ गन्धर्वदम्पती देवयोनिविशेषौ ताविव, तावुभौ नन्दः सुन्दरी च, रूपश्रिया वर्णशोभया अन्योऽन्यं परस्परमाक्षिपन्तौ लीलया ऽऽक्षेपं कुर्वन्ताविव चिक्रीडतुश्च क्रीडया कालं यापयामासतुः, अभिविरेजतुश्च शोभां चातितरामापतुः। तौ ससुखं नर्महास्यलीलादिना निजकालं निन्यतुरिति भावः ॥ १० ॥

अन्योन्यसंरागविवर्धनेन
तद् द्वन्द्वमन्योन्यमरीरमच्च ।
क्लमान्तरेऽन्योन्यविनोदनेन
सलीलमन्योऽन्यममीमदच्च ॥ ११ ॥

तत् द्वन्द्वं मिथुनं अन्योन्यसंरागविवर्धनेन अन्योन्यस्य यः संरागः प्रेमातिशयस्तस्य विवर्धनेन अतिशयवृद्धया अन्योन्यमरीरमत् परस्परं प्रसन्नमकरोत् । क्लमान्तरे च सुरतादिजनितखेदानन्तरं च अन्योन्यविनोदनेन अन्योन्यस्य विनोदनेन हर्षोत्पादकेन वार्तालापादिना, सलीलं सक्रीडं क्रियाविशेषणमेतत्, क्रीडापूर्वकमित्यर्थः। अन्योन्यममीदत् हर्षयुक्तमकरोत् ॥ ११ ॥

विभूषयामास ततः प्रियां स
सिषेविषुस्तां न मृजावहार्थम् ।
स्वेनैव रूपेण विभूषिता हि
विभूषणानामपि भूषणं सा ॥ १२ ॥

ततस्तदनन्तरं तां प्रियां सिषेविषुः सेवितुमिच्छुः परिचरितुमिच्छुर्विभूषयामास अलंचकार। न मृजावहार्थं न शरीरसौन्दर्यावहनार्थं विभूषयामासेति शेषः। हि यतः सा सुन्दरी स्वेनैव रूपेण निजेनैव नैसर्गिकेण गौरवर्णादिना विभूषिता अलंकृता, [illegible] एव विभूषणानामपि आभरणानामपि सा भूषणमलंकरणम् । प्रियाया आभूषणादिधारणं परिचर्यानिमित्तमेवासीत्, न तस्याः शरीरशोभार्थम् । स्वाभाविकेनात्मसौन्दर्यादिना सैवाभरणानामपि भूषणमासीत्, नत्वाभरणानि तस्याः ॥ १२ ॥

दत्त्वाथ सा दर्पणमस्य हस्ते
ममाग्रतो धारय तावदेनम् ।
विशेषकं यावदहं करोमी-
त्युवाच कान्तं स च तं बभार ॥ १३ ॥

अथालंकरणानन्तरं सा सुन्दरी अस्य नन्दस्य हस्ते करे दर्पणं मुकुरं दत्त्वा, एनं दर्पणं ममाग्रतो मम सन्मुखं तावत् धारय, निजकरेण गृहीत्वा स्थापय, यावदहं विशेषकं ललाटे वा कपोले वा कपोलप्रान्ते वा केशरचन्दनकस्तूर्यादिना विशेषाकारचित्रणं विशेषकमुच्यते । तमालपत्रतिलकचित्रकाणि विशेषकमित्यमरः । तमालस्य पत्रमिव तमालपत्रम् । तमालपत्रं तिलकं चित्रकं विशेषकमेते चत्वारि तिलकभेदा एव । तत् करोमि रचयामि इति कान्तं पतिमुवाच । स च पतिस्तं दर्पणं बभार धारितवान् ॥ १३ ॥

भर्तुस्ततः श्मश्रुनिरीक्षमाणा
विशेषकं सापि चकार तादृक् ।
निश्वासवातेन च दर्पणस्य
चिकित्सयित्वा निजघान नन्दः ॥ १४ ॥

ततो दर्पणधारणानन्तरं भर्तुः पत्युर्नन्दस्य श्मश्रुनिरीक्षमाणा अवलोकयन्ती पश्यन्ती सा सुन्दरी अपि तादृक् तदाकारं श्मश्र्वाकारमेव विशेषकं निजकपोले चकार रचयामास । नन्दस्तु चिकित्सयित्वा तद्रचनायां निजहास्यं सन्दिश्य निश्वासवातेन सह दीर्घं निश्वसन् निश्वासं वेगेन बहिः परित्यजन् दर्पणस्य निजघान दर्पणमप्यधस्तात् निपातयामास । निजकपोले श्मश्र्वाकारं विशेषकं रचयन्तीं जायां दृष्ट्वा आत्मनः परिहासं सन्दिश्य अन्तः कुपित इव नन्दो हस्तगृहीतं दर्पण-मधश्चिक्षेपेत्यर्थः । अथवा नन्दो निश्वासवातेन फू[illegible]रवायुना चिकित्सयित्वा मलिनीकृत्य वाष्पेनान्धीकृत्य दर्पणस्य निजघान दर्पणं विकृतिं नीतवान् । अथवा चिकित्सयित्वा निश्वासवातेन दर्पणस्य स्वच्छतामपनीय तत्प्रतिबिम्बशक्तिमप-जहार ॥ १४ ॥

सा तेन चेष्टाललितेन भर्तुः
शाठ्येन चान्तर्मनसा जहास ।
भवेच्च रुष्टा किल नाम तस्मै
ललाटजिह्मां भृकुटिं चकार ॥ १५ ॥

सा सुन्दरी तेन चित्रणात्मकेन चेष्टाललितेन क्रियासौन्दर्येण निजकृतेन, भर्तुः पत्युश्च शाठ्येन धौर्त्येन दर्पणप्रक्षेपणात्मकेन, अन्तर्मनसा मनस्येव जहास हसितवती न तु बहिः । किलेति निश्चये, नामेति प्रसिद्धे प्रत्यक्षे वा, प्रत्यक्षरूपेण तु दृढं रुष्टाऽप्रसन्ना भवेच्च बभूव च । भवेच्च इत्यस्य स्थाने भूत्वा च इति पाठान्तरः शोभनः । तस्मै ललाटजिह्मां ललाटो मस्तकं जिह्मं कुटिलं यस्यामेवं भूतां भृकुटिं भ्रूप्रदेशं चकार कृतवती । सक्रोधं कुटिलां भ्रूभंगिं दर्शयामासेत्यर्थः । स्वस्य विशेषकचित्रणेन नन्दस्य च दर्पणप्रक्षेपणेन अन्तर्विहसन्ती अपि सुन्दरी उपरिष्टादुग्रं क्रोधं नाटयामास ॥ १५ ॥

क्रोधाभिनयमेव दर्शयति—

चिक्षेप कर्णोत्पलमस्य चांसे
करेण सव्येन मदालसेन ।
पत्राङ्गुलिं चार्धनिमीलिताक्षे
वक्त्रेऽस्य तामेव विनिर्दुधाव ॥ १६ ॥

कर्णोत्पलं पुष्परूपं कर्णभूषणं मदालसेन मदेन विपरीतमनोवृत्तिजनितेन अलसः शिथिलस्तेन सव्येन दक्षिणेन करेण हस्तेन अस्य नन्दस्याऽसे स्कन्धे चिक्षेप प्रक्षिप्तवती । तामेव पूर्वनिर्दिष्टां पत्राङ्गुलिं केशरादिना कपोले चित्रितां पत्राकाररेखां च । पत्रलेखा पत्रांगुलिरित्यमरः [२.६.१२२]। 'पत्रांगुलिर्द्राविडकादिषु कपोले पत्रभङ्गः' इति क्षीरस्वामी । अस्य नन्दस्य अर्धनिमीलिताक्षे अर्धे निमीलिते संकोचिते अक्षिणी नेत्रे यत्र एवंभूते वक्त्रे मुखे विनिर्दुधाव विनिर्लिलेप रचयामास । रोषावेशवशात् कर्णोत्पलं प्रक्षिप्य सा सुन्दरी स्वकपोल इव नन्दस्यापि मुखे केशरादिना पत्राकृतिं रेखामकरोत् । अथवा अर्धनिमीलिताक्षे अस्य नन्दस्य वक्त्रे पत्राङ्गुलिं पत्रमिव कोमलामंगुलिं सा विनिर्दुधाव विकम्प-

मामास । अंगुलिकम्पनमुद्रया तं तर्जितवतीत्यर्थः ॥ १६ ॥

ततश्चलन्नूपुरयोक्त्रिताभ्यां
नखप्रभोद्भासितराङ्गुलिभ्याम् ।
पद्भ्यां प्रियाया नलिनोपमाभ्यां
मूर्ध्ना भयान्नाम ननाम नन्दः ॥ १७ ॥

ततोऽङ्गुलितर्जनानन्तरं प्रियायाः सुन्दर्याः चलन्नूपुरयोक्त्रिताभ्यां चलद्भिः कम्पमानैर्नूपुरैराभूषणविशेषैर्युक्ताभ्यां नखप्रभोद्भासितराङ्गुलिभ्यां नखानां प्रभाभिर्दीप्तिभिरुद्भासितरा दीप्यमाना अंगुलयो यत्र ताभ्यां नलिनोपमाभ्यां कमलसदृशकोमलाभ्यां पद्भ्यां चरणाभ्यां भयात् नन्दो मूर्ध्ना शिरसा ननाम प्रह्वीबभूव । ताडनभिया नन्दो निजजायायाश्चरणयोः पपातेत्यर्थः ॥ १७ ॥

स मुक्तपुष्पोन्मिषितेन मूर्ध्ना
ततः प्रियायाः प्रियकृद् बभासे ।
सुवर्णवेद्यामनिलावभग्नः
पुष्पातिभारादिव नागवृक्षः ॥ १८ ॥

ततः प्रणामानन्तरं मुक्तपुष्पोन्मिषितेन मुक्तं वृन्तात् प्रच्युतं पृथग्भूतं यत् पुष्पं तदिवोन्मिषितेन विश्रृंखलितेन विकीर्णकेशेन यद्वा मुक्तपुष्पं च तदुन्मिषितं तेन, शिरसश्चरणयोः पातेन च्युतपुष्पशेखरेण विकीर्णकेशेन चेत्यर्थः । मूर्ध्ना शिरसा प्रियायाः प्रियकृत् अनुकूलकारी स नन्दः, सुवर्णवेद्यां सुवर्णनिर्मितायां वेद्यां पुष्पातिभारात् पुष्पाणामतिभारात् अनिलावभग्नः अनिलेन वायुना अवभग्न उत्पाटितो नागवृक्ष इव तमालवृक्ष इव बभासे दिदीपे । गौरवर्णयोश्चरणयोरिदं श्यामवर्णं नन्दस्य शिरः सुवर्णवेद्यां पतितस्य नागवृक्षस्य शोभां लेभ इत्यर्थः ॥ १८ ॥

सा तं स्तनोद्वर्तितहारयष्टिर्
उत्थापयामास निपीड्य दोर्भ्याम् ।
कथं कृतोऽसीति जहास चोच्चैर्
मुखेन साचीकृतकुण्डलेन ॥ १९ ॥

सा सुन्दरी स्तनोद्वर्तितहारयष्टिः स्तनयोर्वक्षसि उद्वर्तिता इतस्ततो विकम्प-

माना हारयष्टिर्यस्याः सा, तं चरणयोः पतितं नन्दं निजपतिं दोर्भ्यां बाहुभ्यां निपीड्य दृढमालिङ्गय उत्थापयामास उत्थापितवती । कथं कृतोऽसि कीदृशीमवस्थां प्रापितोऽसीति च वदन्ती साचीकृतकुण्डलेन साचीकृतं लीलया तिर्यक्कृतं कुण्डलं लम्बमानकर्णभूषणं यत्र एवं भूतेन मुखेन उच्चैर्जहास हसितवती । पादयोः पतितं पतिं सप्रणयमुत्थाप्य मयैवेदृशीं दशां नीतोऽसीति निजबलं प्रदर्शयन्ती तस्य परिहासं चक्रे ॥ १९ ॥

पत्युस्ततो दर्पणसक्तपाणेर्
मुहुर्मुहुर्वक्त्रमवेक्षमाणा ।
तमालपत्रार्द्रतले कपोले
समापयामास विशेषकं तत् ॥ २० ॥

ततः परिहासानन्तरं दर्पणसक्तपाणेः दर्पणे सक्तो नियुक्तः पाणिर्यस्य तस्य पत्युर्भर्तुर्नन्दस्य वक्त्रं मुखं मुहुर्मुहुः पौनःपुन्येन अवेक्षमाणा अवलोकयन्ती तद् विशेषकं पूर्वनिर्दिष्टं कपोलचित्रणं तमालपत्रार्द्रतले तमालपत्रमिवार्द्रं सुकोमलं तलं स्वरूपं यस्य एवं भूते कपोले समापयामास । प्रेमकलहान्तरं दर्पणं धारयितुर्भर्तुः सस्नेहं वदनं पश्यन्ती तमालपत्राकारमेव विशेषकं सुकोमले कपोले पूरयामास ॥ २० ॥

तस्या मुखं तत्सतमालपत्रं
ताम्राधरोष्ठं चिकुरायताक्षम् ।
रक्ताधिकाग्रं पतितद्विरेफं
सशैवलं पद्ममिवावभासे ॥ २१ ॥

तस्याः सुन्दर्याः सतमालपत्रं तमालपत्राकारेण विशेषकेण सहितम्, ताम्राधरोष्ठं ताम्रस्य ताम्रवर्णस्येव अधरमोष्ठं यत्र तत्, चिकुरायताक्षं चिकुराः शिरःकेशास्तत्र पर्यन्तमायते दीर्घे अक्षिणी नेत्रे यत्र तत्, एतादृक् तन्मुखं रक्ताधिकाग्रं रक्ताधिकमग्रं यस्य तत् तीव्ररक्तवर्णं पतितद्विरेफं पतितौ कुतश्चिदागत्य स्थितौ द्विरेफौ भ्रमरौ यत्र तत् समुपविष्टभ्रमरं सशैवलं शैवलेन जलनील्या सहितं शैवलपरिवेष्टितं पद्ममिव कमलमिव आबभासे समन्ताद दिदीपे । विशेषक-

चित्रणेन सुन्दर्या मुखं सन्निविष्टभ्रमरं कमलमिव शुशुभ इत्यर्थः ॥ २१ ॥

नन्दस्ततो दर्पणमादरेण which was witness to her decoration
holding बिभ्रत्तदा मण्डनसाक्षिभूतम् ।
looking विशेषकावेक्षणकेकराक्षो squinting
लडत्प्रियाया वदनं ददर्श ॥ २२ ॥

ततो विशेषकचित्रणानन्तरं नन्दो मण्डनसाक्षिभूतं मण्डनस्यालंकरणस्य साक्षिभूतं दर्पणमादरेण बिभ्रत् धारयन् तदा तस्मिन् काले विशेषकावेक्षणकेकराक्षः विशेषकस्यावेक्षणेऽवलोकने केकरे तिर्यग्भूते अक्षिणी नेत्रे यस्य सः, एवंभूतः सन् लडत्प्रियायाः । लड विलासे ईप्सायां जिह्वोन्मथने उपसेवायाम् । विलसत्प्रियायाः सुन्दर्या वदनं मुखं ददर्श । विशेषकचित्रणस्य समाप्तत्वादनावश्यकेऽपि दर्पणधारणे, कान्तिणा प्रियास्यावलोकनतत्परस्तदापि तं न तत्याज । आत्मविस्मृतः सन् प्रियामुखमेवावलोकयामासेत्यर्थः ॥ २२ ॥

तत्कुण्डलादष्टविशेषकान्तं particularly charming
ducks कारण्डवक्लिष्टमिवारविन्दम् ।
नन्दः प्रियाया मुखमीक्षमाणो
all the more भूयः प्रियानन्दकरो बभूव ॥ २३ ॥

नन्दः कुण्डलादष्टविशेषकान्तं कुण्डलेन कर्णभूषणेन ईषत्स्पृष्टत्वात् विशेषरमणीयं कपोलपालिसन्निहितं हि कुण्डलं भवति, तत्सामीप्यात् विशेषमनोहारि, अत एव कारण्डवक्लिष्टं कारण्डवो हंसविशेषस्तेन क्लिष्टं बहुश इतस्ततो गमनागमनेन मर्दितमरविन्दमिव कमलमिव प्रियायाः सुन्दर्या मुखमीक्षमाणोऽवलोकयन् भूयः पुनरपि प्रियानन्दकरः प्रियाया आनन्दोत्पादको बभूव, हंसस्पर्शेन कमलमिव कुण्डलस्पर्शेन विशेषकमनीयं प्रियाया मुखं पश्यन् नन्दस्तस्या आनन्दातिशयमुत्पादयामासेत्यर्थः ॥ २३ ॥

विमानकल्पे स विमानगर्भे
ततस्तथा चैव ननन्द नन्दः ।
तथागतश्चागतभैक्षकालो
भैक्षाय तस्य प्रविवेश वेश्म ॥ २४ ॥

ततः प्रियामुखदर्शनानन्तरं स नन्दो विमानकल्पे विमानसदृशे, अत एव विमानगर्भे व्योमयानमध्य इव प्रासादमध्ये स्थितस्तथैव ननन्द, यथा प्रिया तथैव सोऽप्यानन्दं लेभे । आगतभैक्षकाल आगतः सम्प्राप्तो भैक्षकालो भिक्षासमयो यस्य स तथागतो बुद्धः साक्षादेव तस्य नन्दस्य वेश्म गृहं भिक्षार्थं प्रविवेश अन्तराजगाम । वैषयिकसुखोदधौ निमग्ने नन्दे कदाचित् भगवान् बुद्धः स्वयमेव तद् गृहे भिक्षार्थमाजगाम ॥ २४ ॥

अवाङ्मुखो निष्प्रणयश्च तस्थौ
भ्रातुर्गृहेऽन्यस्य गृहे यथैव ।
तस्मादथो प्रेष्यजनप्रमादात्
भिक्षामलब्ध्वैव पुनर्जगाम ॥ २५ ॥

यथाऽन्यस्य गृहे तथैव भ्रातुर्नन्दस्यापि गृहे अवाङ्मुखोऽधोमुखो निष्प्रणयश्च इदं मम भ्रातुर्गृहमिति प्रणयेन प्रेम्णा रहितः सन्, अथवा प्रणयो याच्ञा भिक्षार्थमागतोऽपि याच्ञारहितः सन्, तस्थौ स्थितवान् । अथो स्थित्यनन्तरं प्रेष्यजनप्रमादात् सेवकानामुपेक्षावशात् तस्मात् गृहात् भिक्षामलब्ध्वैव अप्राप्यैव पुनर्जगाम प्रतिनिवृत्य गतवान् । सर्वतो निरपेक्षो बुद्धो भ्रातुर्गृहे भृत्यजनप्रमादात् गृहस्वामिनश्च विषयपरायणत्वात् भिक्षामपि नालभत ॥ २५ ॥

काचित् पिपेषाङ्गविलेपनं हि
वासोऽङ्गना काचिदवासयच्च ।
अयोजयत् स्नानविधिं तथान्या
जग्रन्थुरन्याः सुरभीः स्रजश्च ॥ २६ ॥

सेवकजनस्य प्रमादकारणं दर्शयति-हि यतः काचिदङ्गना सेवातत्परा स्त्री

अङ्गविलेपनं सुगन्धिद्रव्याणि संमिश्र्य सज्जीकृतं गात्रानुलेपनं पिपेष पिष्टवती। काचिच्चाङ्गना वासो वस्त्राणि अवासयद् अधारयत्। तथा चान्या स्नानविधिं अयोजयत् स्नानार्थमुपक्रममकरोत्। अन्याश्च सुरभीः सुगन्धियुक्ताः स्रजो माला जग्रन्थुः। एवं कार्यान्तरासक्तमनस्त्वात् सर्वोऽपि गृहस्य स्त्रीसेवकजनस्तत्रागतं बुद्धं न सत्कृतवान्। कार्यं परित्यज्यापि तथाभूतानां महात्मनां सत्कारकरणस्यावश्यकत्वात् सत्काराकरणं प्रमाद एव॥ २६॥

तस्मिन् गृहे भर्तुरतश्चरन्त्यः
क्रीडानुरूपं ललितं नियोगम्।
काश्चिन्न बुद्धं ददृशुर्युवत्यो
बुद्धस्य वैषा नियतं मनीषा॥ २७॥

अतः कार्यान्तरासक्तत्वादस्मादेव कारणात् तस्मिन् गृहे नन्दप्रासादे भर्तुर्नन्दस्य क्रीडानुरूपं लीलानुकूलं ललितं सुन्दरं नियोगं आदेशमाज्ञां चरन्त्यः पालयन्त्यः काश्चिद् युवतयो गृहसेविकास्तरुण्यो बुद्धं भगवन्तं न ददृशुर्दृष्टवत्यः। वा अथवा बुद्धस्य भगवत एवैषा मनीषा एवंभूता बुद्धिः, यदेता मां न पश्येयुरिति नियतं निश्चितम्। निजभर्तुराज्ञानुसारं कार्याणि सम्यगनुतिष्ठन्त्योऽन्तःपुरसेविकास्तरुण्यो बुद्धं नापश्यन्। अथवा योगसामर्थ्यात् ताभ्य आत्मानं परिजिहीर्षन् बुद्धः स्वयमेव ताभिर्न ददृशे॥ २७॥

काचित् स्थिता तत्र तु हर्म्यपृष्ठे
गवाक्षपक्षे प्रणिधाय चक्षुः।
विनिष्पतन्तं सुगतं ददर्श
पयोदगर्भादिव दीप्तमर्कम्॥ २८॥

तत्र काचित्तु अङ्गना हर्म्यपृष्ठे प्रासादपटले स्थिता विद्यमाना सती गवाक्षपक्षे वातायनप्रदेशे चक्षुर्नेत्रं प्रणिधाय सावधानं बहिः प्रक्षिप्य विनिष्पतन्तं गृहाद् बहिर्गच्छन्तं सुगतं बुद्धं पयोदगर्भात्, मेघानां मध्यात्, विनिष्पतन्तं अधोयान्तं दीप्तं तेजोमयमर्कं सूर्यमिव ददर्श अवलोकितवती। तदानीमेकाङ्गना प्रासादच्छदि स्थिता गवाक्षमार्गेण भिक्षामप्राप्यैव प्रति निवर्तमानं भगवन्तं बुद्धमवलोकयामास॥ २८॥

सा गौरवं तत्र विचार्य भर्तुः
स्वया च भक्त्यार्हतयार्हतश्च ।
नन्दस्य तस्थौ पुरतो विवक्षुस्
तदाज्ञया चेति तदाचचक्षे ॥ २६ ॥

सा अङ्गना तत्र बुद्धागमने भर्तुः निजस्वामिनो नन्दस्य गौरवं महत्त्वं विचार्य अवबुध्य स्वया निजया च अर्हतया पूज्यतया भक्त्या सेवापरया वृत्त्या, अर्हतः पूज्यस्य नन्दस्य निजस्वामिनः पुरतः समक्षं विवक्षुः किमपि वक्तुमिच्छुर्बुद्धागमनसंदेशं भर्त्रे दातुकामा तस्थौ तत्रोपागमत् । तदाज्ञया नन्दस्यादेशेन च भर्तुराज्ञामुपलभ्येत्यर्थः, तत् बुद्धस्य गमनमाचचक्षे आचख्यौ । अत्र प्रासादे बुद्धस्यागमनं मम भर्तुः प्रतिष्ठाकरमिति विचारयन्ती सा तदागमनं भर्त्रे न्यवेदयत् ॥ २६ ॥

अनुग्रहायास्य जनस्य शङ्के
गुरुर्गृहं नो भगवान् प्रविष्टः ।
भिक्षामलब्ध्वा गिरमासनं वा
शून्यादरण्यादिव याति भूयः ॥ ३० ॥

अस्य जनस्य, अत्र प्रासादे निवसतो जनसमूहस्य अनुग्रहाय अभ्युपपत्तये कष्टनिवारणाय गुरुरुपदेष्टा भगवान् बुद्धो नोऽस्माकं गृहं प्रविष्टः समागत इति शंके सम्भावयामि । भिक्षां गिरमादरवाक्यं आसनं वा अलब्ध्वा अप्राप्यैव भूयः पुनरयं शून्यादरण्यादिव निर्जनाद् वनप्रदेशादिव प्रतिनिवृत्य याति गच्छति । भगवांस्तु अस्मासु दयां वितरन् अत्रागतः । इह पुनः केनापि भिक्षासनदानेन वाचापि वा तस्य सत्कारो न व्यधायीति प्रासादापि शून्याद् वनादिव प्रतिनिवर्तत इति महत् शोकस्थानम् ॥ ३० ॥

श्रुत्वा महर्षेः स गृहप्रवेशं
सत्कारहीनं च पुनः प्रयाणम् ।
चचाल चित्राभरणाम्बरस्रक्-
कल्पद्रुमो धूत इवानिलेन ॥ ३१ ॥

स नन्दो महर्षेर्भगवतो बुद्धस्य गृहप्रवेशं स्वप्रासादे समागमनं श्रुत्वाऽऽकर्ण्य सत्कारहीनं भिक्षासनदानादिरहितं च पुनः प्रयाणं गृहाद् बहिर्गमनं श्रुत्वा। चित्राभरणाम्बरस्रक्, आभरणान्याभूषणानि, अम्बराणि वस्त्राणि, स्रजो मालाः, एभिर्द्रव्यैश्चित्रः स अनिलेन वायुना धूतः कम्पितः कल्पद्रुमः पारिजात इव चचाल चकम्पे। गृहागतोऽपि महर्षिर्न सत्कृत इति तत्रादरातिशयं प्रकटयन् नन्दो महद्दुःखमनुबभूव ॥ ३१ ॥

कृत्वाञ्जलिं मूर्धनि पद्मकल्पं
ततः स कान्तां गमनं ययाचे।
कर्तुं गमिष्यामि गुरौ प्रणामं
मामभ्यनुज्ञातुमिहार्हसीति ॥ ३२ ॥

ततो दुःखानुभवानन्तरं स नन्दः पद्मकल्पं कमलसदृशं अञ्जलिं सम्पुटितौ करौ मूर्धनि शिरसि कृत्वा कान्तां प्रियां सुन्दरीं गमनं गुरुं प्रति प्रयाणं ययाचे याचितवान्। याचाप्रकारमाह—गुरौ भगवति बुद्धे प्रणामं नमस्कारादिरूपमादरातिशयं कर्तुं विधातुं गमिष्यामि यास्यामि, इह अस्मिन् कर्मणि काले वा मामभ्यनुज्ञातुं मद्गमनमंगीकर्तुमर्हसि इति। गुरवे प्रणामनिवेदनाय गन्तुं स नन्दः कान्ताया अनुमतिमपि ययाचे ॥ ३२ ॥

सा वेपमाना परिसस्वजे तं
शालं लतावातसमीरितेव।
ददर्श चाश्रुप्लुतलोलनेत्रा
दीर्घं च निश्वस्य वचोऽभ्युवाच ॥ ३३ ॥

सा सुन्दरी विरहभिया वेपमाना कम्पमाना, वातसमीरिता वातेन वायुना समीरिता प्रेरिता लता वल्लरी शालं शालवृक्षमिव तं नन्दं परिसस्वजे दृढमालिलिङ्ग। अश्रुप्लुतलोलनेत्रा च अश्रुभिः प्लुते परिपूर्णे लोले चपले च नेत्रे नयने यस्याः सा एवंभूता ददर्श पतिमवलोकितवती। दीर्घं च निश्वस्य वक्ष्यमाणं वचोऽभ्युवाच कथितुमारेभे। विरहाशंकया कम्पमाना रुदती च सा सुन्दरी दीर्घं निश्वसती भर्तारमिदमुवाच ॥ ३३ ॥

२ नाहं यियासोर्गुरुदर्शनार्थम्

। अर्हामि कर्तुं तव धर्मपीडाम् ।

गच्छार्यपुत्रैहि च शीघ्रमेव

विशेषको यावदयं न शुष्कः ॥ ३४ ॥

अहं गुरुदर्शनार्थं गुरोर्भगवतो बुद्धस्य दर्शनार्थमवलोकनार्थं यियासोर्यातुमिच्छोर्गन्तुकामस्य तव मम भर्तुर्धर्मपीडां धर्मविषयां बाधां एवंभूते धर्मकार्ये कमपि प्रतिबन्धं कर्तुं नार्हामि न योग्यास्मि । एवंभूते तव पुण्यकार्ये नाहं कामपि बाधामुपस्थापयितुमभिलषामीत्यर्थः । अत एव हे आर्यपुत्र ! गच्छ स्वैरं याहि । परं शीघ्रमेव च अतिसत्वरं ऐहि, आगच्छ ततः प्रतिनिवृत्य आयाहि, यावदयं विशेषकः शुष्को न भवेत् ॥ ३४ ॥

विलम्बे तु सति दण्डमाह—

स चेद् भवेस्त्वं खलु दीर्घसूत्रो

दण्डं महान्तं त्वयि पातयेयम् ।

मुहुर्मुहुस्त्वां शयितं कुचाभ्यां

विबोधयेयं च न चालपेयम् ॥ ३५ ॥

चेद् यदि त्वं दीर्घसूत्रो विलम्बेनात्र आगन्ता भवेः, तर्हि त्वयि त्वदुपरि महान्तं तीव्रं दण्डं पातयेयम् । तव चिरेणागमने त्वामवश्यं दण्डयिष्यामीत्यर्थः । दण्डप्रकारं दर्शयति, शयितं सुप्तं त्वां कुचाभ्यां स्तनाभ्यां वक्षःस्पर्शेन मुहुर्मुहुः वारंवारं विबोधयेयं तव निद्रायाः क्षयं कुर्याम्, न चालपेयं त्वया सह भाषणं न कुर्याम् । सुप्तोत्थापितेन भर्त्रा सह प्रियाया असंभाषणं मुखं परिवर्त्योपवेशनं वा भर्तरि महान् दण्डपातः ॥ ३५ ॥

अथाप्यनाश्यानविशेषकायां

मय्येष्यसि त्वं त्वरितं ततस्त्वाम् ।

निपीडयिष्यामि भुजद्वयेन

निर्भूषणेनार्द्रविलेपनेन ॥ ३६ ॥

अथापि अथ यदि त्वं अनाश्यानविशेषकायाम् । श्यै शोषणे । आश्यानं

शुष्कम् । न आश्यानमनाश्यानं अशुष्कमार्द्रं यावत् विशेषकं तावदेव, न ततः पश्चात् एवंभूतायां मयि सत्यामेष्यसि आगमिष्यसि, तर्हि त्वरितं तूर्णमेव त्वां निर्भूषणेन भूषणरहितेन आर्द्रविलेपनेन सद्यस्कविलेपनयुक्तेन भुजद्वयेन बाहुयुगलेन निपीडयिष्यामि गाढमालिंगयिष्यामि । अयं भावः, इदं चित्रितं विशेषकं यावत् शुष्कं न भविष्यति तावदेव त्वया आगन्तव्यम् । भुजद्वयस्य निर्भूषणतापि गाढालिङ्गने सौख्यसौलभ्यप्रयोजना ॥ ३६ ॥

इत्येवमुक्तश्च निपीडितश्च
तया स वेणुस्वनया जगाद ।
एवं करिष्यामि विमुञ्च चण्डि
यावद् गुरुर्दूरगतो न मे सः ॥ ३७ ॥

इत्येवमुक्तप्रकारेण वेणुस्वनया वेणुनिर्मितं मुखध्मातं वादित्रं वंशीत्यभिधीयते । वंशीसदृशमधुरशब्दया तया सुन्दर्या उक्तः कथितः स नन्दो जगाद प्रत्युवाच । हे चण्डि ? एवं करिष्यामि यथा त्वं कथयासि तथैवाचरिष्यामि शीघ्रमेव प्रतिनिवृत्य अत्रागमिष्यामीत्यर्थः । परमिदानीं यावन्मे मम गुरुः पूज्यो बुद्धो दूरगतो दूरदेशं प्राप्तो न भवेत् तावदेव विमुञ्च परित्यज मामिति शेषः । अत्रैव तव प्रणयवशात् विलम्बे सति यदि तावता कालेन गुरुर्दूरं यायात् तर्हि महाननर्थो भवेत, अत एव शीघ्रमेव मां गन्तुमनुजानीहि इति । विलम्बकृतानर्थशङ्कयैव चण्डीति तीव्रसम्बोधनम् ॥ ३७ ॥

ततः स्तनोद्वर्तितचन्दनाभ्यां
मुक्तो भुजाभ्यां न तु मानसेन ।
विहाय वेषं मदनानुरूपं
सत्कारयोग्यं स वपुर्बभार ॥ ३८ ॥

ततः प्रियानुज्ञानन्तरं स्तनोद्वर्तितचन्दनाभ्यां स्तनसकाशात् उद्वर्तितं संलग्नं चन्दनं ययोस्ताभ्यां वक्षःसंसर्गेण सचन्दनाभ्यां भुजाभ्यां बाहुभ्यां प्रियया मुक्तः परित्यक्तो नतु मानसेन हृदयेन परित्यक्तः स नन्दो मदनानुरूपं सम्भोगयोग्यं शृंगारपरिपूर्णं वेषं वस्त्राभरणादि विहाय शरीरादवतार्य सत्कारयोग्यं भगवतो बुद्ध-

स्यादरानुरूपं वपुर्बभार वेषादिकं धारितवान् । यथाकथंचित् प्रियाया अनुमतिमादाय बुद्धदर्शनार्थं गन्तुकामः स विनीतवेषं दध्रे ॥ ३८ ॥

सा तं प्रयान्तं रमणं प्रदध्यौ
प्रध्यानशून्यस्थितनिश्चलाक्षी ।
स्थितोच्चकर्णा व्यपविद्धशष्पा
भ्रान्तं मृगं भ्रान्तमुखी मृगीव ॥ ३९ ॥

प्रध्यानशून्यस्थितानिश्चलाक्षी प्रध्यानेन प्रकर्षचिन्तनेन भर्तृचिन्तापरवशतया शून्यवत् चित्रलिखिता मूर्तिरिव स्थिता अत एव निश्चलाक्षी, निश्चले अक्षिणी यस्याः सा एवं भूता, सा प्रिया सुन्दरी । व्यपविद्धशष्पा व्यपविद्धं परित्यक्तं शष्पं कोमलतृणं यया सा स्थितोच्चकर्णा स्थितौ निश्चलौ उच्चैर्भूतौ च कर्णौ यस्याः सा । भ्रान्तमुखी भ्रान्तं परिवृत्तं मुखं यस्याः सा एवंभूता मृगी हरिणी भ्रान्तं वेगेन प्रयान्तं मृगं हरिणमिव, प्रयान्तं गच्छन्तं तं रमणं नन्दं पतिं प्रकर्षेण चिन्तयामास । यथा वने मृगी मृगं निर्निमेषमवलोयति तथैव सा सुन्दरी गृहाद्गच्छन्तं पतिं ददर्श ॥ ३९ ॥

दिदृक्षयाक्षिप्तमना मुनेस्तु
नन्दः प्रयाणं प्रति तत्वरे च ।
विवृत्तदृष्टिश्च शनैर्ययौ तां
करीव पश्यन् स लडत्करेणुम् ॥ ४० ॥

नन्दस्तु मुनेर्भगवतो बुद्धस्य दिदृक्षया दर्शनेच्छया आक्षिप्तमना आक्षिप्तमाविष्टं मनो हृदयं यस्य सः एवंभूतः सन् प्रयाणं गमनं प्रति तत्वरे शीघ्रतां चकार । लडत्करेणुं अभिलसन्तीं शुभ्रां हस्तिनीं करीव गज इव स नन्दो विवृत्तदृष्टि विवृत्ता तिर्यग्भूता दृष्टिर्यस्य एवंभूतः सन् तां सुन्दरीं पश्यन् अवलोकयन् शनैर्ययौ मन्दं मन्दं गृहाद् बहिर्जगाम । बुद्धदर्शनेच्छया आकृष्टचित्तोऽपि नन्दः प्रियाप्रेम्णा विद्धहृदयो मुहुर्मुहुस्तां पश्यन्नेव गृहाद् बहिर्गन्तु प्रयत्नं चकार ॥ ४० ॥

शातोदरीं पीनपयोधरोरुं
स सुन्दरीं रुक्मदरीमिवाद्रेः ।
काक्षेण पश्यन्न ततर्प नन्दः
पिबन्निवैकेन जलं करेण ॥ ४१ ॥

स नन्दः शातोदरीं शतं क्षीणमुदरं यस्यास्तां कृशोदरीं पीनपयोधरोरुं पीनौ स्थूलौ पयोधरौ स्तनौ ऊरू च यस्यास्तां सुन्दरीं जायां अद्रेः पर्वतस्य रुक्मदरीं सुवर्णगुहामिव गुहा हि मध्यतः कृशा भवति रिक्तत्वात् । तस्याः पार्श्वभागौ ऊरुस्थानीयौ वक्षःस्थानीयश्चोर्ध्वभागः स्वभावेनैव महान्तो भवन्ति गुहायाः सुवर्णमयत्वं च प्रियाया गौरवर्णतां लक्षयति, काक्षेण तिर्यग् दृष्ट्या पश्यन् अवलोकयन् एकेन करेण हस्तेन जलं सलिलं पिबन्निव न ततर्प तृप्तिं न लेभे । यथा जलपाने साधनस्य करस्यैकत्वादपूर्णता तथैव दर्शनेऽपि दृष्टेस्तिर्यक्त्वात् दर्शनसाधनस्यापूर्णतेव, अत एव साध्ये तृप्त्यभावः ॥ ४१ ॥

तं गौरवं बुद्धगतं चकर्ष
भार्यानुरागः पुनराचकर्ष ।
सोऽनिश्चयान्नापि ययौ न तस्थौ
तुरंस्तरंगेष्विव राजहंसः ॥ ४२ ॥

बुद्धगतं बुद्धभवं बुद्धविषयकं गौरवं गुरुता महत्त्वं पूज्यत्वं तं नन्दं चकर्ष, पुनस्तदनन्तरं च भार्यानुरागः प्रियायाः प्रेम तमाचकर्ष आकृष्टवान् । एवमनिश्चयात् स नन्दो न ययौ जगाम नापि तस्थौ स्थितवान् । यथा तरंगेषु वीचिषु तुरन् गच्छन् राजहंसो न गतिमान् नापि स्थितिमान् प्रतीयते । भक्तिप्रणययोर्दोलामारूढः स क्षणं किंकर्तव्यता विमूढो बभूवेत्यर्थः ॥ ४२ ॥

अदर्शनं तूपगतश्च तस्या
हर्म्यात्ततश्चावततार तूर्णम् ।
श्रुत्वा ततो नूपुरनिस्वनं स
पुनर्ललम्बे हृदये गृहीतः ॥ ४३ ॥

तस्याः सुन्दर्या अदर्शनं दृष्टेरगोचरतां परोक्षतामुपगतः संप्राप्तः ततस्तस्मात्

हर्म्यात् प्रासादात् तूर्णं शीघ्रमेवावततार नीचैराजगाम। ततः नीचैरागमनानन्तरं नूपुरनिस्वनं प्रियायाश्चरणभूषणशब्दं श्रुत्वा समाकर्ण्य स नन्दो हृदये मनसि गृहीतो निगडित इव पुनर्ललम्बे भूयोऽपि तत्रैव लम्बतेस्म। नूपुरशब्दं श्रुत्वा प्रियाप्रणयने प्रतिबद्धो नाग्रे पदमपि धर्तुं शशाकेत्यर्थः ॥ ४३ ॥

स कामरागेण निगृह्यमाणो
धर्मानुरागेण च कृष्यमाणः।
जगाम दुःखेन विवर्त्यमानः
प्लवः प्रतिस्रोत इवापगायाः ॥ ४४ ॥

स नन्दः कामरागेण मदनानुरागेण विषयप्रेम्णा निगृह्यमाणः सम्यग् निगडित इव, धर्मानुरागेण बुद्धगतभक्तिप्राबल्येन च कृष्यमाणः, आपगाया नद्याः प्रतिस्रोतः प्रवाहप्रतिमुखं गच्छन् प्लव उडुप इव दुःखेन प्रियाविरहक्लेशेन विवर्त्यमानो व्याकुलीक्रियमाणो जगाम गृहान्निर्ययौ। विषयपरायणः स राजपुत्रो यथाकथंचित्, विकलताया अतिमात्रामनुभवन्, बुद्धदर्शनार्थं निजप्रासादान्निर्जगाम ॥ ४४ ॥

ततः क्रमैर्दीर्घतमैः प्रचक्रमे
कथं नु यातो न गुरुर्भवेदिति।
स्वजेय तां चैव विशेषकप्रियां
कथं प्रियामार्द्रविशेषकामिति ॥ ४५ ॥

ततः प्रासादान्निर्गमनानन्तरं दीर्घतमैः प्रलम्बमानैः क्रमैः पादविक्षेपैः प्रचक्रमे गन्तुमारेभे। गुरुर्भगवान् बुद्धः कथं नु कदाचित् यातो न भवेदिति। बुद्धः कदाचित् दूरगतो न भवेदिति शंकया सोऽतिशीघ्रं चचाल। किञ्च तां तथा विरहितां विशेषकप्रियां विशेषकः कपोलचित्रित आकारविशेषः प्रियो यस्यास्तामार्द्रविशेषकाम्, आर्द्रं सद्यस्कत्वादशुष्कमेव विशेषकं यस्यास्तथाभूतां प्रियां कथं स्वजेय आलिंगयेयमिति एतस्मादपि कारणात् स शीघ्रं वव्राज। येन भगवन्तं प्रणम्य तूर्णमेव च ततः प्रतिनिवृत्य यथाप्रतिज्ञमार्द्रविशेषकामेव प्रियां पश्येयमिति ॥४५॥

अथ स पथि ददर्श मुक्तमानं
पितृनगरेऽपि तथा गताभिमानम् ।
दशबलमभितो विलम्बमानं
ध्वजमनुयान इवैन्द्रमर्च्यमानम् ॥ ४६ ॥

अथ शीघ्रगमनानन्तरं स नन्दः पितृनगरेऽपि पित्राधिष्ठिते स्वपितु राजधानी नगरेऽपि पथि मार्गे मुक्तमानं मुक्तः परित्यक्तो मानः सत्कार आदराभिलाषो येन तं तथा किञ्च गताभिमानं गतो दूरापेतोऽभिमानोऽहंकारो यस्मात् तमपास्तगर्वं दशबलं दानक्षान्तिशीलवीर्यध्यानशान्तिबलोपायप्रणिधानज्ञानानि दश बलानि यस्य स दशबलो बुद्धः । बुद्धं, अनुयाने जनसमूहेनानुगमे विलम्बमानं, ऐन्द्रं इन्द्रदेवताकं ध्वजं केतनमिव, अभित उभयतोऽर्च्यमानं पूज्यमानं ददर्श, अवलोकयामास । अहंकारादिविकाररहितं बुद्धं पथि जनैः परितः पूज्यमानं प्रणम्यमानं वा ददर्श ॥ ४६ ॥

इत्याचार्याश्वघोषप्रणीते सौन्दरनन्दमहाकाव्ये पञ्जाबविश्वविद्यालयसंस्कृत-
साहित्याध्यापकेन लक्ष्मणस्वरूपेण विरचितया नूतनाख्यया
व्याख्यया समलङ्कृते चतुर्थः सर्गः ॥

अथ महाकविकालिदासविरचिते कुमारसम्भवे
पञ्चमः सर्गः ।

तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता ॥ १ ॥

अन्वयः—पार्वती तथा समक्षं मनोभवं दहता पिनाकिना भग्नमनोरथा सती हृदयेन रूपं निनिन्द, चारुता प्रियेषु सौभाग्यफला हि ॥

संजीवनी—तथेति । पर्वतस्यापत्यं स्त्री पार्वती तथा तेन प्रकारेण अक्ष्णोः समीपे समक्षम् पुरतः । अव्ययं विभक्तिसमीपसमृद्धीत्यादिना अव्ययीभावः । मनोभवं मन्मथं दहता भस्मीकुर्वता पिनाकिना ईश्वरेण भग्नः खण्डितो मनोरथोऽभिलाषो यस्याः सा तथोक्ता सती हृदयेन मनसा रूपं सौन्दर्यं निनिन्द, धिङ् मे रूपं, यद् हरमनोहरणाय नालम् इति गर्हितवतीत्यर्थः । युक्तञ्चैतदित्याह—तथा हि चारुता सौन्दर्यं प्रियेषु पतिषु विषये सौभाग्यं प्रियवाल्लभ्यं फलं यस्याः सा तथोक्ता । सौन्दर्यस्य तदेव फलं, यद्भर्तृसौभाग्यं लभ्यते, नो चेद् विफलं तद् इति भावः । अस्मिन् सर्गे वंशस्थं वृत्तम् । "जतौ तु वंशस्थमुदीरितं जरौ" इति लक्षणात् ॥ १ ॥

इयेष सा कर्तुमवन्ध्यरूपतां
समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं
तथाविधं प्रेम पतिश्च तादृशः ॥ २ ॥

अन्वयः—सा पार्वती समाधिमास्थाय आत्मनोऽवन्ध्यरूपतां कर्तुं इयेष । अन्यथा तथाविधं प्रेम तादृशः पतिश्च द्वयं कथं अवाप्यते ॥

संजीवनी—इयेषेति । सा पार्वती समाधिम् एकाग्रताम् आस्थाय अवलम्ब्य तपोभिर् वक्ष्यमाणनियमैः करणभूतैर् आत्मनः स्वस्याः अवन्ध्यरूपताम्

सफलसौन्दर्यत्वम् कर्तुम् इयेष, इच्छति स्म, तपसा शिवं वशीकर्तुमुद्युक्तेत्यर्थः। अन्यथा ततोऽन्यप्रकारेण कथं वा इयमवाप्यते। किं तद् द्वयम्, तथाभूता विधा प्रकारो यस्य तत् तथाविधं प्रेम स्नेहः, येनार्धाङ्गहरा हरस्य भवेदिति भावः। तादृशः पतिश्च यो मृत्युञ्जय इति भावः। द्वयमेव खलु स्त्रीणामपेक्षितं, यद्भर्तृवाल्लभ्यं जीवद्भर्तृकत्वञ्चेति, तच्च तपश्चर्यैकसाध्यमिति निश्चिकायेत्यर्थः। अत्र मनुः—"यद्दुष्करं यद्दुरापं यद्दुर्गं यच्च दुस्तरम्। तत् सर्वं तपसा प्राप्यं तपो हि दुरतिक्रमम्" इति ॥ २ ॥

निशम्य चैनां तपसे कृतोद्यमां
सुतां गिरीशप्रतिसक्तमानसाम्।
उवाच मेना परिरभ्य वक्षसा
निवारयन्ती महतो मुनिव्रतात् ॥ ३ ॥

अन्वयः—मेना च गिरीशप्रतिसक्तमानसां तपसे कृतोद्यमां सुतां निशम्य एनां वक्षसा परिरभ्य महतो मुनिव्रतात्, निवारयन्ती सती उवाच ॥

संजीवनी—निशम्येति। मेना मेनका च गिरीशप्रतिसक्तमानसाम् हरासक्तचित्ताम् तपसे तपश्चरणाय कृतोद्यमाम् कृतोद्योगाम् सुतां निशम्य श्रुत्वा एनाम् पार्वतीम् वक्षसा परिरभ्य आलिङ्ग्य महतो मुनिव्रतात् तपसो निवारयन्ती उवाच। मुनिव्रतादित्यत्र यद्यपि मुनिव्रतस्य मेनकाया अनीप्सितत्वात्, 'वारणार्थानामीप्सितः' इति नापादानत्वं, तथापि कृतोद्यमामिति मानसप्रवेशोक्तत्वाद् 'ध्रुवमपायेऽपादानम्' इत्यपादानत्वमेव स्यात्। यथाह भाष्यकारः "यच्च मनसा सम्प्राप्य निवर्तते तच्च ध्रुवमपायेऽपादानमिति प्रसिद्धम्" ॥ ३ ॥

मनीषिताः सन्ति गृहेषु देवता-
स्तपः क्व वत्से! क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः ॥ ४ ॥

अन्वयः—हे वत्से! मनीषिता देवता गृहेषु सन्ति। तपः क्व तावकं वपुः च क्व। पेलवं शिरीषपुष्पं भ्रमरस्य पदं सहेत न पुनः पतत्रिणः पदम्।

संजीवनी—सामान्यनिषेधमुक्त्वा विशेषनिषेधमाह—मनीषिता इति । हे वत्से ! मनस ईषिता इष्टा मनीषिताः । शकन्ध्वादित्वात्साधुः । देवताः शच्यादयो गृहेषु सन्ति । त्वं ता आराधयेति शेषः । तपः क तव इदम् तावकम् । 'युष्मदस्मदोरन्यतरस्याम् खञ् च' इत्यण्प्रत्ययः। 'तवकममकावेकवचने' इति तवकादेशः । वपुश्च क। तथाहि पेलवम् मृदुलम् शिरीषपुष्पं भ्रमरस्य पदम् पदस्थितिम् सहेत । पतत्रिणः पुनः पक्षिणस्तु पदं न सहेत। अतिसौकुमार्याद् दिव्योपभोगयोग्यं ते वपुर्न दारुणतपःक्षममित्यर्थः । अत्र दृष्टान्तालङ्कारः ॥ ४ ॥

इति ध्रुवेच्छामनुशासती सुतां
शशाक मेना न नियन्तुमुद्यमात् ।
क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत् ॥ ५ ॥

अन्वयः—इति अनुशासती मेना ध्रुवेच्छां सुतां, उद्यमात्, नियन्तुं न शशाक। ईप्सितार्थस्थिरनिश्चयं मनः, निम्नाभिमुखं पयश्च कः प्रतीपयेत् ।

संजीवनी—इतीति । इति एवम् अनुशासती उपदिशन्ती मेना ध्रुवेच्छाम् स्थिरव्यवसायाम् सुताम् पार्वतीम् उद्यमात उद्योगात्तपोलक्षणान् नियन्तुम् निवारयितुम् न शशाक समर्था नाभूत् । तथाहि ईप्सितार्थे इष्टार्थे स्थिरनिश्चयं मनो निम्नाभिमुखं पयश्च कः प्रतीपयेत् प्रतिकूलयेत् प्रतिनिवर्तयेदित्यर्थः । निम्नप्रवणं पय इव इष्टार्थाभिनिविष्टं मनो दुर्वारमिति भावः । अत्र दीपकानुप्राणितोऽर्थान्तरन्यासालङ्कारः ॥ ५ ॥

कदाचिदासन्नसखीमुखेन सा
मनोरथज्ञं पितरं मनस्विनी ।
अयाचतारण्यनिवासमात्मनः
फलोदयान्ताय तपःसमाधये ॥ ६ ॥

अन्वयः—कदाचित् सा मनस्विनी मनोरथज्ञं पितरं आसन्नसखीमुखेन फलोदयान्ताय तपःसमाधये आत्मनोऽरण्यनिवासं अयाचत ॥

संजीवनी—कदाचिदिति । अथ कदाचित् मनस्विनी स्थिरचित्ता सा

पार्वती मनोरथज्ञम् अभिलाषाभिज्ञम् पितरं हिमवन्तम् आसन्नसखी आप्तसखी सैव मुखम् उपायः । "मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि" इति विश्वः । तेन फलोदयः फलोत्पत्तिर् अन्तोऽवधिर्यस्य तस्मै तपःसमाधये तपोनियमार्थम् आत्मनः स्वस्या अरण्यनिवासम् वनवासम् अयाचत । 'दुह्याच्' इत्यादिना द्विकर्मकत्वम् ॥ ६ ॥

अथानुरूपाभिनिवेशतोषिणा
कृताभ्यनुज्ञा गुरुणा गरीयसा ।
प्रजासु पश्चात् प्रथितं तदाख्यया
जगाम गौरी शिखरं शिखण्डिमत् ॥ ७ ॥

अन्वयः—अथ गौरी अनुरूपाभिनिवेशतोषिणा गरीयसा गुरुणा कृताभ्यनुज्ञा पश्चात् प्रजासु तदाख्यया प्रथितं शिखण्डिमत् शिखरं जगाम ॥

संजीवनी—अथेति । अथ गौरी अनुरूपेण योग्येन अभिनिवेशेन आग्रहेण तुष्यतीति तथोक्तेन गरीयसा पूज्यतमेन गुरुणा पित्रा कृताभ्यनुज्ञा तपः कुरु इति कृतानुमतिः सती । पश्चात् तपःसिध्युत्तरकालम् प्रजासु जनेषु तदाख्यया तस्या गौर्याः संज्ञया प्रथितम् गौरीशिखरमिति प्रसिद्धमित्यर्थः । शिखण्डिमत् न तु हिंस्रप्राणिप्रचुरमिति भावः । शिखरम् शृङ्गम् जगाम ययौ ॥ ७ ॥

विमुच्य सा हारमहार्यनिश्चया
विलोलयष्टिप्रविलुप्तचन्दनम् ।
बबन्ध बालारुणबभ्रु वल्कलं
पयोधरोत्सेधविशीर्णसंहति ॥ ८ ॥

अन्वयः—अहार्यनिश्चया सा विलोलयष्टिप्रविलुप्तचन्दनं हारं विमुच्य बालारुणबभ्रु पयोधरोत्सेधविशीर्णसंहति वल्कलम् बबन्ध ॥

संजीवनी—विमुच्येति । अहार्यनिश्चया अनिवार्यनिश्चया सा गौरी विलोलाभिश्चलाभिर् यष्टिभिः प्रतिसरैः प्रविलुप्तम् प्रमृष्टम् चन्दनम् स्तनान्तरगतं येन तं तथोक्तम् हारम् मुक्तावलीम् विमुच्य विहाय बालारुणबभ्रु बालार्कपिङ्गलम् पयोधरयोः स्तनयोर् उत्सेधेन उच्छ्रायेण विशीर्णा विघटिता संहतिर् अवयवसं-

श्लेषो यस्य तत्तथोक्तम् वल्कलम् कण्ठलम्बि स्तनोत्तरीयभूतम् बबन्ध धारयामास इत्यर्थः ॥ ८ ॥

यथा प्रसिद्धैर्मधुरं शिरोरुहै-
जटाभिरप्येवमभूत्तदाननम् ।
न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते ॥ ९ ॥

अन्वयः—तदाननं प्रसिद्धैः शिरोरुहै यथा मधुरं, जटाभिर् अपि एवमेव पङ्कजं केवलं षट्पदश्रेणिभिर् एव न, सशैवलासङ्गं अपि प्रकाशते ॥

संजीवनी—यथेति । तस्या देव्या आननम् तदाननं प्रसिद्धैर् भूषितैः । "प्रसिद्धौ ख्यातभूषितौ" इत्यमरः । रोहन्तीति रुहाः । 'इगुपध-ज्ञा-प्री-किरः कः' इति कप्रत्ययः । शिरसि रुहास्तैः शिरोरुहैर् मूर्द्धजैर् यथा मधुरम् प्रियम् अभूत् । "स्वादुप्रियौ तु मधुरौ" इत्यमरः । जटाभिरप्येवम् मधुरम् अभूत् । तथाहि पङ्कजम् पद्मम् षट्पदश्रेणिभिर् भ्रमरपङ्क्तिभिरेव न किन्तु सह शैवलासङ्गेन सशैवलासङ्गमपि । 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः । प्रकाशते शैवलेनापि शोभत एवेत्यर्थः ॥ ९ ॥

प्रतिक्षणं सा कृतरोमविक्रियां
व्रताय मौञ्जीं त्रिगुणां बभार याम् ।
अकारि तत्पूर्वनिबद्धया तया
सरागमस्या रशनागुणास्पदम् ॥ १० ॥

अन्वयः—सा प्रतिक्षणं कृतरोमविक्रियां त्रिगुणां यां मौञ्जीं व्रताय बभार तत्पूर्वनिबद्धया तया तस्या रशनागुणास्पदं सरागं अकारि ॥

संजीवनी—प्रतिक्षणमिति । सा देवी प्रतिक्षणम् क्षणे क्षणे कृतरोमविक्रियाम् पारुष्यात् कृतरोमाञ्चाम् त्रिगुणाम् त्रिरावृत्ताम् यां मौञ्जीं मुञ्जमयीं मेखलाम् व्रताय तपसे बभार । तदेव पूर्वं प्रथमं यस्य तत्पूर्वम् यथा तथा निबद्धया तया मौञ्ज्या तस्या देव्या रशनागुणस्यास्पदम् स्थानं जघनम् । सह रागेण सरागम् सलोहितम् अकारि कृतम् । सौकुमार्यातिशयादिति भावः ॥ १० ॥

विसृष्टरागादधरान्निवर्तितः
स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रप्रणयी तया करः ॥ ११ ॥

अन्वयः—तया विसृष्टरागाद् अधरात् स्तनाङ्गरागारुणितात् कन्दुकाच् च निवर्तितः कुशाङ्कुरादानपरिक्षताङ्गुलिः करोऽक्षसूत्रप्रणयी कृतः ॥

संजीवनी—विसृष्टेति । तया देव्या विसृष्टरागात् त्यक्तलाक्षारसरञ्जनात् 'निसृष्टरागात्' इति पाठे नितरां त्यक्तलाक्षारागात् । अधराद् अधरोष्ठान् निवर्तितः । रागत्यागेन निष्प्रयोजनत्वादिति भावः । तथा स्तनाङ्गरागेण अरुणिताद् अरुणीकृतात् । पतनसमये तस्य स्तनयोरुपरोधादिति भावः । कन्दुकाच्च निवर्तितः । कुशाङ्कुराणाम् आदानेन लवनेन परिक्षता व्रणिता अङ्गुलयो यस्य स तथोक्तः करः पाणिर् अक्षसूत्रप्रणयी अक्षमालासहचरः कृतः ॥ ११ ॥

महार्हशय्यापरिवर्तनच्युतैः
स्वकेशपुष्पैरपि या स्म दूयते ।
अशेत सा बाहुलतोपधायिनी
निषेदुषी स्थण्डिल एव केवले ॥ १२ ॥

अन्वयः—महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैर् अपि या दूयते स्म सा बाहुलतोपधायिनी केवले स्थण्डिले एव निषेदुषी अशेत ॥

संजीवनी—महार्हेति । महानर्हो मूल्यं यस्याः सा महार्हा श्रेष्ठा या शय्या तस्याम् परिवर्तनेन लुण्ठनेन च्युतैर् भ्रष्टैः स्वकेशपुष्पैरपि या देवी दूयते स्म क्लिश्यति स्म पुष्पाधिकसौकुमार्यादिति भावः । सा देवी बाहुलतामुपधत्ते उपधानीकरोतीति बाहुलतोपधायिनी सती केवले संस्तरणरहिते स्थण्डिले भूमौ एव अशेत शयितवती । तथा निषेदुषी उपविष्टा च । 'क्सुसुश्च' इति क्वसुः । 'उगितश्च' इति ङीप् । भूमावेव शयनादिव्यवहारो न जातुपरीत्यर्थः ॥ १२ ॥

पुनर्ग्रहीतुं नियमस्थया तया
 द्वयेऽपि निक्षेप इवार्पितं द्वयम् ।
लतासु तन्वीषु विलासचेष्टितं
 विलोलदृष्टं हरिणाङ्गनासु च ॥ १३ ॥

अन्वयः—नियमस्थया तया द्वयेऽपि द्वयं पुनः ग्रहीतुम् निक्षेपोऽर्पितमिव तन्वीषु लतासु विलासचेष्टितम् हरिणाङ्गनासु विलोलदृष्टम् ॥

संजीवनी—पुनरिति । नियमस्थया व्रतस्थया तया देव्या द्वयेऽपि द्वयं पुनः ग्रहीतुम् पुनरादातुम् निक्षेपोऽर्पितमिव निक्षेपत्वेन अर्पितं किमु । क्वचित् 'द्वयीषु' इति प्रमादिकः पाठः । कुत्र द्वये किं द्वयमर्पितम्, इत्याह—तन्वीषु लतासु विलास एव चेष्टितम् विलासचेष्टितम् । हरिणाङ्गनासु विलोलदृष्टम् चञ्चलावलोकितम् च । व्रतस्थायां तस्यां तयोरदर्शनाल्लतादिषु दर्शनाच्च अर्पितमिवेत्युत्प्रेक्षा न तु वस्तुतोऽर्पणमस्तीति भावः ॥ १३ ॥

अतन्द्रिता सा स्वयमेव वृक्षकान्
 घटस्तनप्रस्रवणैर्व्यवर्धयत् ।
गुहोऽपि येषां प्रथमाप्तजन्मनां
 न पुत्रवात्सल्यमपाकरिष्यति ॥ १४ ॥

अन्वयः—सा स्वयमेव अतन्द्रिता वृक्षकान् घटस्तनप्रस्रवणैर्व्यवर्धयत् । गुहोऽपि प्रथमाप्तजन्मनां येषां पुत्रवात्सल्यम् न अपाकरिष्यति ॥

संजीवनी—अतन्द्रितेति । सा देवी स्वयमेव अतन्द्रिता असञ्जाततन्द्रा सती । तारकादित्वाद् इतच्प्रत्ययः । वृक्षकान् स्वल्पवृक्षान् । 'अल्पे' इत्यल्पार्थे कप्रत्ययः । घटा एव स्तनौ तयोः प्रस्रवणैः प्रसृतपयोभिर् व्यवर्धयत् । गुहः कुमारोऽपि प्रथमाप्तजन्मनाम् प्रथमलब्धजन्मनाम् अग्रजातानामित्यर्थः । येषाम् वृक्षकाणाम् सम्बन्धि पुत्रवात्सल्यम् सुतप्रेम नापाकरिष्यति । उत्तरत्र कुमारोदयेऽपि न तेषु पुत्रवात्सल्यं निवर्तिष्यत इत्यर्थः ॥ १४ ॥

अरण्यबीजाञ्जलिदानलालिता-
स्तथा च तस्यां हरिणा विशश्वसुः ।
यथा तदीयैर्नयनैः कुतूहलात्
पुरः सखीनाममिमीत लोचने ॥ १५ ॥

अन्वयः—अरण्यबीजाञ्जलिदानलालिता हरिणाश्च तस्याम् तथा विशश्वसुर् यथा कुतूहलात् तदीयैर् नयनैर् लोचने सखीनां पुरोऽमिमीत ॥

संजीवनी—अरण्येति । अरण्यबीजानाम् नीवारादीनाम् अञ्जलयस्तेषाम् दानेन लालिता हरिणाश्च तस्याम् देव्याम् तथा विशश्वसुर् विस्रम्भं जग्मुः । "समौ विस्रम्भविश्वासौ" इत्यमरः । यथा कुतूहलाद् औत्सुक्यात् तदीयैर् हरिणसम्बन्धिभिर् नयनैर् नेत्रैः करणैः स्वकीये लोचने सखीनां पुरः पुरतः । अनेन तेषां सम्बन्धसहत्वमुक्तम् । अमिमीत अक्षिपरिमाणतारतम्यज्ञानाय मानं चकारेत्यर्थः । केचित्तु सा पार्वती तदीयैर्नेत्रैः कुतूहलात् पुरोऽग्रे वर्तमानानां सखीनां लोचने अमिमीत व्रतस्थत्वान्नात्मन इत्याहुः । 'माङ् माने' इत्यस्माद्धातोर्लङ् । इयमेव खलु विश्वासस्य परा काष्ठा यदक्षिपीडनेऽपि न क्षुभ्यन्तीति भावः ॥ १५ ॥

कृताभिषेकां हुतजातवेदसं
त्वगुत्तरासङ्गवतीमधीतिनीम् ।
दिदृक्षवस्तामृषयोऽभ्युपागमन्
न धर्मवृद्धेषु वयः समीक्ष्यते ॥ १६ ॥

अन्वयः—कृताभिषेकाम् हुतजातवेदसं त्वगुत्तरासङ्गवती अधीतिनीम् ताम् दिदृक्षव ऋषयोऽभ्युपागमन् । धर्मवृद्धेषु वयो न समीक्ष्यते ।

संजीवनी—कृतेति । कृताभिषेकाम् कृतस्नानाम् हुतजातवेदसम् हुताग्निकां कृतहोमामित्यर्थः । त्वचा वल्कलेन उत्तरासंगवतीम् उत्तरीयवतीम् । अधीतमस्या अस्तीति, अधीतिनीम् स्तुतिपाठादिकुर्वतीम् । 'इष्टादिभ्यश्च' इतीनिप्रत्ययः । ताम् देवीम् दिदृक्षवो द्रष्टुमिच्छव ऋषयो मुनयोऽभ्युपागमन् समुपागताः । न चात्र कनिष्ठसेवादोष इत्याह—धर्मवृद्धेषु वयो न समीक्ष्यते न प्रमाणीक्रियते । सति धर्मज्यैष्ठ्ये वयोज्यैष्ठ्यं न प्रयोजकमित्यर्थः । तथा च मनुः—

"न तेन वृद्धो भवति येनास्य पलितं शिरः। यो वा युवाप्यधीयानस्तं देवाः स्थविरं विदुः" इति ॥ १६ ॥

विरोधिसत्त्वोज्झितपूर्वमत्सरं
द्रुमैरभीष्टप्रसवार्चितातिथि।
नवोटजाभ्यन्तरसम्भृतानलं
तपोवनं तच्च बभूव पावनम् ॥ १७ ॥

अन्वयः—विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैर् अभीष्टप्रसवार्चितातिथि नवोटजाभ्यन्तरसम्भृतानलं तत् च तपोवनम् पावनं बभूव ॥

संजीवनी—विरोधीति। विरोधिभिः सत्त्वैर् गोव्याघ्रादिभिर् उज्झितपूर्वमत्सरम् त्यक्तपूर्ववैरम् हिंसारहितमित्यर्थः। द्रुमैर् अभीष्टप्रसवेन इष्टफलेन अर्चिताः पूजिता अतिथयो यस्मिन् तत्तथोक्तम्। नवानामुटजानाम् पर्णशालानाम् अभ्यन्तरेषु सम्भृताः सञ्चिता अनला अग्नयो यस्मिन् तत्तथोक्तम् तच्च तपोवनम् पावयतीति पावनम् बभूव। अहिंसातिथिसत्काराग्निपरिचर्याभिर्जगत्पावनं बभूवेत्यर्थः ॥ १७ ॥

यदा फलं पूर्वतपःसमाधिना
न तावता लभ्यममंस्त काङ्क्षितम्।
तदानपेक्ष्य स्वशरीरमार्दवं
तपो महत् सा चरितुं प्रचक्रमे ॥ १८ ॥

अन्वयः—सा यदा तावता पूर्वतपःसमाधिना काङ्क्षितम् फलं लभ्यं न अमंस्त तदा स्वशरीरमार्दवं अनपेक्ष्य महत् तपः चरितुं प्रचक्रमे ॥

संजीवनी—यदेति। सा देवी यदा यस्मिन् काले तावता तावत्प्रमाणेन पूर्वतपःसमाधिना पूर्वेणानुष्ठीयमानप्रकारेण तपोनियमेन काङ्क्षितम् फलम् लभ्यम् लब्धुं शक्यम् नामंस्त अशक्यममंस्तेत्यर्थः। तदा तत्काले अविलम्बेनेत्यर्थः। स्वशरीरस्य मार्दवम् मृदुत्वं सौकुमार्यम् अनपेक्ष्य अविगणय्य महद् दुश्चरम् तपश्चरितुम् साधयितुम् प्रचक्रमे उपचक्रमे ॥ १८ ॥

क्लमं ययौ कन्दुकलीलयापि या
तया मुनीनां चरितं व्यगाह्यत।
ध्रुवं वपुः काञ्चनपद्मनिर्मितं
मृदु प्रकृत्या च ससारमेव च ॥ १६ ॥

अन्वयः—या कन्दुकलीलया अपि क्लमम् ययौ तया मुनीनां चरितम् व्यगाह्यत। ध्रुवं वपुः काञ्चनपद्मनिर्मितम्। प्रकृत्या मृदु च ससारमेव च ॥

संजीवनी—क्लममिति। या देवी कन्दुकलीलया कन्दुकक्रीडयापि क्लमम् ययौ ग्लानिं प्राप तया देव्या मुनीनाम् चरितम् तीव्रं तपः व्यगाह्यत प्रविष्टम्। अत्रोत्प्रेक्ष्यते—ध्रुवम् अस्या वपुः काञ्चनपद्मेन सुवर्णकमलेन निर्मितम् घटितम् अतएव प्रकृत्या पद्मस्वभावेन मृदु च सुकुमारमपि काञ्चनस्वभावेन ससारञ्च कठिनम् एव। तथा च तदुपादानकत्वाद्देव्या वपुषः सुकुमारस्यपि तीव्रतपःक्षमत्व-मित्युत्प्रेक्षार्थः ॥ १६ ॥

शुचौ चतुर्णां ज्वलतां हविर्भुजां
शुचिस्मिता मध्यगता सुमध्यमा।
विजित्य नेत्रप्रतिघातिनीं प्रभा-
मनन्यदृष्टिः सवितारमैक्षत ॥ २० ॥

अन्वयः—शुचौ शुचिस्मिता सुमध्यमा ज्वलतां चतुर्णां हविर्भुजां मध्यगता नेत्रप्रतिघातिनीं प्रभाम् विजित्य अनन्यदृष्टिः सवितारम् ऐक्षत ॥

संजीवनी—शुचाविति। शुचौ ग्रीष्मे शुचिस्मिता विशदमन्दहासा सुमध्यमा पार्वती ज्वलताम् दीप्तिमताम् चतुर्णाम् हविर्भुजाम् अग्नीनाम् मध्यगता सती। नेत्रे प्रतिहन्तीति ताम् नेत्रप्रतिघातिनीम् प्रभाम् सावित्रं तेजो विजित्य न विद्यते ऽन्यत्र दृष्टिर्यस्याः सा अनन्यदृष्टिः सती सवितारम् सूर्यम् ऐक्षत ददर्श। "ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः" इति स्मरणात्। पञ्चाग्निमध्ये तपश्चचारे-त्यर्थः। तत्र सवितैव पञ्चमोऽग्निः "अग्निः सविता सवितैवाग्निः" इति श्रौतलिङ्गात् ॥ २० ॥

तथातितप्तं सवितुर्गभस्तिभि-
र्मुखं तदीयं कमलश्रियं दधौ ।
अपाङ्गयोः केवलमस्य दीर्घयोः
शनैः शनैः श्यामिकया कृतं पदम् ॥ २१ ॥

अन्वयः—सवितुर् गभस्तिभिस् तथा अतितप्तम् तदीयम् मुखं कमलश्रियं दधौ । अस्य दीर्घयोरपाङ्गयोः केवलं शनैः शनैः श्यामिकया पदम् कृतम् ॥

संजीवनी—तथेति । सवितुः सूर्यस्य गभस्तिभिः किरणैस् तथा पूर्वोक्त-प्रकारेण अतितप्तम् सन्तप्तं तस्या इदम् तदीयम् मुखम् कमलश्रियम् कमलस्य शोभाम् दधौ प्राप । यथा रवितापात् कमलं न म्लायति प्रत्युत विकसति तथा तदीयं मुखमासीदिति भावः । किन्तु अस्य मुखस्य दीर्घयोरपाङ्गयोः केवलम् नेत्रान्तयोरेव शनैः शनैः मन्दं मन्दम् श्यामिकया कालिम्ना पदम् स्थानम् कृतम् । तयोः सौकुमार्यादित्यर्थः ॥ २१ ॥

अयाचितोपस्थितमम्बु केवलं
रसात्मकस्योडुपतेश्च रश्मयः ।
बभूव तस्याः किल पारणाविधि-
र्न वृक्षवृत्तिव्यतिरिक्तसाधनः ॥ २२ ॥

अन्वयः—अयाचितोपस्थितम् केवलम् अम्बु, रसात्मकस्य उडुपतेश् च रश्मयः पारणाविधिर् बभूव । किल वृक्षवृत्तिव्यतिरिक्तसाधनो न ॥

संजीवनी—अयाचितेति । अयाचितोपस्थितम् अप्रार्थितोपनतम् केवलम् अम्बु उदकम् रसात्मकस्य अमृतमयस्य उडूनाम् नक्षत्राणां पतिश् चन्द्रस्तस्य रश्मयश्च तस्याः पार्वत्याः पारणाविधिर् अभ्यवहारकर्म बभूव तावन्मात्रसाधनकोऽभूदित्यर्थः। साध्यसाधनयोरभेदेन व्यपदेशः साधनान्तरव्यावृत्त्यर्थः । किल इति प्रसिद्धौ । वृक्षाणाम् या वृत्तिर् जीवनोपायस्तद्व्यतिरिक्तम् साधनम् उपायो यस्य स तथोक्तः पारणाविधिर् न बभूव । वृक्षोऽप्ययाचितोपस्थितेन मघोदकेन इन्दुकिरणैश्च जीवतीति प्रसिद्धम् । अम्बिकापि तावन्मात्रमवालम्बतेत्यर्थः ॥ २२ ॥

निकामतप्ता विविधेन वह्निना
नभश्चरेणेन्धनसम्भृतेन सा ।
तपात्यये वारिभिरुक्षिता नवै-
र्भुवा सहोष्माणममुञ्चदूर्ध्वगम् ॥ २३ ॥

अन्वयः—विविधेन नभश्चरेण इन्धनसम्भृतेन वह्निना निकामतप्ता सा तपात्यये नवैर्वारिभिर् उक्षिता भुवा सह ऊर्ध्वगम् ऊष्माणम् अमुञ्चत् ॥

संजीवनी—निकामेति । विविधेन पञ्चविधेनेत्यर्थः । नभश्चरेण खचरेण आदित्यरूपेणेत्यर्थः ।इन्धनसम्भृतेन काष्ठसमिद्धेन वह्निना निकामम् अत्यन्तम् तप्ता सा अम्बिका तपात्यये ग्रीष्मान्ते प्रावृषीत्यर्थः । नवैर्वारिभिर् उक्षिता सिक्ता सती भुवा पञ्चाग्नितप्तया सह ऊर्ध्वगम् ऊर्ध्वप्रसृतम् उष्माणम् बाष्पम् अमुञ्चत् । "ग्रीष्मोष्मबाष्पमूष्माणम्" इति यादवः ॥ २३ ॥

स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदबिन्दवः ॥ २४ ॥

अन्वयः—प्रथमे उदबिन्दवस् तस्याः पक्ष्मसु क्षणं स्थिताः, ताडिताधराः, पयोधरयोर् उत्सेधे निपातचूर्णिताः, वलीषु स्खलिताः, चिरेण नाभिं प्रपेदिरे ॥

संजीवनी—स्थिता इति । उदकस्य बिन्दव उदबिन्दवः । मन्थोदनेत्यादिना उदकशब्दस्य उदादेशः । प्रथमे उदबिन्दवः प्रथमविशेषणाद् बिन्दूनां विरलत्वं बहुवचनान्नातिविरलत्वञ्च गम्यते । तथा च विरलत्वनाभ्यन्तरगमनयोर्निर्वाहः । तस्याः पार्वत्याः पक्ष्मसु नेत्रलोमसु क्षणम् स्थिताः स्थितिं गताः । स्थिता इत्यनेन पक्ष्मणां सान्द्रत्वं क्षणमिति स्थैर्यञ्च गम्यते । अनन्तरम् ताडितो व्यथितोऽधर ओष्ठो यैस्ते-स्तथोक्ताः । एतेनाधरस्य मार्दवं गम्यते । ततः पयोधरयोः स्तनयोर् उत्सेधे उपरि-भागे निपातेन पतनेन चूर्णिता जर्जरिता कुचकाठिन्यादिति भावः । तदनु वलीषु उदररेखासु स्खलिता निम्नोन्नतत्वादिति भावः । इत्थं चिरेण न तु शीघ्रं प्रति-

न्ववबाहुल्यादिति भावः। नाभिम् प्रपेदिरे प्रविष्टा न तु निर्जग्मुः। एतेन नाभेर् गाम्भीर्यं गम्यते। अत्र प्रतिपदमर्थवत्त्वात् परिकरालङ्कारः ॥ २४ ॥

शिलाशयां तामनिकेतवासिनीं
निरन्तरास्वन्तरवातवृष्टिषु।
व्यलोकयन्नुन्मिषितैस्तडिन्मयै-
र्महातपःसाक्ष्य इव स्थिताः क्षपाः ॥ २५ ॥

अन्वयः—निरन्तरासु अन्तरवातवृष्टिषु अनिकेतवासिनीं शिलाशयां तां तडिन्मयैर् उन्मिषितैर् व्यलोकयन् इव क्षपा महातपःसाक्ष्ये स्थिताः।

संजीवनी—शिलेति। निरन्तरासु नीरन्ध्रासु, अन्तरे मध्ये वातो यासां तादृश्यो या वृष्टयस्तासु अन्तरवातवृष्टिषु। न निकेते गृहे वसतीति अनिकेतवासिनीम्, अनावृतदेशवासिनीमित्यर्थः। शिलायां शेत इति शिलाशयाम् शिलातलशायिनीम्। 'अधिकरणे शेते'रिति अच्प्रत्ययः। ताम् पार्वतीं साक्षाद्द्रष्टा साक्षी। 'साक्षाद्द्रष्टरि संज्ञायाम्' इतीनिप्रत्ययः। तस्य कर्म साक्ष्यम् महातपसः साक्ष्ये स्थिताः क्षपास् तडिन्मयैर् विद्युद्रूपैर् उन्मिषितैर् अवलोकनैर् व्यलोकयन्निव ॥ इवेति चक्षुषा विलोकनमेव उत्प्रेक्ष्यते। साक्ष्यन्तु "आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयम् यमश्च। अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्" इति प्रमाणसिद्धत्वान् नोत्प्रेक्ष्यमित्यनुसन्धेयम् ॥ २५ ॥

निनाय सात्यन्तहिमोत्किरानिलाः
सहस्यरात्रीरुदवासतत्परा।
परस्पराक्रन्दिनि चक्रवाकयोः
पुरो वियुक्ते मिथुने कृपावती ॥ २६ ॥

अन्वयः—सा अत्यन्तहिमोत्किरानिलाः सहस्यरात्रीर् उदवासतत्परा पुरो वियुक्ते परस्पराक्रन्दिनि चक्रवाकयोर् मिथुने कृपावती निनाय ॥

संजीवनी—एवं वर्षासु विहितं तपःप्रकारमुक्त्वा सम्प्रति हेमन्ते तपश्चरणप्रकारमाह—निनायेति। सा पार्वती उत्किरन्ति क्षिपन्तीत्युत्किराः। 'इगुपधज्ञा' इत्यादिना कः। अत्यन्तं हिमानामुत्किरा अनिला यासु ताः सहस्यरात्रीः पौषरात्रीः।

"पौषे तैषसहस्यौ द्वौ" इत्यमरः । उदके वास उदवासः 'पेषंवासवाहनधिषु च' इत्युदादेशः । उदवासे तत्परा आसक्ता तथा परस्परमाक्रन्दिनि अन्योन्यमाक्रोशिनि पुरोऽग्रे वियुक्ते विरहिणि वियोगं प्राप्त इति यावत् । चक्रवाकी च चक्रवाकश्च चक्रवाकौ । तयोश्चक्रवाकयोर्मिथुने द्वन्द्वे कृपावती सती निनाय । दुःखिषु कृपालुत्वं महतां स्वभाव इति चक्रवाकमिथुने कृपा न तु कामितयेति वाच्यानवकाशः । "अप्सु वासस्तु हेमन्ते क्रमशो वर्धयेत्तपः" इति मनुः ॥ २६ ॥

मुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्रशोभिना ।
तुषारवृष्टिक्षतपद्मसम्पदां
सरोजसन्धानमिवाकरोदपाम् ॥ २७ ॥

अन्वयः—सा निशि पद्मसुगन्धिना प्रवेपमानाधरपत्रशोभिना मुखेन तुषारवृष्टिक्षतपद्मसम्पदां अपां सरोजसन्धानं इव अकरोत् ॥

संजीवनी—मुखेनेति । सा पार्वती निशि रात्रौ पद्मवत्सुगन्धिना सुरभिणा । गन्धस्येदित्यादिना इकारः । प्रवेपमानः कम्पमानोऽधर ओष्ठ एव पत्रम् दलं तेन शोभत इति तथोक्तेन मुखेन तुषारवृष्ट्या तुहिनवर्षेण क्षता नाशिताः पद्मसम्पदो यासाम् तासाम् अपाम् सरोजसन्धानम् पद्मसङ्घटनम् अकरोदिव इत्युत्प्रेक्षालङ्कारः । पद्मान्तरन्तु हिमेनोपहन्यते तन्मुखपद्मन्तु न तथेति व्यतिरेकालङ्कारो व्यज्यत इत्युभयोः संकरः ॥ २७ ॥

स्वयंविशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
वदन्त्यपर्णेति च तां पुराविदः ॥ २८ ॥

अन्वयः—स्वयं विशीर्णद्रुमपर्णवृत्तिता तपसः परा काष्ठा हि तया पुनः तद् अपि अपाकीर्णम् अतः पुराविदः प्रियंवदां तां अपर्णा इति वदन्ति ॥

संजीवनी—स्वयमिति । स्वयम् विशीर्णानि स्वतश्च्युतानि द्रुमपर्णानि एव वृत्तिर् जीवनं यस्य तस्य भावस्तत्ता तपसः परा काष्ठा परमोत्कर्षो हि । "काष्ठोत्कर्षे

स्थितौ दिशि" इत्यमरः। तथा देव्या पुनस्तत् पर्णावर्तनम् अपि अपाकीर्णम् अपाकृतम्। अतः पर्णापाकरणाद्धेतोः प्रियं वदतीति प्रियंवदा। 'प्रियवशे वदः खच्' इति खच्प्रत्ययः। 'अरुर्द्विषदजन्तस्य मुम्' इति मुमागमः। ताम् पार्वतीम् पुराविदः पुराणज्ञास्तपःकरणसमये ऽविद्यमानं पर्णभक्षणं यस्याः सा अपर्णा इति वदन्ति। नामान्तरसमुच्चयार्थश्चकारः। स्वयं प्रियंवदा परेषामपि प्रियवादभाजनानि भवन्तीति भावः। अत्रापर्णामित्यपपाठः। इतिशब्दाभिहिते द्वितीयानुपपत्तेः। यथाह वामनः। 'निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य प्रायिकत्वात्' इति ॥ २८ ॥

मृणालिकापेलवमेवमादिभि-
र्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम्।
तपः शरीरैः कठिनैरुपार्जितं
तपस्विनां दूरमधश्चकार सा ॥ २९ ॥

अन्वयः—मृणालिकापेलवं स्वम् अङ्गम् एवमादिभिर् व्रतैर् अहर्निशं ग्लपयन्ती सा पार्वती कठिनैः शरीरैर् उपार्जितं तपस्विनां तपः दूरं अधश्चकार ॥

संजीवनी—मृणालिकेति। मृणालिकापेलवम् पद्मिनीकन्दकोमलम् स्वम् स्वकीयम् अङ्गम् शरीरम् एवम् उक्तप्रकारतोयाग्निमध्यवासव्रतम् आदिर् येषां तैर् व्रतैर् अहश्च निशा च अहर्निशम्। समाहारे द्वन्द्वैकवद्भावः। अत्यन्तसंयोगे द्वितीया। ग्लपयन्ती कर्शयन्ती सा पार्वती कठिनैः क्लेशसहैरित्यर्थः। शरीरैर् उपार्जितम् सम्पादितम् तपस्विनाम् ऋषीणाम् तपो दूरम् अत्यन्तम् अधश्चकार तिरश्चकार अतिशिशय इत्यर्थः। तपस्विभिरप्येवं तपः कर्तुं न शक्यत इति तात्पर्यार्थः ॥ २९ ॥

अथाजिनाषाढधरः प्रगल्भवाग्
ज्वलन्निव ब्रह्ममयेन तेजसा।
विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्धः प्रथमाश्रमो यथा ॥ ३० ॥

अन्वयः—अथ अजिनाषाढधरः प्रगल्भवाग् ब्रह्ममयेन तेजसा ज्वलन् इव कश्चिज् जटिलः तपोवनं विवेश यथा शरीरबद्धः प्रथमाश्रमः ॥

संजीवनी—अथेति । अथ अनन्तरम् अजिनम् कृष्णमृगत्वक् । आषाढः प्रयोजनमस्येति आषाढः पलाशदण्डः । "पलाशो दण्ड आषाढः" इत्यमरः । 'विशाखाषाढादण् मन्थदण्डयोः' इत्यण्प्रत्ययः । तयोर् धरस्तथोक्तः प्रगल्भवाक् प्रौढवचनो ब्रह्ममयेन वैदिकेन तेजसा ब्रह्मवर्चसेनेत्यर्थः । ज्वलन्निव स्थितः । इव-शब्दो निर्धारणार्थः । कश्चिद् अनिर्दिष्टो जटिलो जटावान् ब्रह्मचारीति शेषः । पिच्छादित्वादिलच्प्रत्ययः । शरीरबद्धो बद्धशरीरः शरीरवानित्यर्थः । वाहिताग्न्यादिषु पाठात्साधुः । प्रथमाश्रमो यथा ब्रह्मचर्याश्रम इव । यथाशब्द इवार्थे । तपोवनम् । देव्या इति शेषः । विवेश प्रविष्टवान् ॥ ३० ॥

तमातिथेयी बहुमानपूर्वया
सपर्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥ ३१ ॥

अन्वयः—आतिथेयी पार्वती तं बहुमानपूर्वया सपर्यया प्रत्युदियाय । साम्ये ऽपि निविष्टचेतसां वपुर्विशेषेषु क्रिया अतिगौरवा भवन्ति ॥

संजीवनी—तमिति । अतिथिषु साध्वी आतिथेयी । 'पथ्यतिथि' इत्यादिना ढञ् प्रत्ययः । 'ठिड्ढाणञ्' इत्यादिना ङीप् पार्वती तम् ब्रह्मचारिणम् बहुमानपूर्वया बहुमानः पूर्वो यस्यास्तया गौरवपूर्वयेत्यर्थः सपर्यया अर्चया । "सपर्यार्चार्हणाः" इत्यमरः । प्रत्युदियाय प्रत्युज्जगाम । कथं समानेऽपि तस्यास्तादृशी प्रतिपत्तिरत आह । साम्ये सत्य् अपि निविष्टचेतसाम् स्थिरचित्तानाम् वपुर्विशेषेषु अतिशयितं गौरवं यासु ता अतिगौरवा अतिगौरवसहिताः क्रियाश्चेष्टा भवन्ति प्रवर्तन्त इत्यर्थः । साधवो न साम्याभिनिवेशिन इति भावः ॥ ३१ ॥

विधिप्रयुक्तां परिगृह्य सत्क्रियां
परिश्रमं नाम विनीय च क्षणम् ।
उमां स पश्यन् ऋजुनैव चक्षुषा
प्रचक्रमे वक्तुमनुज्झितक्रमः ॥ ३२ ॥

अन्वयः—सः विधिप्रयुक्तां सत्क्रियां परिगृह्य परिश्रमं क्षणं विनीय नाम, ऋजुना चक्षुषा उमां पश्यन्, अनुज्झितक्रमः सन् वक्तुं प्रचक्रमे ॥

संजीवनी—विधीति । सः ब्रह्मचारी विधिना प्रयुक्ताम् अनुष्ठिताम् सत्क्रियाम् पूजाम् परिगृह्य स्वीकृत्य क्षणं परिश्रमम् विश्रामञ्च विनीय नाम । नामेत्यपरमार्थे । अथ उमाम् ऋजुनैव विलासरहितेनैव चक्षुषा पश्यन्, अनुज्झितक्रमोऽत्यक्तोचितपरिपाटीकः सन् वक्तुं प्रचक्रमे प्रारेभे ॥ ३२ ॥

अपि क्रियार्थं सुलभं समित्कुशं
जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्तसे
शरीरमाद्यं खलु धर्मसाधनम् ॥ ३३ ॥

अन्वयः—क्रियार्थं समित्कुशं सुलभं अपि, ते स्नानविधिक्षमाणि जलानि अपि, स्वशक्त्या तपसि प्रवर्तसे अपि । शरीरं आद्यं धर्मसाधनं खलु ॥

संजीवनी—अपीति । अपिशब्दः प्रश्ने । क्रियार्थम् होमादिकर्मानुष्ठानार्थं समिधश्च कुशाश्च समित्कुशम् । 'जातिरप्राणिनाम्' इति द्वन्द्वैकवद्भावः । सुलभमपि ? सुलभं कच्चित् ? जलानि ते तव स्नानविधिक्षमाणि स्नानक्रियायोग्यानि अपि कच्चित् ? किञ्च स्वशक्त्या निजसामर्थ्यानुसारेण तपसि प्रवर्तसे अपि ? देहमपीडयित्वा तपश्चरसि कच्चित् ? इत्यर्थः । युक्तञ्च नामैतत् । खलु यस्मात्, शरीरम् आद्यम् धर्मसाधनम् । धर्मस्तु कायेन वाचा बुद्ध्या धनादिना च बहुभिः साध्यते तेषु च वपुरेव मुख्यं साधनम् । सति देहे धर्मार्थकाममोक्षलक्षणाश्चतुर्वर्गाः साध्यन्ते । अतएव "सततमात्मानमेव गोपायीत" इति श्रुतिः ॥ ३३ ॥

अपि त्वदावर्जितवारिसम्भृतं
प्रवालमासामनुबन्धि वीरुधाम् ।
चिरोज्झितालक्तकपाटलेन ते
तुलां यदारोहति दन्तवाससा ॥ ३४ ॥

अन्वयः—त्वदावर्जितवारिसम्भृतम् आसां वीरुधाम् प्रवालम् अनुबन्धि अपि,

यच् चिरोज्झितालक्तकपाटलेन ते दन्तवाससा तुलां आरोहति ॥

संजीवनी—अपि त्वदेति । त्वया आवर्जितेन सिक्तेन वारिणा जन्मितम् जनितम् आसाम् वीरुधाम् लतानाम् प्रवालम् पल्लवम् अनुबन्ध्यपि ? अनुस्यूतं किं ? यत् प्रवालं चिरोज्झितश्चिरकालत्यक्तो लाक्षारागो येन तत्तथापि पाटलं स्वभावरक्तमित्यर्थः । तेन चिरोज्झितालक्तकपाटलेन ते तव दन्तवाससा अधरेण । "ओष्ठाधरौ तु रदनच्छदौ दशनवाससी" इत्यमरः । तुलाम् साम्यम् आरोहति गच्छतीत्यर्थः । अत्र तुलाशब्दस्य सादृश्यवाचित्वात्तद्योगेऽपि 'तुल्यार्थैरतुलोपमाभ्याम्' इति न तृतीयाप्रतिषेधस्तत्र सूत्रे सदृशवाचिन एव ग्रहणादिति ॥ ३४ ॥

अपि प्रसन्नं हरिणेषु ते मनः
करस्थदर्भप्रणयापहारिषु ।
य उत्पलाक्षि ! प्रचलैर्विलोचनै-
स्तवाक्षिसादृश्यमिव प्रयुञ्जते ॥ ३५ ॥

अन्वयः—करस्थदर्भप्रणयापहारिषु हरिणेषु ते मनः प्रसन्नं अपि । हे उत्पलाक्षि ! ये प्रचलैर् विलोचनैस्तव अक्षिसादृश्यं प्रयुञ्जते इव ॥

संजीवनी—अपीति । करस्थान् दर्भान् प्रणयेन स्नेहेन अपहरन्ति इति ते तथोक्तेषु सापराधेष्विति भावः । अपराधिष्विति पाठे दर्भाणां प्रणयेन प्रार्थनया अपराधिषु हरिणेषु विषये ते मनः प्रसन्नमपि न क्षुभितं किं ? सापराधेष्वपि न कोपितव्यं तपस्विभिरिति भावः । हे उत्पलाक्षि ये हरिणाः प्रचलैश्चञ्चलैर् विलोचनैर् नेत्रैस्तव अक्षिसादृश्यम् प्रयुञ्जते इव अभिनयन्तीव । प्रसन्नत्वाद् मृगनेत्राणि त्वन्नयनैः साम्यमुपयान्तीति भावः । उत्पलक्षेपचलैरिति पाठान्तरे उत्पलकम्पचलैः । "भावानयने द्रव्यानयनम्" इति न्यायेन क्षिप्यमाणोत्पलचलैरित्यर्थः ॥ ३५ ॥

यदुच्यते पार्वति ! पापवृत्तये
न रूपमित्यव्यभिचारि तद्वचः ।
तथाहि ते शीलमुदारदर्शने !
तपस्विनामप्युपदेशतां गतम् ॥ ३६ ॥

अन्वयः—पार्वति रूपं पापवृत्तये न इति यद् उच्यते तद् वचो ऽव्यभिचारि। तथाहि उदारदर्शने! ते शीलं तपस्विनाम् अपि उपदेशतां गतम् ॥ ३६ ॥

संजीवनी—यदिति। हे पार्वति! रूपम् सौम्याकृतिः पापवृत्तये पापाचरणाय न भवतीति यदुच्यते लोकैरिति शेषः। तद्वचो न व्यभिचरति न स्खलतीति अव्यभिचारि सत्यम्। "यत्राकृतिस्तत्र गुणाः" "न सुरूपाः पापसमाचारा भवन्ति" इत्यादयो लोकवादा न विसंवादमासादयन्तीत्यर्थः। किमिति ज्ञायते तथाहि हे उदारदर्शने। आयताक्षि! सुरूपे इत्यर्थः। अथवा उन्नतज्ञाने। विवेकवतीत्यर्थः। ते तव शीलम् सद्वृत्तं, "शीलं स्वभावे सद्वृत्ते" इत्यमरः। तपस्विनामपि उपदिश्यते ऽनेनेत्युपदेशः प्रवर्तकं प्रमाणं तत्ताम् उपदेशताम् गतम् प्राप्तम्। मुनयोऽपि त्वां वीक्ष्य स्ववृत्ते प्रवर्तन्त इति भावः ॥ ३६ ॥

विकीर्णसप्तर्षिबलिप्रहासिभि-
स्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः।
यथा त्वदीयैश्चरितैरनाविलै-
र्महीधरः पावित एष सान्वयः ॥ ३७ ॥

अन्वयः—एष महीधरो विकीर्णसप्तर्षिबलिप्रहासिभिर् दिवश्च्युतैर् गाङ्गैः सलिलैस्तथा न यथा त्वदीयैर् अनाविलैश्चरितैः सान्वयः पावितः ॥

संजीवनी—विकीर्णेति। एष महीधरो हिमवान् सप्त च ते ऋषयश्च सप्तर्षयः। 'दिक्संख्ये संज्ञायाम्' इति समासः। विकीर्णैः पर्यस्तैः सप्तर्षीणाम् सम्बन्धिभिर् बलिभिः पुष्पोपहारैः प्रहसन्ति ये तथोक्तैर् दिवोऽन्तरिक्षाच् च्युतैर् गाङ्गैः सलिलैस्तथा न पावितः। अनाविलैः अकलुषैस्त्वदीयैश्चरितैर् यथा सान्वयः सपुत्रपौत्रः पावितः पवित्रीकृतः ॥ ३७ ॥

अनेन धर्मः सविशेषमद्य मे
त्रिवर्गसारः प्रतिभाति भाविनि।
त्वया मनोनिर्विषयार्थकामया
यदेक एव प्रतिगृह्य सेव्यते ॥ ३८ ॥

अन्वयः—भाविनि ! अनेन धर्मस्त्रिवर्गसार इति सविशेषं मेऽद्य प्रतिभाति यत् मनोनिर्विषयार्थकामया त्वया एक एव प्रतिगृह्य सेव्यते ॥

संजीवनी—अनेनेति । हे भाविनि ! प्रशस्ताभिप्राये ! अनेन कारणेन धर्मः सविशेषम् सातिशयम् अद्य मे । त्रयाणां धर्मकामार्थानां वर्गस्त्रिवर्गः । "त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः" इत्यमरः । तत्र सारः श्रेष्ठः प्रतिभाति । यद् यस्मात् कारणान् मनसो निर्विषयौ अर्थकामौ यस्यास्तया त्वया एको धर्म एव प्रतिगृह्य स्वीकृत्य सेव्यते । यत्त्वया अर्थकामौ विहाय धर्म एवावलम्बितोऽतः सर्वेषां नः स श्रेयानिति प्रतिपद्यत इत्यर्थः ॥ ३८ ॥

प्रयुक्तसत्कारविशेषमात्मना
न मां परं सम्प्रतिपत्तुमर्हसि ।
यतः सतां सन्नतगात्रि ! सङ्गतं
मनीषिभिः साप्तपदीनमुच्यते ॥ ३९ ॥

अन्वयः—आत्मना प्रयुक्तसत्कारविशेषं मां परं संप्रतिपत्तुं न अर्हसि । सन्नतगात्रि ! यतः सतां सङ्गतं मनीषिभिः साप्तपदीनम् उच्यते ॥

संजीवनी—प्रयुक्तेति । आत्मना त्वया प्रयुक्तः कृतः सत्कारविशेषः पूजातिशयो यस्य तम् माम् परम् सम्प्रतिपत्तुम् अवगन्तुम् नार्हसि । हे सन्नतगात्रि ! सन्नताङ्गि ! 'अङ्गगात्रकण्ठेभ्यः' इति वक्तव्यात् ङीप् । यतः कारणान् मनस ईषिभिर मनीषिभिर् विद्वद्भिः । शकन्ध्वादित्वात्साधुः । सतां सङ्गतं सख्यं सप्तभिः पदैरापद्यते इति साप्तपदीनम् सप्तपदोच्चारणसाध्यम् उच्यते । तच्चावयोस्त्वत्कृतसत्कारप्रयोगादेव सिद्धमित्यर्थः । 'साप्तपदीनं सख्यम्' इति निपातनात्साधु ॥ ३९ ॥

अतोऽत्र किञ्चिद्भवतीं बहुक्षमां
द्विजातिभावादुपपन्नचापलः ।
अयं जनः प्रष्टुमनास्तपोधने !
न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥ ४० ॥

अन्वयः—तपोधने ! अतोऽत्र बहुक्षमां भवतीं द्विजातिभावाद् उपपन्नचापलोऽयम् जनः किञ्चित् प्रष्टुमनाः । रहस्यं न चेत् प्रतिवक्तुम् अर्हसि ।

संजीवनी—अत इति । हे तपोधने ! अतः सख्याद्धेतोर अत्र बहुक्षमाम् बहूक्तिसहां यद्वा क्षमावतीम् भवतीम् त्वाम् द्विजातिभावाद् ब्राह्मणत्वाद् उपपन्नचापलः सुलभधाष्ट्र्योऽयम् जनः स्वयमित्यर्थः । किञ्चित् प्रष्टुं मनो यस्य सः प्रष्टुमनाः प्रष्टुकामः । 'तुम्काममनसोरपि' इति मकारलोपः । रहसि भवम् रहस्यम् गोप्यम् न चेत् प्रतिवक्तुमर्हसि ॥ ४० ॥

कुले प्रसूतिः प्रथमस्य वेधस-
स्त्रिलोकसौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यसुखं नवं वय-
स्तपःफलं स्यात् किमतः परं वद ॥ ४१ ॥

अन्वयः—प्रथमस्य वेधसः कुले प्रसूतिः । वपुस्त्रिलोकसौन्दर्यम् उदितं इव । वयो नवम् । ऐश्वर्यसुखं अमृग्यम् । अतः परं किं तपःफलं स्यात् । वद ॥

संजीवनी—प्रष्टव्यमाह—कुल इति । प्रथमस्य वेधसो हिरण्यगर्भस्य कुले अन्वये प्रसूतिर् उत्पत्तिः । "यज्ञार्थं हि मया सृष्टो हिमवानचलेश्वरः" इति ब्रह्मपुराणवचनात् । वपुः शरीरं त्रयाणां लोकानां सौन्दर्यमिव उदितम् एकत्र समाहृतम् । ऐश्वर्यसुखम् सम्पत्सुखम् अमृग्यम् अन्वेषणीयं न भवति किन्तु सिद्ध-मेवेत्यर्थः । वयो नवम् यौवनमित्यर्थः । अतः परम् अतोऽन्यत् किं तपःफलं स्यात् ? वद । अस्ति चेदिति शेषः । न किञ्चिदस्तीत्यर्थः ॥ ४१ ॥

भवत्यनिष्टादपि नाम दुःसहा-
न्मनस्विनीनां प्रतिपत्तिरीदृशी ।
विचारमार्गप्रहितेन चेतसा
न दृश्यते तच्च कृशोदरि ! त्वयि ॥ ४२ ॥

अन्वयः—दुःसहाद् अनिष्टान् मनस्विनीनाम् ईदृशी प्रतिपत्तिर् भवति नाम । विचारमार्गप्रहितेन चेतसा कृशोदरि त्वयि तन् न दृश्यते ॥

संजीवनी—भवतीति । दुःसहात् सोढुमशक्याद् अनिष्टाद् भर्त्रादिकृतादपि मनस्विनीनाम् धीरस्त्रीणाम् ईदृशी तपश्चरणलक्षणा प्रतिपत्तिः प्रवृत्तिः । "प्रतिपत्तिस्तु गौरवे प्राप्तौ प्रवृत्तौ प्रागल्भ्ये" इति केशवः । भवति नाम । नामेति सम्भावनायाम् ।

विचारमार्गप्रहितेन चेतसा चिन्तेन तद् अनिष्टम च हे कृशोदरि ! त्वयि न दृश्यते। विचार्यमाणे तदपि नास्ति असम्भावितत्वादित्यर्थः ॥ ४२ ॥

अलभ्यशोकाभिभवेयमाकृति-
र्विमानना सुभ्रु ! कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं
प्रसारयेत् पन्नगरत्नसूचये ॥ ४३ ॥

अन्वयः—सुभ्रु ! इयम् आकृतिर् अलभ्यशोकाभिभवा पितुर् गृहे विमानना कुतः ? तव कश्चन पराभिमर्शो न अस्ति । पन्नगरत्नसूचये करं कः प्रसारयेत् ॥

संजीवनी—अनिष्टाभावमेव प्रपञ्चयति—अलभ्येति । हे सुभ्रु ! इयं त्वदीया आकृतिर् मूर्तिर् अलभ्यो लब्धुमनर्हः शोकेन भर्त्राद्यवमानजेन दुःखेन अभिभवस्तिरस्कारो यस्याः सा तथोक्ता । दृश्यत इति शेषः । असम्भावितश्चायमर्थ इत्याह । पितुर्गृहे विमानना अवमानः कुतः । न सम्भाव्यत एवेत्यर्थः । न चाप्यन्यस्माद्भवीत्याह । पराभिमर्शः परधर्षणन्तु तव नास्ति । पन्नगरत्नसूचये फणिशिरोमणिशलाकां गृहीतुमित्यर्थः । 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति चतुर्थी । करम् हस्तम् कः प्रसारयेत् ? सुभ्रु ! इत्यत्र भ्रूशब्दस्योवङ्स्थानीयत्वात् 'नेयङुवङ्स्थानावस्त्री' इति नदीसंज्ञाप्रतिषेधात् 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वत्वं नास्ति । तेन ह्रस्वः प्रामादिक इति केचित् । अन्ये तु 'अप्राणिजातेश्चारज्ज्वादीनाम्' इत्यत्र 'अलाबूः, कर्कन्धूरित्यूकारान्तादप्युङ्प्रत्ययमुदाजहार भाष्यकारः । एतस्मादेव ज्ञापकात् क्वचिदूकारान्तस्याप्यूङन्तत्वान्नदीत्वे ह्रस्वमित्याहुः । अतएवाह वामनः । ऊकारादप्यूङ्प्रकृतेः' इति । सुभ्रूः कुतस्तातगृहेऽवमाननमिति पाठान्तरकरणन्तु साध्वसमेव उक्तोपपत्तिसम्भवात् । अन्यत्रापि "सुभ्रु ! त्वं कुपितेत्यपास्तमशनं त्यक्ता कथा योषिताम्" इत्यादिप्रयोगदर्शनात् । वंशस्थवृत्ते पादादौ जगणभङ्गप्रसङ्गाद्वैरयलं गोष्ठीभिः ॥४३॥

किमित्यपास्याभरणानि यौवने
धृतं त्वया वार्धकशोभि वल्कलम् ।
वद प्रदोषे स्फुटचन्द्रतारका
विभावरी यद्यरुणाय कल्पते ॥ ४४ ॥

अन्वयः—किमिति यौवने त्वया आभरणानि अपास्य वार्धकशोभि वल्कलं धृतम्। स्फुटचन्द्रतारका विभावरी प्रदोषे यदि अरुणाय कल्पते। वद॥

संजीवनी—किमिति। हे गौरि! किमिति? केन हेतुना यौवने त्वया आभरणान्यपास्य विहाय। वृद्धस्य भावो वार्धकम्। मनोज्ञादित्वाद् वुञ्प्रत्ययः। "वार्धकं वृद्धसङ्घाते वृद्धत्वे वृद्धकर्मणि" इति विश्वः। तत्र शोभत इति वार्धकशोभि वल्कलं धृतम्। प्रदोषे रजनीमुखे स्फुटाः प्रकटाश्चन्द्रस्तारकाश्च यस्याः सा स्फुटचन्द्रतारका विभावरी रात्रिर् अरुणाय सूर्याय कल्पते यदि? अरुणं गन्तुं कल्पते किम्? वद ब्रूहि। क्रियार्थोपपदस्येत्यादिना चतुर्थी। दीप्यमानशशाङ्कतारके प्रदोषे यद्यरुण उदेति ततो विभूषणापहारेण तव वल्कलधारणं सङ्गच्छत इति भावः॥ ४४॥

दिवं यदि प्रार्थयसे वृथा श्रमः
पितुः प्रदेशास्तव देवभूमयः।
अथोपयन्तारमलं समाधिना
न रत्नमन्विष्यति मृग्यते हि तत्॥ ४५॥

अन्वयः—दिवं यदि प्रार्थयसे श्रमो वृथा। तव पितुः प्रदेशा देवभूमयः। अथ उपयन्तारं, समाधिना अलम्। रत्नं हि न अन्विष्यति तद् मृग्यते॥

संजीवनी—तपः प्रयोजनं निराकर्तुमाह—दिवमिति। दिवम् स्वर्गम् प्रार्थयसे कामयसे यदि तर्हि श्रमस्तपश्चरणप्रयासो वृथा निष्फलः। यदि स्वर्गार्थं तप्यसे ततः श्रमं मा कार्षीः। कुतः? तव पितुर् हिमवतः प्रदेशा देवभूमयः स्वर्गपदार्थास्तत्रत्या इत्यर्थः। अथ उपयन्तारम् वरं प्रार्थयसे तर्हि समाधिना तपसा अलम् न कर्तव्य इत्यर्थः। निषेध्यस्य निषेधं प्रति करणत्वात्तृतीया। तथाहि रत्नम् कर्तृ नान्विष्यति न मृगयते ग्रहीतारमिति शेषः। किन्तु तद्रत्नं मृग्यते ग्रहीतृभिरिति शेषः। न हि वरार्थं त्वया तपसि वर्तितव्यम् किन्तु तेनैव त्वदर्थमिति भावः॥ ४५॥

निवेदितं निश्वसितेन सोष्मणा
मनस्तु मे संशयमेव गाहते।
न दृश्यते प्रार्थयितव्य एव ते
भविष्यति प्रार्थितदुर्लभः कथम् ॥ ४६ ॥

अन्वयः—सोष्मणा निश्वसितेन निवेदितम्। मे मनः संशयं एव गाहते। ते प्रार्थयितव्य एव न दृश्यते। प्रार्थितदुर्लभः कथं भविष्यति ॥

संजीवनी—वरवाचकाक्षरश्रवणानन्तरमेव दव्या उष्णोच्छ्वासमालक्ष्य प्रश्नेषु च प्रत्युत्तरमनुपलक्ष्य स्वयमेव शङ्कयाह—निवेदितमिति। सोष्मणा निश्वसितेन निश्वासवायुना निवेदितम्। चिन्तानुभावेन उष्णोच्छ्वासेन ते वरार्थित्वं सूचितमित्यर्थः। तर्हि किं प्रश्नव्यसनेनेत्याह मन इति। मनस्तु तथापि मे संशयमेव गाहते प्राप्नोति। कुतस्ते तव 'कृत्यानां कर्तरि वा' इति षष्ठी। प्रार्थयितव्यः प्रार्थयितुमर्ह एव न दृश्यते। प्रार्थितदुर्लभः प्रार्थितो दुर्लभः स कथम् भविष्यति। नास्त्येवेत्यर्थः ॥ ४६ ॥

अहो स्थिरः कोऽपि तवेप्सितो युवा
चिराय कर्णोत्पलशून्यतां गते।
उपेक्षते यः श्लथलम्बिनीर्जटाः
कपोलदेशे कलमाग्रपिङ्गलाः ॥ ४७ ॥

अन्वयः—अहो तव ईप्सितो युवा कोऽपि स्थिरो यः चिराय कर्णोत्पलशून्यतां गते कपोलदेशे श्लथलम्बिनीः कलमाग्रपिङ्गला जटा उपेक्षते ॥

संजीवनी—अथ पतिप्रार्थनामेव सिद्धवत् कृत्वाह। अहो इति। अहो चित्रम् तव ईप्सितश्चाप्तुमिष्टो युवा कोऽपि स्थिरः कठिनो वर्तत इति शेषः। कुतः? यो युवा चिराय चिरात्प्रभृति कर्णोत्पलशून्यतां गते प्राप्ते कपोलदेशे गण्डस्थले श्लथाः शिथिलबन्धना अतएव लम्बिन्यस्ताः श्लथलम्बिनीः कलमाः शालिविशेषास्तेषाम् अग्राणि तद्वत् पिङ्गला जटा उपेक्षते। यस्त्वामीदृशीं दृष्ट्वा न व्यथते स नूनं वज्रहृदय इत्यर्थः ॥ ४७ ॥

मुनिव्रतैस्त्वामतिमात्रकर्शितां
दिवाकराप्लुष्टविभूषणास्पदाम् ।
शशाङ्कलेखामिव पश्यतो दिवा
सचेतसः कस्य मनो न दूयते ॥ ४८ ॥

अन्वयः—मुनिव्रतैर् अतिमात्रकर्शितां दिवाकराप्लुष्टविभूषणास्पदां दिवा शशाङ्कलेखाम् इव त्वां पश्यतः कस्य सचेतसो मनो न दूयते ? ॥ ४८ ॥

संजीवनी–मुनिव्रतैरिति । मुनिव्रतैश्चान्द्रायणादिभिर् अतिमात्रम् अत्यन्तम् कर्शिताम् कृशीकृताम् । दिवाकरेण सूर्येण आप्लुष्टानि दग्धानि वातातपसंस्पर्शान् मृदुत्वाच्च श्यामीकृतानि विभूषणास्पदानि विभूषणस्थानानि यस्यास्तां तथोक्ताम् । अतएव दिवा अहनि शशाङ्कलेखामिव स्थितां तां पश्यतः सचेतसो जीवतः कस्य पुंसो मनो न दूयते न परितप्यते । अपि तु सर्वस्यैवेत्यर्थः ॥ ४८ ॥

अवैमि सौभाग्यमदेन वञ्चितं
तव प्रियं यश्चतुरावलोकिनः ।
करोति लक्ष्यं चिरमस्य चक्षुषो
न वक्त्रमात्मीयमरालपक्ष्मणः ॥ ४९ ॥

अन्वयः—तव प्रियं सौभाग्यमदेन वञ्चितं अवैमि यश्चतुरावलोकिनोऽरालपक्ष्मणोऽस्य तव चक्षुष आत्मीयं वक्त्रं चिरं लक्ष्यं न करोति ॥ ४९ ॥

संजीवनी—अवैमीति । तव प्रियम् वल्लभम् सौभाग्यमदेन सौन्दर्यगर्वेण कर्त्रा वञ्चितम् विप्रलब्धम् अवैमि वेद्मि यः प्रियश्चतुरं मधुरम् अवलोकत इति चतुरावलोकिनोऽरालपक्ष्मणः कुटिलरोम्णः "अरालं वृजिनं जिह्मम्" इत्यमरः । अस्य त्वदीयस्य चक्षुष आत्मीयम् वक्त्रम् मुखम् चिरम् लक्ष्यम् विषयम् न करोति दृष्टिपथं न गच्छतीत्यर्थः । तदयं गर्वेण हतो निष्फलात्मलाभो जात इति भावः ॥ ४९ ॥

कियच्चिरं श्राम्यसि गौरि ! विद्यते
ममापि पूर्वाश्रमसञ्चितं तपः ।
तदर्धभागेन लभस्व काङ्क्षितं
वरं तमिच्छामि च साधु वेदितुम् ॥ ५० ॥

अन्वयः—गौरि ! कियत् चिरं श्राम्यसि । मम अपि पूर्वाश्रमसञ्चितं तपो विद्यते । तदर्धभागेन काङ्क्षितं लभस्व । तं वरं साधु वेदितुं इच्छामि ॥

संजीवनी—कियदिति । हे गौरि ! कियत् किं प्रमाणकं किमवधिकमित्यर्थः । चिरम् श्राम्यसि तपस्यसि । अत्यन्तसंयोगे द्वितीया । ममापि पूर्वाश्रमः प्रथमाश्रमो ब्रह्मचर्याश्रमस् तत्र सञ्चितम् सम्पादितम् तपो विद्यते । अर्धश्चासौ भागश्च तेन तस्य तपसोऽर्धभागेन एकदेशेन काङ्क्षितम् इष्टम् वरम् उपयन्तारम् लभस्व । तम् वरम् साधु सम्यग् वेदितुम ज्ञातुम इच्छामि । यद्यसौ योग्यो भवति तदा ममापि सम्मतिरिति भावः ॥ ५० ॥

इति प्रविश्याभिहिता द्विजन्मना
मनोगतं सा न शशाक शंसितुम् ।
अथो वयस्यां परिपार्श्ववर्तिनीं
विवर्तितानञ्जननेत्रमैक्षत ॥ ५१ ॥

अन्वयः—इति द्विजन्मना प्रविश्य अभिहिता सा मनोगतं शंसितुं न शशाक । अथो परिपार्श्ववर्तिनीं वयस्यां विवर्तितानञ्जननेत्रं ऐक्षत ॥

संजीवनी—इतीति । इति इत्थम् द्विजन्मना द्विजेन प्रविश्य अन्तर्गत्वा आप्तवद्रहस्यमुद्घाट्येत्यर्थः । अभिहिता उक्ता सा पार्वती मनोगतम् हृदिस्थम् वरम् शंसितुम् वक्तुं न शशाक समर्था नाभूत् लज्जयेति शेषः । अथो अनन्तरम् परिपार्श्ववर्तिनीं वयस्याम् सखीम् विवर्तितम् विचालितम् अनञ्जनम् व्रतवशाद्वर्जितकज्जलं नेत्रम् यस्मिन् कर्मणि तत्तथा ऐक्षत नेत्रसंज्ञयैव प्रत्युत्तरं वाचयाञ्चकारेत्यर्थः ॥ ५१ ॥

सखी तदीया तमुवाच वर्णिनं
निबोध साधो ! तव चेत् कुतूहलम् ।
यदर्थमम्भोजमिवोष्णवारणं
कृतं तपःसाधनमेतया वपुः ॥ ५२ ॥

अन्वयः—तदीया सखी तं वर्णिनं उवाच हे साधो ! तव कुतूहलं चेत् निबोध, यदर्थं एतया अम्भोजं उष्णवारणं इव वपुः तपःसाधनं कृतम् ॥

संजीवनी—सखीति। तस्याः पार्वत्या इयम् तदीया सखी वयस्या तम्। 'वर्णः प्रशस्तः' इति क्षीरस्वामी। सोऽस्यास्तीति वर्णिनम् ब्रह्मचारिणम्। 'वर्णाद्ब्रह्मचारिणि' इतीनिप्रत्ययः। उवाच ब्रूतेस्म। किमिति हे साधो! विद्वन्! तव कुतूहलञ्चेत्। श्रोतुमस्तीति शेषः। तर्हि निबोध अवगच्छ आकर्णयेत्यर्थः। 'बुध अवगमने' इति धातोर्भौवादिकाल्लोट्। श्रोतव्यं किन्तदाह—यस्मै लाभाय इदम् यदर्थम् अर्थेन सह नित्यसमासः सर्वलिङ्गता चेति वक्तव्यमिति वार्तिकं नियमात् क्रियाविशेषणम्। एतया पार्वत्या अम्भोजम् पद्मम् उष्णवारणम् आतपत्रमिव वपुः शरीरम् तपःसाधनम् कृतम्। तपःप्रवृत्तिकारणमुच्यते श्रूयतामित्यर्थः॥ ५२॥

इयं महेन्द्रप्रभृतीनधिश्रिय-
श्चतुर्दिगीशानवमत्य मानिनी।
अरूपहार्यं मदनस्य निग्रहात्
पिनाकपाणिं पतिमाप्तुमिच्छति॥ ५३॥

अन्वयः—मानिनी इयं अधिश्रियो महेन्द्रप्रभृतीन् चतुर्दिगीशान् अवमत्य मदनस्य निग्रहाद् अरूपहार्यं पिनाकपाणिं पतिं आप्तुम् इच्छति॥ ५३॥

संजीवनी—"दृङ्मनःसङ्गसङ्कल्पो जागरः कृशताऽरतिः। ह्रीत्यागोन्मादमूर्च्छान्ता इति स्मरदशा दश" इति। तत्रास्याः काश्चिद्दशाः क्रमम नादृत्यैव योजयति। इयमित्यादिभिः षड्भिः श्लोकैः—इयमिति। मानिनी इन्द्रादिप्रभृतीरातिशय वर्तितव्यमित्यभिमानवती इयम् पार्वती अधिश्रियोऽधिकैश्वर्यान् महेन्द्रप्रभृतीन इन्द्रादीन् चतसृणाम् दिशामीशान् इन्द्रवरुणयमकुबेरान्। ताद्धितार्थेत्यादिना उत्तरपदसमासः। अवमत्य अवधूय मदनस्य निग्रहात् निबर्हणाद्धेतोः। अकामुकत्वादित्यर्थः। रूपेण सौन्दर्येण हार्यो वशीकरणीयो न भवतीति अरूपहार्यम् पिनाकः पाणौ यस्य तम् पिनाकपाणिम् हरम्। प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति साधु। पतिम् भर्तारम् आप्तुमिच्छति। एतेन सङ्कल्पावस्था सूचिता॥ ५३॥

असह्यहुङ्कारनिवर्तितः पुरा
पुरारिमप्राप्तमुखः शिलीमुखः ।
इमां हृदि व्यायतपातमक्षिणो-
द्विशीर्णमूर्तेरपि पुष्पधन्वनः ॥ ५४ ॥

अन्वयः—पुरा असह्यहुङ्कारनिवर्तितः पुरारिं अप्राप्तमुखो विशीर्णमूर्तेर् अपि पुष्पधन्वनः शिलीमुख इमां हृदि व्यायतपातं अक्षिणोत् ॥

संजीवनी—असह्येति । पुरा पूर्वम् असह्येन सोढुमशक्येन हुङ्कारेण रौद्रेण निवर्तितोऽतएव पुरारिम् हरम् अप्राप्तमुखोऽप्राप्तफलो विशीर्णमूर्तेर् नष्टशरीरस्य अपि पुष्पधन्वनः कामस्य शिलीमुखो बाण इमाम् पार्वतीम् हृदि व्यायतः सुदूरावगाढ इति यावत् तादृक् पातः प्रहारो यस्मिन् कर्मणि तत्तथा अक्षिणोत् अकर्षत् । दग्धदेहस्यापि मार्गणो लग्नः, "मृदुः सर्वत्र बाध्यते" इति भावः । अनेन विप्रलम्भवती शैलसुतापि भावमित्यत्रोक्तं चक्षुःप्रीतिमनःसङ्गाख्यमवस्थाद्वयमनन्तरावस्थोपयोगितया अनूद्य कार्श्यावस्था सूचिता ॥ ५४ ॥

तदा प्रभृत्युन्मदना पितुर्गृहे
ललाटिकाचन्दनधूसरालका ।
न जातु बाला लभते स्म निर्वृतिं
तुषारसङ्घातशिलातलेष्वपि ॥ ५५ ॥

अन्वयः—तदा प्रभृति इयं पितुर् गृहे उन्मदना ललाटिकाचन्दनधूसरालका बाला तुषारसङ्घातशिलातलेषु अपि, जातु निर्वृतिं न लभते स्म ॥

संजीवनी—तदेति छेदः । तदा प्रभृति तत आरभ्येत्यर्थः सप्तम्यर्थस्यापि दाप्रत्ययस्य पञ्चम्यर्थे लक्षणा प्रभृतियोगे पञ्चमीनियमात् । पितृगृहे उन्मदना उत्कटमन्मथा, ललाटस्यालङ्कारो ललाटिका तिलकः । 'कर्णललाटात् कन् अलङ्कारे' इति कन्प्रत्ययः । तस्याश् चन्दनेन धूसरा धूसरवर्णा अलकाश् चूर्णकुन्तला यस्याः सा तथोक्ता बाला पार्वती जातु कदाचिदपि तुषारसङ्घातास् तुषारघनास्त एव शिलास् तासाम् तलेषु उपरिभागेष्वपि निर्वृतिम् सुखम् न लभते स्म । एतेनारत्यपरसंज्ञा विषयविद्वेषावस्था द्वादशावस्थापक्षे संज्वरश्च व्यज्यते ॥ ५५ ॥

उपात्तवर्णे चरिते पिनाकिनः
सबाष्पकण्ठस्खलितैः पदैरियम् ।
अनेकशः किन्नरराजकन्यका
वनान्तसङ्गीतसखीररोदयत् ॥ ५६ ॥

अन्वयः—पिनाकिनश्चरिते उपात्तवर्णे सबाष्पकण्ठस्खलितैः पदैर् वनान्तसङ्गीतसखीः किन्नरराजकन्यका अनेकशोऽरोदयत् ॥

संजीवनी—उपात्तेति । पिनाकिनः शम्भोश्चरिते त्रिपुरविजयादिचेष्टिते उपात्तवर्णे प्रारब्धगीतक्रमे । "गीतक्रमे स्तुतौ वेदे वर्णशब्दः प्रयुज्यते" इति हलायुधः । सबाष्पे गद्गदे कण्ठे स्खलितैर् विशीर्णैः पदैः सुप्तिङन्तरूपैः करणैः । वनान्ते सङ्गीतेन निमित्तेन सखीर् वयस्याः किन्नरराजकन्यका अनेकशो बहुशोऽरोदयत्, अश्रुमोक्षमकारयत् । हरचरितगानजनितमदनवेदनामेनां वीक्ष्य किन्नर्योऽपि रुरुदुरिति भावः । अत्र वर्णस्खलनलक्षणकार्योक्त्या पुनःपुनस्तत्कारणीभूतमूर्च्छावस्थाप्रादुर्भावो व्यज्यते । अन्यथा सखीरोदनानुपपत्तेरिति । द्वादशावस्थापक्षे तु प्रलापावस्था च व्यज्यते । 'प्रलापो गुणकीर्त्तनम्' इति आलङ्कारिकाः ॥ ५६ ॥

त्रिभागशेषासु निशासु च क्षणं
निमील्य नेत्रे सहसा व्यबुध्यत ।
क नीलकण्ठ ! व्रजसीत्यलक्ष्यवा-
गसत्यकण्ठार्पितबाहुबन्धना ॥ ५७ ॥

अन्वयः—त्रिभागशेषासु निशासु च क्षणं नेत्रे निमील्य सहसा नीलकण्ठ ! क व्रजसि इति अलक्ष्यवाग असत्यकण्ठार्पितबाहुबन्धना व्यबुध्यत ॥

संजीवनी—त्रिभागेति । किञ्चेति चार्थः । शिष्यत इति शेषः । कर्म्मणि घञ् । त्रिभ्यो भागेभ्यः शेषासु अवशिष्टासु । यद्वा रात्रे त्रियामत्वेन प्रसिद्धत्वात् तृतीयो भागस् त्रिभागः । संख्याशब्दस्य वृत्तिविषये पूरणार्थत्वमिष्यते । यथा शतांशः सहस्रांश इति । त्रिभागः शेषो यासां तासु निशासु क्षणम् क्षणमात्रम् नेत्रे निमील्य मीलयित्वा सहसा सद्यः । हे नीलकण्ठ । क व्रजसि ? कुत्र गच्छसीति

अलक्ष्या निर्विषया वाग् वचनं यस्याः सा तथोक्ता । तथा असत्ये मिथ्याभूते कण्ठेऽर्पितं बाहुबन्धनम् यस्या सा । तथा सती व्यबुध्यत विबुद्धवती । एतेन जागरोन्मादौ सूचितौ ॥ ५७ ॥

यदा बुधैः सर्वगतस्त्वमुच्यसे
न वेत्सि भावस्थमिमं कथं जनम् ।
इति स्वहस्तोल्लिखितश्च मुग्धया
रहस्युपालभ्यत चन्द्रशेखरः ॥ ५८ ॥

अन्वयः—यदा त्वं बुधैः सर्वगत उच्यसे भावस्थं इमं जनं कथं न वेत्सि इति मुग्धया स्वहस्तोल्लिखितश्चन्द्रशेखरो रहसि उपालभ्यत ॥

संजीवनी—स्वप्नसादृश्यप्रतिकृतिदर्शनतदङ्गस्पृष्टस्पर्शाख्याश्चत्वारो विरहिणां विनोदाः । तत्र स्वप्नसन्दर्शनमुक्त्वा प्रतिकृतिदर्शनमाह–यदेति । यदा यत इत्यर्थः । यदेति हेताविन्युक्त्वा गणव्याख्याने ऽस्योदाहृतत्वात् । त्वम् बुधैर् मनीषिभिः सर्वगतः सर्वव्यापीति उच्यसे । तत इत्यध्याहारः । भावे रत्याख्ये तिष्ठतीति । भावस्थम् त्वय्यनुरागिणमित्यर्थः । इमम् जनम् इममित्यात्मनिर्देशः । कथं ? न वेत्सि न जानासीति मुग्धया मूढया अकिञ्चित्करश्चित्रगतोपालम्भ इत्यजानानयेत्यर्थः । तया स्वहस्तेन उल्लिखितश्चित्रे लिखितश्चन्द्रशेखरो रहसि एकान्ते सखीमात्रसमक्षमित्यर्थः । उपालभ्यत साधिक्षेपमुक्तश्च । उक्तसमुच्चयार्थश्चकारः । यद्यपि रहसीत्युक्तं तथापि सखीसमक्षकरणाल्लज्जात्यागो व्यज्यत एव ॥ ५८॥

यदा च तस्याधिगमे जगत्पते-
रपश्यदन्यं न विधिं विचिन्वती ।
तदा सहास्माभिरनुज्ञया गुरो-
रियं प्रपन्ना तपसे तपोवनम् ॥ ५९ ॥

अन्वयः—जगत्पतेस्तस्य अधिगमे ऽन्यं विधिं विचिन्वती यदा न अपश्यत्, तदा इयं गुरोर् अनुज्ञया अस्माभिः सह तपसे तपोवनं प्रपन्ना ॥

संजीवनी—यदेति । जगत्पतेस्तस्य ईश्वरस्य अधिगमे प्राप्तौ अन्यं विधिम् उपायम् विचिन्वती मृगयमाणा यदा नापश्यत् तदा इयम् पार्वती गुरोः पितु-

अनुज्ञया अस्माभिः सह तपसे तपश्चरितुम् तपोवनं प्रपन्ना प्राप्ता ॥ ५९ ॥

द्रुमेषु सख्या कृतजन्मसु स्वयं
फलं तपःसाक्षिषु दृष्टमेष्वपि ।
न च प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोऽस्याः शशिमौलिसंश्रयः ॥ ६० ॥

अन्वयः—सख्या स्वयं कृतजन्मसु तपःसाक्षिषु एषु द्रुमेषु अपि फलं दृष्टम् । अस्याः शशिमौलिसंश्रयो मनोरथः प्ररोहाभिमुखोऽपि न दृश्यते ॥

संजीवनी—द्रुमेष्विति । सख्या पार्वत्या स्वयं कृतं जन्म येषां तेषु । स्वयं रोपितेष्वित्यर्थः । तपसः साक्षिषु साक्षाद् द्रष्टृष्वेषु द्रुमेष्वपि फलं दृष्टम् लब्धम् । जनितमित्यर्थः । अस्याः पार्वत्याः शशिमौलिसंश्रयश्चन्द्रशेखरविषयो मनोरथस्तु प्ररोहाभिमुखोऽङ्कुरोन्मुखोऽपि न दृश्यते । " प्ररोहस्त्वंकुरः " इति वैजयन्ती । स्वयंरोपितवृक्षफलकालेऽप्यस्या मनोरथस्य नाङ्कुरोदयोऽप्यस्ति फलाशा तु दूरापास्तेत्यर्थः ॥ ६० ॥

न वेद्मि स प्रार्थितदुर्लभः कदा
सखीभिरस्रोत्तरमीक्षितामिमाम् ।
तपःकृशामभ्युपपत्स्यते सखीं
वृषेव सीतां तदवग्रहक्षताम् ॥ ६१ ॥

अन्वयः—प्रार्थितदुर्लभः सः तपःकृशां सखीभिः अस्रोत्तरं ईक्षितां तदवग्रहक्षतां सीतां वृषा इव कदा अभ्युपपत्स्यते न वेद्मि ॥

संजीवनी—न वेद्मीति । प्रार्थितः सन् दुर्लभः प्रार्थितदुर्लभः स देवः तपःकृशाम् तपसा कृशां क्षीणाम् अतएव सखीभिर् अस्रोत्तरम् अश्रुप्रधानं यथा भवति तथा ईक्षितामिमाम् नः सखीं तस्य इन्द्रस्य अवग्रहेण अनावृष्ट्या क्षतां पीडिताम् । "वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ" इत्यमरः । अवग्रहो वर्षप्रतिबन्ध इत्यर्थः । सीताम् कृष्टभुवम् । "सीता लाङ्गलपद्धतिः" इत्यमरः । वृषा वासव इव । "वासवो वृत्रहा वृषा" इत्यमरः । कदा अभ्युपपत्स्यते अनुग्र-

हासिष्यति न वेद्मि । अत्र वाक्यार्थः कर्म । तदवग्रहच्छतामित्यत्रावग्रहच्छतमित्यनेनैव गतार्थत्वे तत्पदस्य वैयर्थ्यापत्तेस्तदिति भिन्नं पदं वेद्मीत्यस्य कर्मेति युक्तमुत्पश्यामः ॥ ६१ ॥

अगूढसद्भावमितीङ्गितज्ञया
निवेदितो नैष्ठिकसुन्दरस्तया ।
अयीदमेवं परिहास इत्युमा-
मपृच्छदव्यञ्जितहर्षलक्षणः ॥ ६२ ॥

अन्वयः—इङ्गितज्ञया तया अगूढसद्भावं निवेदितो नैष्ठिकसुन्दरो ऽव्यञ्जितहर्षलक्षणः सन्, अयि इदमेवं परिहास इति उमाम् अपृच्छत् ॥

संजीवनी—अगूढेति । इङ्गितज्ञया पार्वतीहृदयाभिज्ञया । "इङ्गितं हृद्गतो भावः" इति सज्जनः । तया गौरीसख्या इत्येवमगूढसद्भावम् प्रकाशितसदभिप्रायं यथा तथा निवेदितो ज्ञापितो निष्ठा मरणमवधिर्यस्य स नैष्ठिको यावज्जीवब्रह्मचारी सुन्दरो विलासी। नैष्ठिकश्चासौ सुन्दरश्चेति तथोक्तः। द्वयोरन्यतरस्य विशेषणत्वाविवक्षायां विशेषणसमासः । किन्तु नैष्ठिकत्वविशेषणेन कामित्वविरोधः । अथवा देवस्यालौकिकमहिमत्वादुभयं तात्त्विकमिति न विरोधः । अव्यञ्जितं हर्षलक्षणं मुखरागादि हर्षलिङ्गं यस्य तथाभूतः सन्। अयि गौरि ! अयीति कोमलामन्त्रणे । इदं त्वत्सखीभाषितमेवं सत्यं किमित्यर्थः । परिहासः केलिर्वा । "द्रवकेलिपरीहासाः" इत्यमरः । इत्येवमुमामपृच्छत् पृष्टवान् ॥ ६२ ॥

अथाग्रहस्ते मुकुलीकृताङ्गुलौ
समर्पयन्ती स्फटिकाक्षमालिकाम् ।
कथञ्चिदद्रेस्तनया मिताक्षरं
चिरव्यवस्थापितवागभाषत ॥ ६३ ॥

अन्वयः—अथ अद्रेस्तनया मुकुलीकृताङ्गुलौ अग्रहस्ते स्फटिकाक्षमालिकां समर्पयन्ती चिरव्यवस्थापितवाग् मिताक्षरम् अभाषत ॥

संजीवनी—अथेति । अथानन्तरमद्रेस्तनया पार्वती मुकुलीकृताङ्गुलौ सम्पुटीकृताङ्गुलौ । अग्रश्चासौ हस्तश्चेति समानाधिकरणसमासः । हस्ताग्र-

प्रहस्तयोर्गुणगुणिनोर्भेदादिति वामनः। तस्मिन्नप्रहस्ते स्फटिकानामक्षमालिकां जपमालिकाम् समर्पयन्त्यामुञ्चन्ती कथञ्चिन्महता कष्टेन चिरव्यवस्थापित-वाक् चिरेण स्वीकृतवाक्। एतेन लज्जोपरोधो व्यज्यते। मिताक्षरं परिमितवर्णं यथा तथा अभाषत बभाषे ॥ ६३ ॥

यथा श्रुतं वेदविदां वर! त्वया
जनोऽयमुच्चैः पदलङ्घनोत्सुकः।
तपः किलेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥ ६४ ॥

अन्वयः—वेदविदांवर! त्वया यथाश्रुतम् अयं जन उच्चैःपदलङ्घनोत्सुक। इदं तपः तदवाप्तिसाधनं किल। मनोरथानाम् अगतिर् न विद्यते॥

संजीवनी—किमुवाचेत्याह,—यथेति। हे वेदविदांवर! वैदिकश्रेष्ठ! त्वया यथा श्रुतम् सम्यक् श्रुतम्। श्रुतार्थमेवाह। अयं जनः स्वयमित्यर्थः। उच्चैः पदस्य शिवलाभरूपोन्नतस्थानस्य लङ्घने आक्रमणे उत्सुकः। किमत्रायुक्तमित्यत्राह। इदन्तपस्तदवाप्तेस्तस्योच्चैःपदस्य अवाप्तेः प्राप्तेः साधनं किल। किलेत्यलीके। अतितुच्छत्वादसाधकमेवेत्यर्थः। तर्हि त्यज्यतामित्याशङ्क्य दुराशा मां न मुञ्चतीत्याशयेनाह मनोरथानां कामानामगतिर् अविषयो न विद्यते. न हि स्वशक्तिपर्यालोचनया कामाः प्रवर्तन्त इति भावः ॥ ६४ ॥

अथाह वर्णी विदितो महेश्वर-
स्तदर्थिनी त्वं पुनरेव वर्तसे।
अमङ्गलाभ्यासरतिं विचिन्त्य तं
तवानुवृत्तिं न च कर्तुमुत्सहे ॥ ६५ ॥

अन्वयः—अथ वर्णी आह महेश्वरो विदितो। त्वं तदर्थिनी पुन एव वर्तसे। अमङ्गलाभ्यासरतिं तं विचिन्त्य तव अनुवृत्तिं कर्तुं न उत्सहे॥

संजीवनी—अथेति। अथ वर्णी ब्रह्मचारी। "वर्णिनो ब्रह्मचारिणः" इत्यमरः। आह। उवाचेत्यर्थः। 'आहेति भूतार्थे लट्प्रयोगो भ्रान्तिमूलः' इत्याह वामनः। किमित्याह। महेश्वरो महादेवो विदितो मया ज्ञायत इत्यर्थः। बुद्ध्यर्थत्वाद्वर्तमाने

क्तप्रत्ययः । येन त्वं प्राग् भग्नमनोरथा कृतेति भावः । पुनरेव त्वं तमीश्वरमर्थयसे तदर्थिन्येव तत्काममेव प्रवर्तसे । तत्प्रभावमनुभूयापीति भावः । अनुसरणे को दोषस्तत्राह । अमङ्गलाभ्यासे ऽमङ्गलाचारे रतिर्यस्य तम् तथोक्तमीश्वरं विचिन्त्य विचार्य तदनुवृत्तिं कर्तुं नोत्सहे । नानुमन्तुं शक्नोमीत्यर्थः ॥ ६५ ॥

अवस्तुनिर्बन्धपरे ! कथं नु ते
करोऽयमामुक्तविवाहकौतुकः ।
करेण शम्भोर्वलयीकृताहिना
सहिष्यते तत्प्रथमावलम्बनम् ॥ ६६ ॥

अन्वयः—अवस्तुनिर्बन्धपरे आमुक्तविवाहकौतुकोऽयं ते करो वलयीकृताहिना शम्भोः करेण तत्प्रथमावलम्बनं कथं नु सहिष्यते ॥

संजीवनी—अवस्त्विति । अवस्तुनि तुच्छवस्तुनि निर्बन्धोऽभिनिवेशः परं प्रधानं यस्यास्तस्याः सम्बुद्धिरवस्तुनिर्बन्धपरे ! पार्वति ! आमुक्तमासञ्जितं विवाहे यत् कौतुकं हस्तसूत्रं तद्यस्य स ते ऽयं करः । "कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले" इति शाश्वतः । वलयीकृताहिना भूषणीकृतसर्पेण शम्भोर्महादेवस्य करेण करणभूतेन । तदेव प्रथमं तत्प्रथमम् अपरिचितत्वादतिभयङ्करमिति भावः । तच्च तद् अवलम्बनं ग्रहणञ्चेति कथं सहिष्यते ? न कथञ्चिदपि सहिष्यत इत्यर्थः । अग्रतो यद्भावि तद्दूरेऽवतिष्ठतां प्रथमं करग्रह एव दुःसह इति भावः ॥ ६६ ॥

त्वमेव तावत् परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः ।
वधूदुकूलं कलहंसलक्षणं
गजाजिनं शोणितबिन्दुवर्षि च ॥ ६७ ॥

अन्वयः—त्वम् एव तावत् स्वयं परिचिन्त्य, कलहंसलक्षणं वधूदुकूलं शोणितबिन्दुवर्षि गजाजिनं च कदाचित् एते यदि योगम् अर्हतः ॥

संजीवनी—त्वमेवेति । हे गौरि ! त्वमेव स्वयम् आत्मना । तावदिति मात्रार्थे । यावन्मात्रं विचारणीयं तावन्मात्रमित्यर्थः । इदमेवोदाहृतञ्च गण-

व्याख्याने । परिचिन्तय पर्यालोचय । किमिति ? कलहंसलक्षणं कलहंसचिह्नम् । "चिह्नं लक्ष्म च लक्षणम्" इत्यमरः । वध्वा नवोढाया दुकूलं वधूदुकूलम् "वधूः स्नुषा नवोढा स्त्री" इति विश्वः । तथा शोणितबिन्दून् वर्षतीति तथोक्तमार्द्रमित्यर्थः । गजाजिनञ्च कृत्तिवासश्च तत् पिनाकिन इत्याशयः । एते कदाचित् जात्वपि योगं सङ्गतिम् अर्हतो यद्यर्हतः किम ? एतत्त्वमेव चिन्तयेति पूर्वेणान्वयः । पाणिग्रहणकाले वधूवरयोर्वस्त्रान्तग्रन्थिः क्रियते । कृत्तिवाससा पाणिपीडने तु दुकूलधारिण्यास्तव कथं संघटिष्यत इति भावः ॥ ६७ ॥

चतुष्कपुष्पप्रकरावकीर्णयोः
परोऽपि को नाम तवानुमन्यते ।
अलक्तकाङ्कानि पदानि पादयो—
र्विकीर्णकेशासु परेतभूमिषु ॥ ६८ ॥

अन्वयः—चतुष्कपुष्पप्रकरावकीर्णयोस्तव पादयोर् अलक्तकाङ्कानि पदानि परोऽपि को नाम विकीर्णकेशासु परेतभूमिषु अनुमन्यते ॥

संजीवनी—चतुष्केति । चतुष्के गृहविशेषे यः पुष्पप्रकरस्तत्र अवकीर्णयोर् न्यस्तयोः कुसुमास्तृतदिव्यभवनभूसञ्चारोचितयोरित्यर्थः । तव पादयोर् अलक्तकाङ्कानि लाक्षारञ्जितानि पदानि पादाकाराणि पादन्यासचिह्नानि । "पदं शब्दे च वाक्ये च व्यवसायापदेशयोः । पादतच्चिह्नयोः" इति विश्वः । विकीर्णा विक्षिप्ताः केशाः शवशिरोरुहा यासु तासु विकीर्णकेशासु । 'अतत्स्थं तत्र दृष्टञ्च' इति वचनात् 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति विकल्पान्न ङीष् । परेतभूमिषु प्रेतभूमिषु श्मशानेष्वित्यर्थः । परोऽपि शत्रुरपि को नाम अनुमन्यते । न कोऽपीत्यर्थः । नामेति कुत्सायाम् । पिनाकपाणिग्रहणे तस्य परेतभूसञ्चारित्वेन साहचर्यात्तवापि तत्र सञ्चारोऽवश्यम्भावीति भावः ॥ ६८ ॥

अयुक्तरूपं किमतः परं वद
त्रिनेत्रवक्षः सुलभं तवापि यत् ।
स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे
पदं चिताभस्मरजः करिष्यति ॥ ६९ ॥

अन्वयः—त्रिनेत्रवक्षः सुलभम् अपि । अतःपरं किम् अयुक्तरूपं, वद । हरिचन्दनास्पदे तव अस्मिन् स्तनद्वये चिताभस्मरजो यत् पदं करिष्यति ॥

संजीवनी—अयुक्तेति । त्रिनेत्रवक्षस्त्र्यम्बकालिङ्गनमित्यर्थः । तव तत्सम्बन्धितया सुलभमपि सुप्रापञ्च भवतीति शेषः । तवेति शेषे षष्ठी । न लोकाव्ययेत्यादिना कृद्योगलक्षणषष्ठ्या निषेधात् । अतःपरम् अस्मात्त्रिनेत्रवक्षोलाभादन्यदयुक्तरूपम् अत्यन्तायुक्तं किं ? वद न किञ्चिदित्यर्थः । प्रशंसायां रूपविति रूपप्प्रत्ययः । कुतः । यद्यस्मात्कारणात् हरिचन्दनास्पदे हरिचन्दनस्यास्पदे स्थानभूते ऽस्मिन् स्तनद्वये चिताभस्म श्मशानभस्म तदेव रजश्चूर्णं कर्तृ पदं करिष्यति पदं निधास्यति । भर्तुर्भवस्य भस्मांगरागादिति भावः ॥ ६९ ॥

इयञ्च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥ ७० ॥

अन्वयः—इयं च ते अन्या विडम्बना यद् ऊढया वारणराजहार्यया त्वया अधिष्ठित वृद्धोक्षं विलोक्य महाजनः स्मेरमुखो भविष्यति ॥

संजीवनी—इयमिति । इयञ्च ते तव पुरत आदावेवान्या विडम्बना परिहास इत्यर्थः । का सेत्यत्राह, ऊढया परिणीतया । वहेः कर्मणि क्तः । वारणराजहार्यया गजेन्द्रवाह्यया त्वया अधिष्ठितमारूढं वृद्धमुक्षाणं वृद्धोक्षम् । अचतुरेत्यादिना निपातः । विलोक्य महाजनः साधुजनः स्मेरमुखः स्मितमुखो भविष्यति उपहसिष्यति । यदियमिति पूर्वेण सम्बन्धः । स्मेरेति नमिकम्पिस्म्यजसेत्यादिना रप्रत्ययः ॥ ७० ॥

द्वयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया पिनाकिनः ।
कला च सा कान्तिमती कलावत-
स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ ७१ ॥

अन्वयः—पिनाकिनः समागमप्रार्थनया सम्प्रति द्वयं शोचनीयतां गतं

कलावतः सा कान्तिमती कला, अस्य लोकस्य नेत्रकौमुदी त्वं च ॥

संजीवनी—द्वयमिति । पिनाकिन ईश्वरस्य समागमप्रार्थनया प्राप्तिकामनया क्रियमाणयेति शेषः । सम्प्रति द्वयं शोचनीयतां शोच्यत्वं गतम् । किन्तदाह—सा प्रागेव हराशरांगता । अत्र अतिप्रसिद्धार्थत्वान्न यच्छब्दापेक्षा । तदुक्तं काव्यप्रकाशे । "प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यदुपादानं नापेक्षते" इति । कान्तिमती नित्ययोगे मतुप् । कलावतश्चन्द्रस्य कला षोडशो भागश्चास्य लोकस्य नेत्रकौमुदी नेत्रानन्दिनीत्यर्थः । त्वञ्च । कान्तिमतीत्वनेत्रकौदत्विविशेषणयोरुभयत्राप्यन्वयः । प्रागेकैव शोच्या सम्प्रति द्वे ऽपीत्यर्थः । शोच्यत्वञ्च निकृष्टाश्रयणादिति भावः ॥ ७१ ॥

वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद् बालमृगाक्षि ! मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ॥ ७२ ॥

अन्वयः—वपुर् विरूपाक्षम्, अलक्ष्यजन्मता, दिगम्बरत्वेन वसु निवेदितम् बालमृगाक्षि ! वरेषु यद् मृग्यते त्रिलोचने किं तद् व्यस्तम् अपि अस्ति ? ॥

संजीवनी—"कन्या वरयते रूपं माता वित्तं पिता श्रुतम् ।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥"
इति लोकानामाभाषणम् । तत्र किञ्चिदपि नास्तीत्याह ।

वपुरिति । वपुस्तावदस्य विरूपाणि विकृतरूपाणि अक्षीणि नेत्राणि यस्य तत् विरूपाक्षम् । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् इति षच्प्रत्ययः । वैरूप्यञ्च त्रिनेत्रत्वादिति क्षीरस्वामी । अतो न सौन्दर्यवार्तापीत्यर्थः । अलक्ष्यमज्ञातं जन्म यस्य तस्य भावस्तत्ता । कुलमपि न ज्ञायत इत्यर्थः । अलक्षिता जनिरिति पाठे जनिरुत्पत्तिरलक्षिता न ज्ञाता । "जनिरुत्पत्तिरुद्भवः" इत्यमरः । वसु वित्तं दिगम्बरत्वेनैव निवेदितम् नास्तीति ज्ञापितमित्यर्थः । यदि वित्तं भवति तदा कथं दिगम्बरो भवति अतो ज्ञेयं निर्धनोऽयमिति । किं बहुना हे बालमृगाक्षि ! पार्वति वरेषु वोढृषु । "वरौ जामातृवोढारौ" इति विश्वः ।

यद्रूपवित्तादिकं मृग्यते कन्यातद्बन्धुभिरन्विष्यते तत् त्रिलोचने त्र्यम्बके व्यस्तमेकमपि समस्तं मा भूदिति भावः। अस्ति किम्। नास्त्येवेत्यर्थः॥ ७२॥

निवर्तयास्मादसदीप्सितान् मनः
क्व तद्विधस्त्वं क्व च पुण्यलक्षणा।
अपेक्ष्यते साधुजनेन वैदिकी
श्मशानशूलस्य न यूपसत्क्रिया॥ ७३॥

अन्वयः—अस्माद् असदीप्सितान् मनो निवर्तय तद्विधः क्व, पुण्यलक्षणा त्वं च क्व? साधुजनेन श्मशानशूलस्य वैदिकी यूपसत्क्रिया न अपेक्ष्यते॥

संजीवनी—निवर्तयेति। अस्मादसदीप्सितादनिष्टमनोरथान्मनो निवर्तय निवारय सा पूर्वोक्ता विधा प्रकारो यस्य स तथोक्तः। अमङ्गलशील इत्यर्थः। क्व? महदन्तरमित्यर्थः। पुण्यलक्षणा प्रशस्तभाग्यचिह्ना त्वं क्व? अतो न तवायमर्ह इत्यर्थः। तथाहि साधुजनेन। "साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्" इति विश्वः। श्मशानशूलस्य श्मशानभूमिनिखातस्य वध्यशङ्कोर्वैदिकी वेदोक्ता। यूपो नाम पशुबन्धनसाधनभूतः संस्कृतदारुविशेषः। तस्य सत्क्रिया प्रोक्षणाभ्युक्षणादि-संस्कारो यूपसत्क्रिया नापेक्ष्यते। नेष्यते। यथा श्मशानशूले यूपसत्क्रिया न क्रियते तथा त्वमपि तस्मै न घटसे इति तात्पर्यार्थः॥ ७३॥

इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया।
विकुञ्चितभ्रूलतमाहिते तया
विलोचने तिर्यगुपान्तलोहिते॥ ७४॥

अन्वयः—इति द्विजातौ प्रतिकूलवादिनि प्रवेपमानाधरलक्ष्यकोपया तया उपान्तलोहिते विलोचने विकुञ्चितभ्रूलतं तिर्यग् आहिते॥

संजीवनी—इतीति। इत्येवंप्रकारेण द्विजातौ द्विजे प्रतिकूलवादिनि सति प्रवेपमानेन चञ्चलेनाधरेणाधरोष्ठेन लक्ष्योऽनुमेयः कोपः क्रोधो यस्याः स्तथोक्तया तया पार्वत्या उपान्तलोहिते प्रान्तरक्ते विलोचने विकुञ्चिते कुटिलिते

भ्रूलते यस्मिँस्तत्तथा सभ्रूभंगमित्यर्थः। तिर्यक् साचीकृते निहिते। अनादरा-त्तिर्यगीक्षतेत्यर्थः॥ ७४॥

उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम्।
अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनाम्॥ ७५॥

अन्वयः—एनं उवाच च, नूनं परमार्थतो हरं न वेत्सि, यतो माम् एवं आत्थ, अलोकसामान्यम् अचिन्त्यहेतुकं महात्मनां चारतं मन्दा द्विषन्ति॥

संजीवनी—उवाचेति। अथैनं ब्रह्मचारिणम् उवाच च। किमिति? परमार्थतस्तत्त्वतो हरं न वेत्सि न जानासि नूनम्। कुतः? यतो मामेवमुक्तया रीत्या आत्थ ब्रवीषि। ब्रुवः पञ्चानामादितः इति रूपसिद्धः। अज्ञानादेवायं शिवद्वेषस्तवेत्याशयेनाह,—मन्दा मूढाः। "मूढल्पापटुनिर्भाग्या मन्दाः" इत्यमरः। लोकसामान्यमितरजनसाधारणं न भवतीत्यलोकसामान्यमचिन्त्यहेतुकं दुर्बोधकारणं महात्मनां चरितं द्विषन्ति हेत्वपरिज्ञानाद्दूषयन्ति। विद्वांसस्तु कोऽप्यत्र हेतुरस्तीति बहु मन्यन्त इत्यर्थः॥ ७५॥

विपत्प्रतीकारपरेण मङ्गलं
निषेव्यते भूतिसमुत्सुकेन वा।
जगच्छरण्यस्य निराशिषः सतः
किमेभिराशोपहतात्मवृत्तिभिः॥ ७६॥

अन्वयः—विपत्प्रतीकारपरेण भूतिसमुत्सुकेन वा मङ्गलं निषेव्यते। जगच्छरण्यस्य निराशिषः सत आशोपहतात्मवृत्तिभिर् एभिः किम्?॥

संजीवनी—सम्प्रत्यमङ्गलाभ्यासरतिमित्याद्युक्तं दूषणजातं विपदित्यादिभिः षड्भिः श्लोकैः परिहर्तुमारभते—विपदिति। विपत्प्रतीकारपरेणानर्थपरि-हारार्थिनेत्यर्थः। 'उपसर्गस्यघञ्यमनुष्ये बहुलम्' इति दीर्घः। भूतिसमुत्सुकेन ऐश्वर्यकामेन वा मङ्गलं गन्धमाल्यादिकं निषेव्यते। शरणे रक्षणे साधुः

शरण्यः । 'तत्र साधुः' इति यत्प्रत्ययः । "शरणं गृहरक्षित्रोः" इत्यमरः । जगतः शरण्यस्तस्य जगच्छरण्यस्य निराशिषो निरभिलाषस्य सतः शिवस्य । "आशीरुरगदंष्ट्रायां विप्रवाक्याभिलाषयोः" इति शाश्वतः । आशया तृष्णयोपहता दूषिता आत्मवृत्तिरन्तःकरणवृत्तिर्येषां तैरेभिर् मङ्गलैः किम् ? वृथेत्यर्थः । पूर्वं मङ्गलमित्येकवचनस्य जात्यभिप्रायत्वादेभिरिति बहुवचनेन परामर्शो न विरुध्यते । इष्टावाप्त्यनिष्टपरिहारार्थिनो हि मङ्गलाचारनिबंन्धः । तदुभयासंसृष्टस्य तु यथाकथञ्चिदास्ताम् को दोष इत्यर्थः । एतेनामङ्गलाभ्यासरतिमित्युक्तं प्रत्युक्तम् ॥ ७६ ॥

अकिञ्चनः सन् प्रभवः स सम्पदां
त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते
न सन्ति याथार्थ्यविदः पिनाकिनः ॥ ७७ ॥

अन्वयः—सोऽकिञ्चनः सन् सर्वसम्पदां प्रभवः पितृसद्मगोचरः त्रिलोकनाथो भीमरूपः शिव इति उदीर्यते । पिनाकिनो याथार्थ्यविदो न सन्ति ॥

संजीवनी—अकिञ्चन इति । स हरः । न विद्यते किञ्चन द्रव्यं यस्य सोऽकिञ्चनो दरिद्रः सन् सम्पदां प्रभवत्यस्मादिति प्रभवः कारणम् । पितृसद्मगोचरः श्मशानाश्रयः सन् त्रयाणां लोकानां नाथः । 'तद्धितार्थे' इत्यादिना उत्तरपदसमासः । स देवो भीमरूपो भयङ्कराकारः सन् शिवः सौम्यरूप इत्युदीर्यत उच्यते । अतः पिनाकिनो हरस्य यथाभुतोऽर्थो यथार्थस्तस्य भावो याथार्थ्यं तत्त्वं तस्य विदो न सन्ति । लोकोत्तरमहिम्नो निर्लेपस्य यथाकथञ्चिदवस्थानं न दोषायेति भावः । एतेन 'अवस्तुनिर्बन्धपरे' इति श्लोकोक्तं परिहृतं वेदितव्यम् ॥ ७७ ॥

विभूषणोद्भासि पिनद्धभोगि वा
गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथवेन्दुशेखरं
न विश्वमूर्तेरवधार्यते वपुः ॥ ७८ ॥

अन्वयः—विश्वमूर्तेर् वपुर् विभूषणोद्भासि, पिनद्धभोगि वा गजाजिनालम्बि, दुकूलधारि वा कपालि वा अथवा इन्दुशेखरं न अवधार्यते ॥

संजीवनी—देवस्य लौकिकमलौकिकञ्च प्रसाधनं नास्तीत्याशयेनाह—विभूषणेति । विश्वं मूर्तिर्यस्येति विश्वमूर्तेरष्टमूर्तेः शिवस्य वपुः शरीरं भूषणैरुद्भासत इति भूषणोद्भासि स्यात् । पिनद्धभोग्यामुक्तभुजङ्गं वा स्यात् । पिनद्धेति नह्यतेरपिपूर्वात् कर्मणि क्तः । "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इति अकारलोपः । गजाजिनालम्बि स्यात् । अथवा दुकूलधारि स्यात् । कपालमस्यास्तीति कपालि ब्रह्मशिरः कपालशेखरं वा स्यादिन्दुशेखरं वा स्यात् । नावधार्यते न निर्धार्यते । सर्वं सम्भवतीत्यर्थः । एतेन 'त्वमेव तावत्' इति श्लोकोक्तं प्रत्युक्तमिति ज्ञेयम् ॥ ७८ ॥

तदङ्गसंसर्गमवाप्य कल्पते

ध्रुवं चिताभस्मरजो विशुद्धये ।

तथाहि नृत्याभिनयक्रियाच्युतं

विलिप्यते मौलिभिरम्बरौकसाम् ॥ ७९ ॥

अन्वयः—तदङ्गसंसर्गम् अवाप्य चिताभस्मरजो ध्रुवं विशुद्धये कल्पते । तथाहि तस्य नृत्याभिनयक्रियाच्युतम् अम्बरौकसां मौलिभिर् विलिप्यते ॥

संजीवनी—अयुक्तरूपं किमतः परं वदेति ६६ श्लोकोक्तं प्रत्याह—तदङ्गेति । तस्य शिवस्य अङ्गं तस्य संसर्गमवाप्यासाद्य चिताभस्मैव रजो विशुद्धये कल्पते अलं पर्याप्नोतीत्यर्थः । अलमर्थयोगात् 'नमःस्वास्तिस्वाहा' इत्यादिना चतुर्थी । ध्रुवं शोधकत्वं प्रमाणसिद्धमित्यर्थः । प्रमाणमेवाह—तथा हि प्रसिद्धमेवेत्यर्थः । नृत्ये ताण्डवे योऽभिनयोऽर्थव्यञ्जकचेष्टाविशेषः स एव क्रिया तया निमित्तेन च्युतं पतितं चिताभस्मरज इति शेषः । अम्बरौकसां देवानां मौलिभिर् विलिप्यते ध्रियते । अशुद्धं चेत् कथमिन्द्रादिभिर्ध्रियते इत्यर्थापत्तिरनुमानं वा प्रमाणमित्यर्थः ॥ ७९ ॥

असम्पदस्तस्य वृषेण गच्छतः
प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना
विनिद्रमन्दाररजोऽरुणाङ्गुली ॥ ८० ॥

अन्वयः—प्रभिन्नदिग्वारणवाहनो वृषा असम्पदो वृषेण गच्छतस्तस्य पादौ मौलिना उपगम्य विनिद्रमन्दाररजोऽरुणाङ्गुली करोति ॥

संजीवनी—यदुक्तं 'दिगम्बरत्वेन निवेदितं वसु' 'इयञ्चतेऽन्या पुरतो विडम्बना' इत्यादि च तत्रोत्तरमाह—असम्पद इति । प्रभिन्नो मदस्रावी दिग्वारणो दिग्गजो वाहनं यस्य सः । ऐरावतेनोढ इत्यर्थः । वृषा देवेन्द्रोऽसम्पदो दरिद्रस्य वृषेण गच्छतो वृषभारूढस्य तस्येश्वरस्य पादौ मौलिना मुकुटेनोपगम्य प्रणम्येत्यर्थः । विनिद्राणां विकसितानां मन्दाराणां कल्पतरुकुसुमानां रजोभिः परागैररुणा अङ्गुलयो ययोस्तौ तथोक्तौ करोति । दिग्गजारोहिणामिन्द्रादीनामपि वन्द्यस्य इन्दुमौलेः किं सम्पदा, वृषारोहणे वा को दोष इत्यर्थः ॥८०॥

विवक्षता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं
कथं स लक्ष्यप्रभवो भविष्यति ॥ ८१ ॥

अन्वयः—च्युतात्मना दोषं विवक्षता अपि त्वया ईशं प्रति एकं साधु भाषितम् । यम् आत्मभुवोऽपि कारणम् आमनन्ति कथं सः लक्ष्यप्रभवो भविष्यति ॥

संजीवनी—यदुक्तम् 'अलक्ष्यजन्मता' इति तत्रोत्तरमाह—विवक्षतेति । च्युतात्मना नष्टस्वभावेनात एव दोषं दूषणं विवक्षता वक्तुमिच्छतापि त्वया ईशं प्रत्येकमलक्ष्यजन्मतेत्येतदेकं वच इत्यर्थः । साधु भाषितं सम्यगुक्तं कुतः ? यमीश्वरमात्मभुवोऽपि ब्रह्मणोऽपि "ब्रह्मात्मभूः सुरज्येष्ठः" इत्यमरः । कारणमामनन्ति उदाहरन्ति विद्वांस इति शेषः । 'पाघ्राध्मास्थाम्नादाण' इत्यादिना मनादेशः । स ईश्वरः कथं लक्ष्यप्रभवो लक्ष्यजन्मा भविष्यति । अनादिनिधनस्य भगवतः कारणशङ्काकलङ्कश्च नान्विष्यत इत्यर्थः ॥ ८१ ॥

अलं विवादेन यथा श्रुतस्त्वया
तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं
न कामवृत्तिर्वचनीयमीक्षते ॥ ८२ ॥

अन्वयः—विवादेन अलं । त्वया यथा श्रुतः स तावत् तथाविधोऽशेषं अस्तु । अत्र भावैकरसं मम मनः स्थितं कामवृत्तिः वचनीयं न ईक्षते ॥

संजीवनी--अलमिति । अथ वा विवादेन कलहेनालम् । त्वया यथा येन प्रकारेण स ईश्वरः श्रुतोऽशेषं कार्त्स्न्येन तथाविधस्तावत्प्रकार एव अस्तु । मम मनस्त्वत्रेश्वरे भावः शृङ्गार एकोऽद्वितीयो रस आस्वादो यस्य तत् तथा स्थितम् । तथाहि कामवृत्तिः स्वेच्छाव्यवहारी वचनीयमस्थानसंगापवादं नेक्षते न विचारयति । न हि स्वेच्छासञ्चारिणो लोकापवादाद् बिभ्यतीति भावः ॥ ८२ ॥

निवार्यतामालि ! किमप्ययं वटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक् ॥ ८३ ॥

अन्वयः—आलि, स्फुरितोत्तराधरः पुनर्विवक्षुर् अयं वटुर् निवार्यताम् । यो महतोऽपभाषते स केवलं न तस्माद् यः शृणोति सोऽपि पापभाक् ॥

संजीवनी—निवार्यतामिति । हे आलि ! सखि ! "आलिः सखी वयस्या च" इत्यमरः । स्फुरितोत्तराधरः स्फुरणभूयिष्ठोष्ठोऽयं वटुर्माणवकः पुनः किमपि विवक्षुर्वक्तुमिच्छुः । ब्रुवः सन्नन्तादुप्रत्ययः । निवार्यताम् । तर्हि वक्तुमेव कथं न ददासीत्याह—तथाहि । यो महतः पूज्यानपभाषतेऽपवदति न केवलं स पापभाग् भवतीति शेषः । अत्र स्मृतिः । "गुरोः प्रसः परीवादो न श्रोतव्यः कथञ्चन । कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः" इति । किन्तु तस्मान्महतामपवादकात् यः शृणोति महदपवादकवाक्यमिति सोऽपि पापभागित्यनुषज्यते ॥ ८३ ॥

इतो गमिष्याम्यथवेति वादिनी
चचाल बाला स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः
समाललम्बे वृषराजकेतनः ॥ ८४ ॥

अन्वयः—अथवा इतो गमिष्यामि इति वादिनी स्तनभिन्नवल्कला बाला चचाल । वृषराजकेतनः स्वरूपं आस्थाय कृतस्मितस्तां समाललम्बे च ॥

संजीवनी—सम्प्रति गन्तव्यपक्षमाश्रयते—इत इति । अथ वेतोऽन्यत्र गमिष्यामीति वादिनी वदन्ती स्तनाभ्यां भिन्नवल्कला रयवशात् कुचस्रस्तचीरा बाला पार्वती चचाल । वृषराजकेतनो वृषभध्वजश्च स्वरूपमास्थाय निजरूपमाश्रित्य कृतस्मितः सन् तां पार्वतीं समाललम्बे जग्राह ॥ ८४ ॥

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ८५ ॥

अन्वयः—तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर् निक्षेपणाय उद्धृतं पदम् उद्वहन्ती शैलाधिराजतनया मार्गाचलव्यतिकराकुलिता सिन्धुर् इव न ययौ न तस्थौ ॥ ८५ ॥

संजीवनी—तमिति । तं देवं वीक्ष्य वेपथुमती कम्पवती सरसाङ्गयष्टिः स्विन्नगात्री । महादेवदर्शनेन देव्या सात्त्विकभावोदय उक्तः । निक्षेपणायान्यत्र विन्यासायोद्धृतं उत्क्षिप्तं पदमङ्घ्रिमुद्वहन्ती शैलाधिराजतनया पार्वती मार्गेऽचलस्तस्य व्यतिकरेण समाहत्या । अवरोधनेनेति यावत् । आकुलिता सम्भ्रमिता सिन्धुर्नदीव इव "देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः । न ययौ न तस्थौ । लज्जयेति भावः । वसन्ततिलकावृत्तमेतत् ॥ ८५ ॥

अद्य प्रभृत्यवनताङ्गि ! तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ ८६ ॥

अन्वयः—चन्द्रमौलौ अवनताङ्गि अद्य प्रभृति ते तपोभिः क्रीतो दासोऽस्मि, इति वादिनि , सा अह्नाय नियमजं क्लमम् उत्ससर्ज। क्लेशः फलेन हि पुनर् नवतां विधत्ते ॥

संजीवनी—अद्येति । चन्द्रमौलौ शिवे हे अवनताङ्गि । पार्वति । अद्य प्रभृति । अस्माद्दिनादारभ्येत्यर्थः । प्रभृतियोगादद्येति सप्तम्यर्थवाचिना पञ्चम्यर्थो लक्ष्यते । तव तपोभिः क्रीतः । दासृ दाने । दासते आत्मानं ददातीति दासोऽस्मि । इति वादिनि वदति सति सा देवी अह्नाय सपदि । "स्रग्झटित्यञ्जसाह्नाय द्राङ्मंक्षु सपदि द्रुतम्" इत्यमरः । नियमजं तपोजन्यं क्लमं क्लेशमुत्ससर्ज । फलप्राप्त्या क्लेशं विसस्मारेत्यर्थः । तथा हि क्लेशः फलेन फलसिद्ध्या पुनर्नवतां विधत्ते पूर्ववदेवाक्लिष्टतामापादयतीत्यर्थः । सफलः क्लेशो न क्लेश इति भावः ॥ ८६ ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीवनी-
समाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमार-
सम्भवे महाकाव्ये तपःफलोदयो नाम
पञ्चमः सर्गः ।

अथ महाकविकालिदासविरचिते रघुवंशे
चतुर्थः सर्गः ॥

शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदास्माकं सन्निधिं संनिधिं क्रियात् ॥

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः ॥ १ ॥

स रघुर्गुरुणा पित्रा दत्तं राज्यं राज्ञः कर्म प्रजापरिपालनात्मकम् । पुरोहितादित्वायक् । प्रतिपद्य प्राप्य । दिनान्ते सायंकाले सवित्रा सूर्येण निहितं तेजः प्रतिपद्य हुताशनोऽग्निरिव । अधिकं बभौ । 'सौरं तेजः सायमग्निं संक्रमते' । 'आदित्यो वा अस्तं यन्नग्निमनुप्रविशति' । 'अग्निं वा आदित्यः सायं प्रविशति' इत्यादिश्रुतिः प्रमाणम् ॥ १ ॥

दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम् ।
पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ॥ २ ॥

दिलीपानन्तरं राज्ये प्रतिष्ठितमवस्थितं रघुं निशम्याकर्ण्य पूर्वं दिलीपकाले राज्ञां हृदये प्रकर्षेण धूमोऽस्य संजातः प्रधूमितोऽग्निः संतापाग्निरुत्थित इव प्रज्वलित इव । पूर्वेभ्योऽधिकसंतापोऽभूदित्यर्थः । राज्यकर्तृकस्यापि निशमनस्याग्नावुपचारान्न समानकर्तृकत्वविरोधः ॥ २ ॥

पुरुहूतध्वजस्येव तस्योन्नयनपङ्क्तयः ।
नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः ॥ ३ ॥

पुरुहूतध्वज इन्द्रध्वजः । स किल राजभिर्वृष्ट्यर्थं पूज्यत इत्युक्तं भविष्योत्तरे— 'एवं यः कुरुते यात्रामिन्द्रकेतोर्युधिष्ठिर । पर्जन्यः कामवर्षी स्यात्तस्य राज्ये न संशयः' इति । 'चतुरस्रं ध्वजाकारं राजद्वारे प्रतिष्ठितम् । आहुः शक्रध्वजं नाम पौरलोकसुखावहम्' इति । पुरुहूतध्वजस्येव तस्य रघोर्नवमभ्युत्थानमभ्युन्नतिमभ्युदयं च पश्यन्तीति नवाभ्युत्थानदर्शिन्यः । उन्नयनपङ्क्तय उदूर्ध्वं प्रस्थिता उल्लसिताश्च नयनपङ्क्तयो यासां ताः सप्रजाः

ससंतानाः प्रजा कृताः । 'प्रजा स्यात्संततौ जने' इत्युभयत्राप्यमरः । ननन्दुः ॥ ३ ॥

सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यमखिलं चारिमण्डलम् ॥ ४ ॥

द्विरद इव द्विरदेश्च गच्छतीति द्विरदगामिना । 'कर्तर्युपमाने' इति 'सुप्यजातौ' इति च णिनिः । तेन रघुणा समं युगपदेव द्वयं समाक्रान्तमधिष्ठितम् । किं तद्द्वयम् । पितुरागतं पित्र्यम् । 'पितुर्यत्' इति यत्प्रत्ययः । सिंहासनम् । अखिलम् अरिमण्डलम् अरीणां मण्डलं राष्ट्रं च ॥ ४ ॥

अथ सिंहासनारोहणानन्तरं तस्य लक्ष्मीसंनिधानमाह—

छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥ ५ ॥

अत्र रघोस्तेजोविशेषेण स्वयं संनिहितया लक्ष्म्या छत्रधारणं कृतमित्युत्प्रेक्ष्यते । पद्मा लक्ष्मीः । 'लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया' इत्यमरः । सा स्वयमदृश्या किल । किलेति संभावनायाम् । सती छायामण्डललक्ष्येण कान्तिपुञ्जानुमेयेन । न तु स्वरूपतो दृश्येन । छायामण्डलमित्यनेनानातपज्ञानं लक्ष्यते । 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' इत्युभयत्राप्यमरः । पद्मातपत्रेण पद्ममेवातपत्रं तेन कारणभूतेन साम्राज्यदीक्षितं साम्राज्ये साम्राज्यकर्मणि मण्डलाधिपत्ये दीक्षितमभिषिक्तं तं भेजे । अन्यथा कथमेतादृशी कान्तिसंपत्तिरिति भावः ॥ ५ ॥

परिकल्पितसांनिध्या काले काले च बन्दिषु ।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥ ६ ॥

सरस्वती च काले काले सर्वेष्वपि योग्यकालेषु । 'नित्यवीप्सयोः' इति वीप्सायां द्विर्वचनम् । बन्दिषु परिकल्पितसांनिध्या कृतसंनिधाना सती स्तुत्यं स्तोत्रार्हं तं रघुम् । अर्थ्याभिरर्थादनपेताभिः । 'धर्मपथ्यर्थन्यायादनपेते' इति यत्प्रत्ययः । स्तुतिभिः स्तोत्रैरुपतस्थे ॥ देवताबुद्ध्या पूजितवतीत्यर्थः । देवतात्वं च 'नाविष्णुः पृथिवीपतिः' इति वा । लोकपालात्मकत्वाद्वेत्यनुसंधेयम् ।

एवं च सति 'उपाद्देवपूजासंगतिकरणमित्रकरणपथिषु' इति वक्तव्यादात्मनेपदं सिध्यति ॥ ६ ॥

मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुन्धरा ॥ ७ ॥

वसुंधरा मनुप्रभृतिभिर्मन्वादिभिर्मान्यैः पूज्यै राजभिर्भुक्ता यद्यपि । भुक्तैवेत्यर्थः । यद्यपीत्यवधारणे । 'अप्यर्थे यदि वार्थे स्यात्' इति केशवः । तथापि तस्मिन्राज्ञि । अन्यः पूर्वो यस्याः सान्यपूर्वा । अन्यपूर्वा न भवतीत्यनन्यपूर्वा । अनन्योपभुक्तेवासीत् । तत्प्रथमपतिकेवानुरक्तवर्तीत्यर्थः ॥ ७ ॥

अत्र कारणमाह—

स हि सर्वस्य लोकस्य युक्तदण्डतया मनः ।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ॥ ८ ॥

हि यस्मात्कारणात्स रघुर्युक्तदण्डतया यथापराधदण्डतया सर्वस्य लोकस्य मन आददे जहार । क इव । अतिशीतोऽत्युष्णो वा न भवतीति नातिशीतोष्णः । नञर्थस्य नशब्दस्य सुप्सुपेति समासः । दक्षिणो दक्षिणदिग्भवो नभस्वान्वायुरिव । मलयानिल इवेत्यर्थः । युक्तदण्डतयेत्यत्र कामन्दकः । 'उद्वेजयति तीक्ष्णेन मृदुना परिभूयते । दण्डेन नृपतिस्तस्माद्युक्तदण्डः प्रशस्यते' इति ॥ ८ ॥

मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ॥ ९ ॥

तेन रघुणा प्रजा गुरौ दिलीपविषये सहकारस्य सहकारोऽतिसौरभश्चूतः । 'आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः' इत्यमरः । तस्य फलेन पुष्पोद्गमे पुष्पोदय इव ततोऽपि गुणाधिकतया हेतुना मन्दोत्कण्ठा अल्पोत्सुक्याः कृताः । गुणोत्तरश्चोत्तरो विषयः पूर्वं विस्मारयतीति भावः ॥ ९ ॥

नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम् ।
पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः ॥ १० ॥

नयविद्भिर्नीतिशास्त्रज्ञैर्नवे तस्मिन् राज्ञि विषये । तमधिकृत्येत्यर्थः । सद्धर्मयुद्धा-

दिक्रमसत्कूटयुद्धादिकं चोपदर्शितम् । तस्मिन्राज्ञि पूर्वः पक्ष एवाभवत् । संक्रान्त इत्यर्थः । उत्तरः पक्षो नाभवत् । न संक्रान्त इत्यर्थः । तत्र सदसतोर्मध्ये । सदेवाभिमतं नासत् । तदुद्भावनं तु ज्ञानार्थमेवेत्यर्थः । पक्षः साधनयोग्यार्थः । 'पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु' इति केशवः ॥ १० ॥

पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः ।
नवे तस्मिन्महीपाले सर्वं नवमिवाभवत् ॥ ११ ॥

पृथिव्यादीनां पञ्चानां भूतानामपि गुणा गन्धादय उत्कर्षमतिशयं पुपुषुः । अत्रोत्प्रेक्षते—तस्मिन्रघौ नाम नवे महीपाले सति सर्वं वस्तुजातं नवमिवाभवत् । तदेव भूतजातमिदानीमपूर्वगुणयोगादपूर्वमिवाभवदिति भावः ॥ ११ ॥

यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥ १२ ॥

यथा चन्दयत्याह्लादयतीति चन्द्र इन्दुः । चदिधातोरौणादिको रप्रत्ययः । प्रह्लादनादाह्लादकरणादन्वर्थोऽनुगतार्थनामकोऽभूत् । यथा च तपतीति तपनः सूर्यः । नन्द्यादित्वाल्ल्युप्रत्ययः । प्रतापात्संतापजननादन्वर्थः । तथैव स राजा प्रकृतिरञ्जनादन्वर्थः सार्थकराजशब्दोऽभूत् । यद्यपि राजशब्दो राजतेर्दीप्त्यर्थात्कनिन्प्रत्ययान्तो न तु रञ्जेस्तथापि धातूनामनेकार्थत्वाद्रञ्जनाद्राजेत्युक्तं कविना ॥ १२ ॥

कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।
चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना ॥ १३ ॥

विशाले तस्य रघोर्लोचने कामं कर्णान्तयोर्विश्रान्ते कर्णप्रान्तगते । चक्षुष्मत्ता तु । चक्षुःफलं त्वित्यर्थः । सूक्ष्मान्कार्यार्थान्कर्तव्यार्थान्दर्शयति प्रकाशयतीति सूक्ष्मकार्यार्थदर्शिना शास्त्रेणैव । शास्त्रं दृष्टिर्विवेकिनामिति भावः ॥ १३ ॥

लब्धप्रशमनस्वस्थमथैनं समुपस्थिता ।
पार्थिवश्रीर्द्वितीयेव शरत्पङ्कजलक्षणा ॥ १४ ॥

अथ लब्धप्रशमनस्वस्थम् लब्धस्य राज्यस्य प्रशमनेन परिपन्थिनामनुरञ्जनप्रतीकाराभ्यां स्थिरीकरणेन स्वस्थं समाहितचित्तमेनं रघुं पङ्कजलक्षणा पद्मचिह्ना । श्रियोऽपि विशेषणमेतत् । शरत् । द्वितीया पार्थिवश्री राजलक्ष्मीरिव ।

समुपस्थिता प्राप्ता । 'रक्षा पौरजनस्य देशनगरग्रामेषु गुप्तिस्तथा योधानामपि संग्रहोऽथ तुलया मानव्यवस्थापनम् । साम्यं लिङ्गिषु दानवृत्तिकरणं त्यागः समानेऽर्चनं कार्याण्येव महीभुजां प्रशमनान्येतानि राज्ये नवे' ॥ १४ ॥

निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः ।
प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः ॥ १५ ॥

निर्वृष्टलघुभिर् निःशेषं वृष्टा निर्वृष्टाः । कर्तरि क्तः । अत एव लघवः । तैर्मेघैर्मुक्तवर्त्मा त्यक्तमार्गः । अत एव सुदुःसहः । तस्य रघोर्भानोश्च प्रतापः पौरुषमातपश्च । 'प्रतापौ पौरुषातपौ' इति यादवः । युगपद्दिशो व्यानशे व्याप ॥ १५ ॥

वार्षिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्दधौ ।
प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ ॥ १६ ॥

इन्द्रः । वर्षासु भवं वार्षिकम् । [redacted] निमित्तमित्यर्थः । 'वर्षाभ्यष्ठक्' इति ठक्प्रत्ययः । धनुः संजहार । रघुर्जैत्रं जयशीलम् । जेतृशब्दात्तृन्नन्तात् 'प्रज्ञादिभ्यश्च' इति स्वार्थेऽणप्रत्ययः । धनुर्दधौ । हि यस्मात्ताविन्द्ररघू प्रजार्थसाधने प्रजानामर्थस्य प्रयोजनस्य वृष्टिविजयलक्षणस्य साधनविषये पर्यायेणोद्यते कार्मुके याभ्यां तौ पर्यायोद्यतकार्मुकौ । 'पर्यायोद्यमविश्रमौ' इति पाठान्तरे पर्यायेणोद्यमो विश्रमश्च ययोस्तौ पर्यायोद्यमविश्रमौ । द्वयोः पर्यायकरणादक्लेश इति भावः ॥ १६ ॥

पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ॥ १७ ॥

पुण्डरीकातपत्रः पुण्डरीकं सिताम्भोजमेवातपत्रं यस्य स तथोक्तः । विकसत्काशचामरो विकसन्ति काशानि काशाख्यतृणकुसुमान्येव चामराणि यस्य स तथोक्तः । ऋतुः शरदृतुः पुण्डरीकनिभातपत्रं काशनिभचामरं तं रघुं विडम्बयामासानुचकार । तच्छ्रियम् तस्य रघोः श्रियं पुनः शोभां तु न प्राप । 'शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते' इति शाश्वतः ॥ १७ ॥

प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे ।
तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः ॥ १८ ॥

प्रसादसुमुखे प्रसादेन सुमुखे तस्मिन्रघौ विशदप्रभे निर्मलकान्तौ

चन्द्रे च द्वयोर्विषये तदा चक्षुष्मतां प्रीतिरनुरागः समरसा समस्वादा। तुल्ययोगेति यावत्। 'रसो गन्धे रसः स्वादे' इति विश्वः। आसीत्॥ १८॥

हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु।
विभूतयस्तदीयानां पर्यस्ता यशसामिव॥ १९॥

हंसश्रेणीषु हंसानां श्रेणीषु पंक्तिषु। तारासु नक्षत्रेषु। कुमुद्वत्सु कुमुदानि येषु सन्तीति कुमुद्वन्ति। 'कुमुद्वान्कुमुदप्राये' इत्यमरः। कुमुदनड्वेतसेभ्यो ड्मतुप्। तेषु। कुमुदप्रायेष्वित्यर्थः। वारिषु च तदीयानां रघुसंबन्धिनां यशसां विभूतयः संपदः पर्यस्ता इव प्रसारिताः किम्। इत्युत्प्रेक्षा। अन्यथा कथमेषां धवलिमेति भावः॥ १९॥

इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयम्।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः॥ २०॥

इक्षुच्छायनिषादिन्यः इक्षूणां छायेक्षुच्छायम्। 'छाया बाहुल्ये' इति नपुंसकत्वम्। तत्र निषण्णा इक्षुच्छायनिषादिन्यः। 'इक्षुच्छायानिषादिन्यः' इति स्त्रीलिङ्गपाठे इक्षोश्छायेति विग्रहः। अन्यथा बहुत्वे नपुंसकत्वप्रसङ्गात्। शालीन्गोपायन्ति रक्षन्तीति शालिगोप्यः सस्यपालिकाः स्त्रियः। कर्मण्यण्। 'टिड्ढाणञ्' इत्यादिना ङीप्। गोप्तू रक्षकस्य तस्य रघोः। गुणेभ्य उदयो यस्य तद्गुणोदयं गुणोत्पन्नमाकुमारं कुमारादारभ्य कथोद्घातः कथारम्भो यस्य तत्। आकुमारकथोद्घातम् कुमारैरपि स्तूयमानमित्यर्थः। यशो जगुर्गायन्ति स्म। अथवा कुमारस्य सतो रघोर्याः कथा इन्द्रविजयादयस्तत आरभ्याकुमारकथम्। तत्राप्यभिविधावव्ययीभावः। आकुमारकथमुद्घातो यस्मिन्कर्मणि। गानक्रियाविशेषणमेतत्। 'स्यादभ्यादानमुद्घात आरम्भः' इत्यमरः। 'आकुमारकथोद्भूतम्' इति पाठे कुमारस्य सतस्तस्य कथाभिश्चरितैरुद्भूतं यद्यशस्तद्यश आरभ्य यशो जगुरिति व्याख्येयम्॥ २०॥

प्रससादोदयादम्भः कुम्भयोनेर्महौजसः।
रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः॥ २१॥

महौजसः कुम्भयोनेरगस्त्यस्य। 'अगस्त्यः कुम्भसंभवः' इत्यमरः। उदया-

दम्भः प्रससाद प्रसन्नं बभूव । महौजसो रघोरुदयादभिभवाशङ्कि द्विषतां मनश्चुक्षुभे कालुष्यं प्राप । 'अगस्त्योदये जलानि प्रसीदन्ति' इत्यागमः ॥ २१ ॥

मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ।
लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम् ॥ २२ ॥

मदोदग्रा मदोद्धताः । ककुदेषामस्तीति ककुद्मन्तः । महाककुद इत्यर्थः । यवादित्वान्मकारस्य वत्वाभावः । सरितां कूलान्युद्रुजन्तीति कूलमुद्रुजाः । 'उदि कूले रुजिवहोः' इति खश्प्रत्ययः । 'अरुर्द्विषत्' इत्यादिना मुमागमः । महान्त उक्षाणो महोक्षाः । 'अचतुर' इत्यादिना निपातनादकारान्तः । लीलाखेलं विलाससुभगं तस्य रघोरुत्साहवतो वपुष्मतः परभञ्जकस्य विक्रमं शौर्यमनुप्रापुरनुचक्रुः ॥ २२ ॥

प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥ २३ ॥

मदस्येव गन्धो येषां तैर्मदगन्धिभिः । 'उपमानाच्च' इतीकारः समासान्तः । सप्तपर्णानां वृक्षविशेषाणाम् । 'सप्तपर्णो विशालत्वक्शारदो विषमच्छदः' । इत्यमरः । प्रसवैः पुष्पैराहतास्तस्य रघोर्नागा गजाः । गजेऽपि 'नागमातङ्गौ' इत्यमरः । असूययेवाहतिनिमित्तया स्पर्धयेव सप्तधैव प्रसुस्रुवुर्मदं ववृषुः । प्रतिगजगन्धाभिमानादिति भावः । 'करात्कटाभ्यां मेढ्राच्च नेत्राभ्यां च मदस्रुतिः' इति पालकाप्ये । करात्सारंध्राभ्यामित्यर्थः ॥ २३ ॥

सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् ।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत् ॥ २४ ॥

सरितो गाधाः सुप्रतराः कुर्वती पथो मार्गांश्चाश्यानकर्दमाञ्शुष्कपङ्कान्कुर्वती । 'संयोगादेरातो धातोर्यण्वतः' इति श्यतेर्निष्ठा तस्य नत्वम् । शरच्छरद्दतुस्तं रघुं शक्तेरुत्साहशक्तेः प्रथमं प्राग्यात्रायै दण्डयात्रायै चोदयामास प्रेरयामास । प्रभावमन्त्रशक्तिसंपन्नस्य शरत्स्वयमुत्साहमुत्पादयामासेत्यर्थः ॥ २४ ॥

तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ ।
प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ ॥ २५ ॥

वाजिनीराजनाविधौ वाजिनामश्वानां नीराजनाविधौ । नीराजनाख्ये शान्तिकर्मणि सम्यग्विधिवद्धुतो होमसमिद्धो वह्निः । प्रदक्षिणार्चिर्व्याजेन प्रगता दक्षिणं प्रदक्षिणम् । तिष्ठद्गुप्रभृतित्वादव्ययीभावः । प्रदक्षिणं यार्चिर्ज्वाला तस्या व्याजेन हस्तेनेव तस्मै जयं ददौ । उक्तमाहवयात्रायाम् । 'इद्धः प्रदक्षिणगतो हुतभुङ् नृपस्य धात्रीं समुद्ररशनां वशगां करोति' इति । वाजिग्रहणं गजादीनामप्युपलक्षणं तेषामपि नीराजनाविधानात् ॥ २५ ॥

स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः ।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ॥ २६ ॥

गुप्तो मूलं स्वनिवासस्थानं प्रत्यन्तः प्रान्तदुर्गं च येन स गुप्तमूलप्रत्यन्तः । शुद्धपार्ष्णिरुद्धृतपृष्ठशत्रुः सेनया रक्षितपृष्ठदेशो वा अयान्वितः शुभदैवान्वितः । 'अयः शुभावहो विधिः' इत्यमरः । स रघुः षड्विधं मौलभृत्यादिरूपं बलं सैन्यम् । 'मौलं भृत्यः सुहृच्छ्रेणी द्विषदाटविकं बलम्' इति कोशः । आदाय दिग्जिगीषया दिशां जिगीषया जेतुमिच्छया प्रतस्थे चचाल ॥ २६ ॥

अथाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः ।
पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम् ॥ २७ ॥

वयोवृद्धाः पौरयोषितस्तं रघुं प्रयान्तं लाजैराचारलाजैः । मन्दरोद्धूतैः पृषतैर्बिन्दुभिः क्षीरोर्मयः क्षीरसमुद्रोर्मयोऽच्युतं विष्णुमिव । अवाकिरन्पर्याक्षिपन् ॥२७॥

स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा ।
अहितानिलोद्धूतैस्तर्जयन्निव केतुभिः ॥ २८ ॥

प्राचीनबर्हिषा प्राचीनबर्हिर्नाम कश्चिन्महाराज इति केचित् । प्राचीनबर्हिरिन्द्रः । 'पर्जन्यो मघवा वृषा हरिहयः प्राचीनबर्हिस्तथा' इतीन्द्रपर्यायेषु हलायुधाभिधानात् । तेन तुल्यः स रघुः । अनिलोद्धूतैरनिलेनानुकूलवातेनोद्धूतैः केतुभिर्ध्वजैरहितान्रिपूंस्तर्जयन्निव भर्त्सयन्निव । तर्जिभर्त्स्योरनुदात्तेत्त्वेऽपि चक्षिङो ङित्करणेनानुदात्तेत्त्वनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनात्परस्मैपदमिति वामनः । प्रथमं प्राचीं दिशं ययौ ॥ २८ ॥

रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसंनिभैः ।
भुवस्तलमिव व्योम कुर्वन्व्योमेव भूतलम् ॥ २९ ॥

किं कुर्वन् । स्यन्दनोद्धूतै रजोभिर्घनसंनिभैर्वर्णतः क्रियातः परिमाणतश्च मेघतुल्यैर्गजैश्च यथाक्रमं व्योमाकाशं भुवस्तलमिव भूतलं च व्योमेव कुर्वन् । ययाविति पूर्वेण संबन्धः ॥ २९ ॥

प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः ॥ ३० ॥

अग्रे प्रतापस्तेजोविशेषः । 'स प्रभावः प्रतापश्च यत्तेजः कोशदण्डजम्' इत्यमरः । ततः शब्दः सेनाकलकलः । तदनन्तरं परागो धूलिः । 'परागः पुष्परजसि धूलिस्नानीययोरपि' इति विश्वः । पश्चाद्रथादि रथाश्वादिकं चतुरङ्गबलम् । 'रथानीकम्' इति पाठ इतिशब्दाध्याहारेण योज्यम् । इतीत्थं चतुःस्कन्धेव चतुर्व्यूहेव । 'स्कन्धः प्रकाण्डे कायांशे विज्ञानादिषु पञ्चसु । नृपे समूहे व्यूहे च' इति हेमः । सा चमूर्ययौ ॥ ३० ॥

मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः ।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ॥ ३१ ॥

स रघुः शक्तिमत्त्वात्समर्थत्वान्मरुपृष्ठानि निर्जलस्थानानि । 'समानौ मरुधन्वानौ' इत्यमरः । उदम्भांस्युद्भूतजलानि चकार । नाव्या नौभिस्तार्या नदीः । 'नाव्यं त्रिलिङ्गं नौतार्ये' इत्यमरः । नौवयोधर्मविषमूलस्यादिना यत्प्रत्ययः । सुप्रतराः सुखेन तार्याश्चकार । विपिनान्यरण्यानि । 'अटव्यरण्यं विपिनम्' इत्यमरः । प्रकाशानि निर्वृक्षाणि चकार । शक्त्युत्कर्षात्तस्यागम्यं किमपि नासीदिति भावः ॥ ३१ ॥

स सेनां महतीं कर्षन्पूर्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ॥ ३२ ॥

महतीं सेनां पूर्वसागरगामिनीं कर्षन्स रघुः । हरजटाभ्रष्टां हरस्य जटाभ्यो भ्रष्टां गङ्गां कर्षन् । सापि पूर्वसागरगामिनी । भगीरथ इव बभौ ।

भगीरथो नाम कश्चित्कपिलदग्धानां सागराणां नप्ता तत्पावनाय हरकिरीटाद्गङ्गां प्रवर्तयिता राजा । यत्संबन्धाद्गङ्गा च भागीरथीति गीयते ॥ ३२ ॥

त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः ।
तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः ॥ ३३ ॥

'फलं फले धने बीजे निष्पत्तौ भोगलाभयोः' इति केशवः । फलं लाभम् । वृक्षपक्षे प्रसवं च । त्याजितैस्त्यजेर्ण्यन्ताद्द्विकर्मकादप्रधाने कर्मणि क्तः । उत्खातैः स्वपदाच्च्यावितैः । अन्यत्रोत्पाटितैः । बहुधा भग्नै रणे जितैः । अन्यत्र छिन्नैः । नृपैः । पादपैर्दन्तिनो गजस्येव । तस्य रघोर्मार्ग उल्बणः प्रकाश आसीत् । 'प्रकाशं प्रकटं स्पष्टमुल्बणं विशदं स्फुटम्' इति यादवः ॥ ३३ ॥

पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी ।
प्राप तालीवनश्याममुपकण्ठं महोदधेः ॥ ३४ ॥

जयी जयनशीलः । 'जिदृक्षिविश्रि' इत्यादिनेनिप्रत्ययः । स रघुरेवम् । पुरो भवान्पौरस्त्यान्प्राच्यान् । 'दक्षिणापश्चात्पुरसस्त्यक्' इति त्यक्प्रत्ययः । तांस्तान् । सर्वानित्यर्थः । वीप्सायां द्विरुक्तिः । जनपदान्देशानाक्रमंस्तालीवनैः श्यामं तालीवनश्यामं महोदधेरुपकण्ठमन्तिकं प्राप ॥ ३४ ॥

अनम्राणां समुद्धर्तुस्तस्मात्सिन्धुरयादिव ।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम् ॥ ३५ ॥

अनम्राणाम् । कर्मणि षष्ठी । समुद्धर्तुरुन्मूलयितुस्तस्माद्रघोः सकाशात् । 'भीत्रार्थानां भयहेतुः' इत्यपादानत्वात्पञ्चमी । सिन्धुरयान्नदीवेगादिव सुह्मैः सुह्मदेशीयैः । सुह्मादयः शब्दा जनपदवचनाः । क्षत्रियमाचक्षते । वैतसीं वेतसः संबन्धिनीं वृत्तिम् । प्रणतिमित्यर्थः । आश्रित्य । आत्मा संरक्षितः । अत्र कौटिल्यः— 'बलीयसाभियुक्तो दुर्बलः सर्वत्रानुप्रणतो वेतसधर्ममातिष्ठेत्' इति ॥ ३५ ॥

वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान्गङ्गास्रोतोन्तरेषु सः ॥ ३६ ॥

नेता नायकः स रघुर् नौसाधनोद्यतान् नौभिः साधनैरुद्यतान्संनद्धा-

वङ्गान्राज्ञस्तरसा बलेन । 'तरसी बलरंहसी' इति यादवः । उत्खायोन्मूल्य गङ्गास्रोतोन्तरेषु गङ्गायाः स्रोतसां प्रवाहाणामन्तरेषु द्वीपेषु जयस्तम्भान्निचखान । स्थापितवानित्यर्थः ॥ ३६ ॥

आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ॥ ३७ ॥

आपादपद्मप्रणता आपादपद्ममङ्घ्रिपद्मपर्यन्तं प्रणताः । उत्खातप्रतिरोपिता अत एवोत्खाताः पूर्वमुद्धृता अपि प्रतिरोपिताः पश्चात्स्थापितास्ते वङ्गाः । कलमा इव शालिविशेषा इव । 'शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी' इत्यमरः । तेऽप्यापादपद्मं पादपद्ममूलपर्यन्तं प्रणताः । 'पादा बुध्ने तुरीयांशशैलप्रत्यन्तपर्वताः' इति विश्वः । उत्खातप्रतिरोपिताश्च । रघुं फलैर्धनैः । अन्यत्र सस्यैः । संवर्धयामासुः । 'फलं फले धने बीजे निष्पत्तौ भोगलाभयोः सस्ये' इति केशवः ॥ ३७ ॥

स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ॥ ३८ ॥

स रघुर् बद्धद्विरदसेतुभिर् बद्धा द्विरदा एव सेतवो यैस्तैः सैन्यैः कपिशां नाम नदीं तीर्त्वा । 'करभाम्' इति केचित्पठन्ति । उत्कलादर्शितपथ उत्कलै राजभिरादर्शितपथः संदर्शितमार्गः सन् कलिङ्गाभिमुखो ययौ ॥ ३८ ॥

स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः ॥ ३९ ॥

स रघुर्महेन्द्रस्य कुलपर्वतविशेषस्य । 'महेन्द्रो मलयः सह्यः शक्तिमानृक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः' इति विष्णुपुराणाद् मूर्ध्नि तीक्ष्णं दुःसहं प्रतापम् । यन्ता सारथिर्गम्भीरवेदिनो द्विरदस्य गजविशेषस्य मूर्ध्नि तीक्ष्णं निशितमङ्कुशमिव । न्यवेशयन्निक्षिप्तवान् । 'त्वग्भेदाच्छोणितस्रावान्मांसस्य क्नथनादपि । आत्मानं यो न जानाति स स्याद्गम्भीरवेदिता' इति राजपुत्रीये । 'चिरकालेन यो वेत्ति शिक्षां परिचितामपि । गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिः' ॥ इति मृगचर्मीये ॥ ३९ ॥

प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥ ४० ॥

गजसाधनः सन्कालिङ्गः कलिङ्गानां राजा । 'द्व्यञ्मगधकलिङ्गः' इत्यादिनाण्प्रत्ययः । अस्त्रैरायुधैस्तं रघुम् । पक्षच्छेदोद्यतं पक्षाणां च्छेदे उद्यतमुद्युक्तं शक्रं शिलावर्षी पर्वत इव । प्रतिजग्राह प्रत्यभियुक्तवान् ॥ ४० ॥

द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् ॥ ४१ ॥

काकुत्स्थो रघुस्तत्र महेन्द्राद्रौ द्विषां नाराचदुर्दिनं नाराचानां बाणविशेषाणां दुर्दिनम् । लक्षणया वर्षमुच्यते । विषह्य सहित्वा सद्यथाशास्त्रं मङ्गलस्नात इव विजयमङ्गलार्थमभिषिक्त इव जयश्रियं प्रतिपेदे प्राप । 'यत्तु सर्वौषधिस्नानं तन्माङ्गल्यमुदीरितम्' इति यादवः ॥ ४१ ॥

ताम्बूलीनां दलैस्तत्र रचितापानभूमयः ।
नारिकेलासवं योधाः शात्रवं च पपुर्यशः ॥ ४२ ॥

तत्र महेन्द्राद्रौ युध्यन्त इति योधाः । पचाद्यच् । रचितापानभूमयो रचिताः कल्पिता आपानभूमयः । पानयोग्यप्रदेशा यैस्ते तथोक्ताः सन्तो नारिकेलासवं नारिकेलमद्यं ताम्बूलीनां नागवल्लीनां दलैः पपुः । तत्र विजह्रुरित्यर्थः । शात्रवं यशश्च पपुः । जह्रुरित्यर्थः ॥ ४२ ॥

गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥ ४३ ॥

धर्मविजयी धर्मार्थं विजयशीलः स नृपो रघुः । गृहीतप्रतिमुक्तस्य गृहीतश्चासौ प्रतिमुक्तश्च गृहीतप्रतिमुक्तः । तस्य महेन्द्रनाथस्य कालिङ्गस्य श्रियं जहार । धर्मार्थमिति भावः । मेदिनीं तु न जहार । शरणागतवात्सल्यादिति भावः ॥ ४३ ॥

ततो वेलातटेनैव फलवत्पूगमालिना ।
अगस्त्याचरितामाशामनाशास्यजयो ययौ ॥ ४४ ॥

ततः प्राचीविजयानन्तरं फलवत्पूगमालिना फलितक्रमुकश्रेणीमता व्रीह्यादित्वादिनि प्रत्ययः । वेलातटेन वेलायाः समुद्रकूलस्य तटेनोपान्तेनैवागस्त्येना-

चरितामाशां दक्षिणां दिशमनाशास्यजयः । अयत्नसिद्धत्वादप्रार्थनीयजयः सन् । ययौ। 'अगस्त्यो दक्षिणामाशामाश्रित्य नभसि स्थितः । वरुणस्यात्मजो योगी विन्ध्यवातापिमर्दनः, इति ब्रह्मपुराणे ॥ ४४ ॥

स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत् ॥ ४५ ॥

स रघुः । गजदानसुगन्धिना गजानां दानेन मदेन सुगन्धिना सुरभिगन्धिना । 'गन्धस्य' इत्यादिनेकारादेशः समासान्तः । यद्यपि गन्धस्येत्वे तदेकान्तग्रहणं कर्तव्यमिति नैसर्गिकगन्धविवक्षायामेवेकारादेशः । तथापि निरङ्कुशाः कवयः । तथा माघकाव्ये—'ववुरयुक्छदगुच्छसुगन्धयः सततमास्ततगानगिरोऽलिभिः' (६, ५०) । नैषधे च—'अयं हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा' (६ । ६३) इति । 'न कर्मधारयान्मत्वर्थीयः' इति निषेधादिनिप्रत्ययपक्षोऽपि जघन्य एव। सैन्यपरिभोगेण सेनायां समवेताः सैन्याः । 'सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते' इत्यमरः । 'सेनाया वा' इति ण्यप्रत्ययः। तेषां परिभोगेन कावेरीं नाम सरितं सरितां पत्युः समुद्रस्य शङ्कनीयां न विश्वसनीयामिवाकरोत् । संभोगलिङ्गदर्शनाद्भर्तुरविश्वासो भवतीति भावः ॥ ४५ ॥

बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः ।
मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः ॥ ४६ ॥

विजिगीषोर्विजेतुमिच्छोर्गताध्वनस्तस्य रघोर्बलैः सैन्यैः । 'बलं शक्तिर्बलं सैन्यम्' इति यादवः । मारीचोद्भ्रान्तहारीता मारीचेषु मरीचवनेषूद्भ्रान्ताः परिभ्रान्ता हारीताः पक्षिविशेषा यासु ताः । तेषां विशेषा हारीतो मद्गुः कारण्डवः प्लवः' इत्यमरः । मलयाद्रेरुपत्यका आसन्नभूमयः । 'उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका' इत्यमरः । 'उपाधिभ्यां त्यकन्' इत्यादिना त्यकन्प्रत्ययः । अध्युषिता उपत्यकासूषितमित्यर्थः । 'उपान्वध्याङ्वसः' इति कर्मत्वम् ॥ ४६ ॥

ससञ्जुरश्वक्षुण्णानामेलानामुत्पतिष्णवः ।
तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः ॥ ४७ ॥

अश्वक्षुण्णानाम् अश्वैः क्षुण्णानामेलालतानामुत्पतिष्णव उत्पतनशीलाः ।

'अलंकृञ्' इत्यादिनेष्णुच्प्रत्ययः । फलरेणवः फलरजांसि तुल्यगन्धिषु समानगन्धिषु । सर्वधनादिलादिन्नन्तो बहुव्रीहिः । मत्तेभकटेषु मत्तेभानां कटेषु ससञ्जुः सक्ताः । 'गजगण्डे कटौ' इति कोषः ॥ ४७ ॥

भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ।
नास्रसत्करिणां ग्रैवं त्रिपदीछेदिनामपि ॥ ४८ ॥

चन्दनानां चन्दनद्रुमाणां भोगिवेष्टनमार्गेषु सर्पवेष्टनाञ्चिह्नेषु समर्पितं सज्जितं त्रिपदीछेदिनां पादशृङ्खलच्छेदकानामपि । 'त्रिपदी पादबन्धनम्' इति यादवः । करिणाम् । ग्रीवासु भवं ग्रैवं कण्ठबन्धनम् । 'ग्रीवाभ्योऽण्च्' इत्यण्प्रत्ययः । नास्रसन्न स्रस्तमभूत् । 'द्युद्भ्यो लुङि' इति परस्मैपदे पुषादित्वादङ् । 'अनिदिताम्—' इति नकारलोपः ॥ ४८ ॥

दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥ ४९ ॥

दक्षिणस्यां दिशि रवेरपि तेजो मन्दायते मन्दं भवति लोहितादित्वात्क्यष्प्रत्ययः । 'वा क्यषः' इत्यात्मनेपदम् । दक्षिणायने तेजोमान्द्यादिति भावः । तस्यामेव दिशि पाण्ड्याः । पाण्डूनां जनपदानां राजानः पाण्ड्याः । पाण्डोर्ड्यण्वक्तव्यः । रघोः प्रतापं न विषेहिरे न सोढवन्तः । सूर्यविजयिनोऽपि विजितवानिति नायकस्य महानुत्कर्षो गम्यते ॥ ४९ ॥

ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ।
ते निपत्य ददुस्तस्मै यशः स्वमिव संचितम् ॥ ५० ॥

ते पाण्ड्यास्ताम्रपर्णीसमेतस्य ताम्रपर्ण्या नद्या समेतस्य संगतस्य महोदधेः संबन्धि संचितं मुक्तासारं मौक्तिकवरम् । 'सारो बले स्थिरांशे न्याय्ये क्लीबं वरे त्रिषु' इत्यमरः । स्वं स्वकीयं संचितं यश इव । तस्मै रघवे निपत्य प्रणिपत्य ददुः । यशसः शुभ्रत्वादौपम्यम् । ताम्रपर्णीसंगमे मौक्तिकोत्पत्तिरिति प्रसिद्धम् ॥ ५० ॥

स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥ ५१ ॥

असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता ।

नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत् ॥ ५२ ॥

युग्ममेतत् । असह्यविक्रमः स रघुस्तटेषु सानुष्वालीनचन्दनौ व्याप्तचन्दनद्रुमौ । 'गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्' इत्यमरः । स्तनपक्षे प्रान्तेषु व्याप्तचन्दनानुलेपौ । तस्या दक्षिणस्या दिशः स्तनाविव स्थितौ मलयदर्दुरौ नाम शैलौ यथाकामं यथेच्छं निर्विश्योपभुज्य 'निर्वेशो भृतिभोगयोः' इत्यमरः । उदकान्यस्य सन्तीत्युदन्वानुदधिः । 'उदन्वानुदधौ च' इति निपातः । उदन्वता दूरान्मुक्तं दूरतस्त्यक्तम् । 'स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन' इति समासः । 'पञ्चम्याः स्तोकादिभ्यः' इत्यलुक् । स्रस्तांशुकं मेदिन्या नितम्बमिव स्थितं सह्यं सह्याद्रिमलङ्घयत्प्राप्तोऽतिक्रान्तो वा ॥ ५१ ॥ ५२ ॥

संप्रति प्रतीचीं दिशमभिययावित्याह—

तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः ।

रामास्त्रोत्सारितोऽप्यासीत्सह्यलग्न इवार्णवः ॥ ५३ ॥

अपरान्तजयोद्यतैर् अपरान्तानां पाश्चात्यानां जय उद्यतैरुद्युक्तैः । 'अपरान्तास्तु पाश्चात्यास्ते च सूर्पारिकादयः' इति यादवः । विसर्पद्भिर्गच्छद्भिस्तस्य रघोरनीकैः सैन्यैः । 'अनीकं तु रणे सैन्ये' इति विश्वः । अर्णवो रामास्त्रोत्सारितो रामस्य जामदग्न्यस्यास्त्रैरुत्सारितः परिसारितोऽपि सह्यलग्न इवासीत् । सैन्यं द्वितीयोऽर्णव इवादृश्यतेति भावः ॥ ५३ ॥

भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।

अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥ ५४ ॥

तेन रघुणा भयोत्सृष्टविभूषाणां भयेनोत्सृष्टविभूषाणां परिहृतभूषणानां केरलयोषितां केरलाङ्गनानामलकेषु चमूरेणुः सेनारजश्चूर्णस्य कुङ्कुमादिरजसः प्रतिनिधीकृतः । एतेन योषितां पलायनं चमूनां च तदनुधावनं ध्वन्यते ॥ ५४ ॥

मुरलामारुतोद्धूतमगमत्कैतकं रजः ।

तद्योधवारबाणानामयत्नपटवासताम् ॥ ५५ ॥

मुरलामारुतोद्धूतं मुरला नाम केरलदेशेषु काचिन्नदी । मुरलामारु-

तोद्भूतम्' इति केचित्पठन्ति । तस्या मारुतेनोद्भूतमुत्थापितं कैतकं केतकीसंबन्धि रजस्तद्योधवारबाणानां रघुभटकञ्चुकानाम् । 'कञ्चुको वारबाणोऽस्त्री' इत्यमरः । अयत्नपटवासतामयत्नसिद्धवस्त्रवासनाद्रव्यत्वमगमत् । 'पिष्टातः पटवासकः' इत्यमरः ॥ ५५ ॥

अभ्यभूयत वाहानां चरतां गात्रसिञ्जितैः ।
वर्मभिः पवनोद्धूतराजतालीवनध्वनिः ॥ ५६ ॥

चरतां गच्छतां वाहानां वाजिनाम् । 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरः । गात्रसिञ्जितैर्गात्रेषु शब्दायमानैः । कर्तरि क्तः । 'गात्रसञ्जितः' इति वा पाठः । सञ्जतेर्ण्यन्तात्कर्मणि क्तः । वर्मभिः कवचैः । 'मर्मरः' इति पाठे वाहानां गात्रसिञ्जितैर्गात्रध्वनिभिरित्यर्थः । मर्मरो मर्मरायमाण इति ध्वनेर्विशेषणम् । पवनोद्धूतराजतालीवनध्वनिः कम्पितानां राजतालीवनानां ध्वनिरभ्यभूयत तिरस्कृतः ॥ ५६ ॥

खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेषु करिणां पेतुः पुंनागेभ्यः शिलीमुखाः ॥ ५७ ॥

खर्जूरीस्कन्धनद्धानाम् खर्जूरीणां तृणद्रुमविशेषाणाम् । 'खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः' इत्यमरः । स्कन्धेषु प्रकाण्डेषु । 'अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधेस्तरोः' इत्यमरः । नद्धानां बद्धानां करिणां मदोद्गारसुगन्धिषु मदोद्गारेण मदस्रावेण सुगन्धिषु । 'गन्धस्य' इत्यादिनेकारः । कटेषु गण्डेषु पुंनागेभ्यो नागकेशरेभ्यः पुंनागपुष्पाणि विहाय । ल्यब्लोपे पञ्चमी । शिलीमुखा अलयः पेतुः । 'अलिबाणौ शिलीमुखौ' इत्यमरः । ततोऽपि सौगन्ध्यातिशयादिति भावः ॥ ५७ ॥

अवकाशं किलोदन्वान्रामायाभ्यर्थितो ददौ ।
अपरान्तमहीपालव्याजेन रघवे करम् ॥ ५८ ॥

उदन्वानुदधी रामाय जामदग्न्याय अभ्यर्थितो याचितः सन् । अवकाशं स्थानं ददौ किल । किलेति प्रसिद्धौ । रघवे त्वपरान्तमहीपालव्याजेन करं बलिं ददौ । 'बलिहस्तांशवः कराः' इत्यमरः । अपरान्तानां समुद्रमध्यदेशवर्तित्वात्तैर्दत्ते

करे समुद्रदत्तत्वोपचारः । करदानं च भीत्या न तु याञ्चयेति रामाद्रघोरुत्कर्षः ॥५८॥

मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम् ।
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः ॥ ५९ ॥

तत्र स रघुः मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम् मत्तानामिभानां रदनोत्कीर्णानि दन्तक्षतान्येव । भावे क्तः । व्यक्तानि स्फुटानि विक्रमलक्षणानि पराक्रमचिह्नानि विजयवर्णालिस्थानानि यस्मिंस्तं तथोक्तं त्रिकूटमेवोच्चैर्जयस्तम्भं चकार । गाढप्रकाशास्त्रिकूटोऽद्रिरेवोत्कीर्णवर्णस्तम्भ इव रघोर्जयस्तम्भोऽभूदित्यर्थः ॥ ५९ ॥

पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ।
इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ॥ ६० ॥

ततः स रघुः । संयमी योगी तत्त्वज्ञानेनेन्द्रियाख्यानिन्द्रियनामकान्रिपूनिव । पारसीकान्राज्ञो जेतुं स्थलवर्त्मना प्रतस्थे न तु निर्दिष्टेनापि जलपथेन । समुद्रयानस्य निषिद्धत्वादिति भावः ॥ ६० ॥

यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकालजलदोदयः ॥ ६१ ॥

स रघुर् यवनीमुखपद्मानां यवनीनां यवनस्त्रीणाम् । 'जातेरस्त्रीविषयादयोपधात्' इति ङीप् । मुखानि पद्मानीव मुखपद्मानि । उपमितसमासः । तेषां मधुमदं मधुना मद्येन यो मदो मदरागः । कार्यकारणभावयोरभेदेन निर्देशस्तं न सेहे । कमिव । अकालजलदोदयः अकाले प्रावृड्व्यतिरिक्ते काले जलदोदयः प्रायेण प्रावृषि पद्मविकाशस्याप्रसक्तत्वादब्जानां सम्बन्धिनं बालातपमिव । अब्जहितत्वादब्जसम्बन्धित्वं सौरातपस्य ॥ ६१ ॥

संग्रामस्तुमुलस्तस्य पाश्चात्त्यैरश्वसाधनैः ।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥ ६२ ॥

तस्य रघोरश्वसाधनैर्वाजिसैन्यैः । 'साधनं सिद्धिसैन्ययोः' इति हैमः । पश्चाद्भवैः पाश्चात्त्यैर्यवनैः सह । 'दक्षिणापश्चात्पुरसः' इति त्यक् । सहार्थे

तृतीया । शार्ङ्गकूजितविज्ञेयप्रतियोधे शृङ्गाणां विकाराः शार्ङ्गाणि धनूंषि । तेषां कूजितैः शब्दैः । 'शार्ङ्गं पुनर्धनुषि शार्ङ्गिणः । जये च शृङ्गविहिते चापेऽप्याह विशेषतः' इति केशवः । अथवा शार्ङ्गैः शृङ्गसंबन्धिभिः कूजितैर्विज्ञेया अनुमेयाः प्रतियोधाः प्रतिभटा यस्मिंस्तस्मिन्रजसि तुमुलः संग्रामः संकुलं युद्धमभूत् । 'तुमुलं रणसंकुले' इत्यमरः ॥ ६२ ॥

भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ ६३ ॥

स रघुर्भल्लापवर्जितैर्बाणविशेषकृत्तैः । 'स्नुहीदलफलो भल्ल' इति यादवः । श्मश्रुलैः प्रवृद्धमुखरोमवद्भिः । 'सिध्मादिभ्यश्च' इति लच्प्रत्ययः । तेषां पाश्चात्यानां शिरोभिः । सरघाव्याप्तैः सरघाभिर्मधुमक्षिकाभिर्व्याप्तैः । 'सरघा मधुमक्षिका' इत्यमरः । क्षुद्राः सरघाः । 'क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका' इत्यमरः । क्षौद्रपटलैः क्षुद्राभिः कृतानि क्षौद्राणि मधूनि । 'मधु क्षौद्रं माक्षिकादि' इत्यमरः । 'क्षुद्राभ्रमरवटरपादपादञ्' इति संज्ञायामञ्प्रत्ययः । तेषां पटलैः संचयैरिव । 'पटलं तिलके नेत्ररोगे छन्दसि संचये । पिटके परिवारे च' इति हैमः । महीं तस्ताराच्छादयामास ॥ ६३ ॥

अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ।
प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ॥ ६४ ॥

शेषा हतावशिष्टा अपनीतशिरस्त्राणा अपसारितशीर्षण्याः सन्तः । 'शीर्षकम् । शीर्षण्यं च शिरस्त्रे' इत्यमरः । शरणागतलक्षणमेतत् । तं रघुं शरणं ययुः । यथाहि । महात्मनां संरम्भः कोपः । 'संरम्भः संभ्रमे कोपे' इति विश्वः । प्रणिपातप्रतीकारः प्रणिपातः प्रणतिरेव प्रतीकारो यस्य स हि । महतां परकीयमौद्धत्यमेवासह्यं न तु जीवितमिति भावः ॥ ६४ ॥

विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमम् ।
आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ॥ ६५ ॥

तद्योधास्तस्य रघोर्योधा भटा आस्तीर्णाजिनरत्नासु द्राक्षावलयानां भूमिषु । 'मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च' इत्यमरः । मधुभिर्द्रा-

त्वाफलप्रकृतिकैर्मरुद्भिर्विजयश्रमं युद्धखेदं विनयन्ते स्म । अपनीतवन्तः । 'कर्तृस्थे चाशरीरे कर्मणि' इत्यात्मनेपदम् । 'लट् स्मे' इति भूतार्थे लट् ॥ ६५ ॥

ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्रसानिव ॥ ६६ ॥

ततो रघुर्भास्वान्सूर्य इव शरैर्बाणैरुस्रैः किरणैरिव । 'किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः' इत्यमरः । उदीच्यानुदग्भवान्नृपान्रसानुदकानीवोद्धरिष्यन्कौबेरीं कुबेरसंबन्धिनीं दिशमुदीचीं प्रतस्थे । अनेकेनवशब्देनेयमुपमा । यथाह दण्डी 'एकानेकेवशब्दत्वात्सा वाक्यार्थोपमा द्विधा' इति ॥ ६६ ॥

विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः ।
दुधुवुर्वाजिनः स्कन्धांल्लग्नकुङ्कुमकेसरान् ॥ ६७ ॥

सिन्धुर्नाम काश्मीरदेशेषु कश्चिन्नदविशेषः । 'देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्' इत्यमरः । सिन्धुतीरविचेष्टनैः सिन्धोस्तीरे विचेष्टनैरङ्गपरिवर्तनैर्विनीताध्वश्रमास्तस्य रघोर्वाजिनोऽश्वा लग्नकुङ्कुमकेसरान् लग्नाः कुङ्कुमकेशराः कुङ्कुमकुसुमकिञ्जल्का येषां तान् । यद्वा लग्नकुङ्कुमाः केसराः सटा येषां तान् । 'अथ कुङ्कुमम् । काश्मीरजन्म' इत्यमरः । 'केसरो नागकेसरे । तुरंगसिंहयोः स्कन्धकेशेषु बहुलद्रुमे । पुंनागवृक्षे किञ्जल्के स्यात्' इति हैमः । 'स्कन्धान्कायान् । 'स्कन्धः प्रकाण्डे कायेंऽसे विज्ञानादिषु पञ्चसु । नृपे समूहे व्यूहे च' इति हैमः । दुधुवुः कम्पयन्ति स्म ॥ ६७ ॥

तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ॥ ६८ ॥

तत्रोदीच्यां दिशि भर्तृषु व्यक्तविक्रमम् । भर्तृवधेन स्फुटपराक्रममित्यर्थः । रघुचेष्टितं रघुव्यापारः । हूणावरोधानां हूणा जनपदाख्याः क्षत्रियाः । तेषामवरोधा अन्तःपुरस्त्रियः । तासां कपोलपाटलादेशि कपोलेषु पाटलस्य पाटलिम्नस्ताडनादिकृतारुण्यस्यादेश्युपदेशकं बभूव । अथवा पाटल आदेरयदेष्टा यस्य तद्बभूव । स्वयं लक्ष्यायत इत्यर्थः ॥ ६८ ॥

काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः ।
गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ॥ ६९ ॥

काम्बोजा राजानः समरे तस्य रघोर्वीर्यं प्रभावम् । 'वीर्यं तेजः प्रभावयोः' इति हैमः । सोढुमनीश्वरा अशक्ताः सन्तः । गजालानपरिक्लिष्टैः गजानामालानं बन्धनम् । भावे ल्युटि 'विभाषा लीयतेः' इत्यात्वम् । तेन परिक्लिष्टैरक्षोटैर्वृक्षविशेषैः सार्धमानताः ॥ ६९ ॥

तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः ।
उपदा विविशुः शश्वन्नोत्सेकाः कोसलेश्वरम् ॥ ७० ॥

तेषां काम्बोजानां सदश्वभूयिष्ठाः साध्वश्वैर्भूयिष्ठा बहुलास्तुङ्गा द्रविणराशयो द्रविणानां हिरण्यानाम् । 'हिरण्यं द्रविणं द्युम्नम्' इत्यमरः । राशय एवोपदा उपायनानि । 'उपायनमुपग्राह्यमुपहारस्तथोपदा' इत्यमरः । कोसलेश्वरं कोसलदेशाधिपतिं तं रघुं शश्वदसकृद्विविशुः । 'मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समाः' इत्यमरः । तथाप्युत्सेका गर्वास्तु न विविशुः । सत्यपि गर्वकारणे न जगर्वेत्यर्थः ॥ ७० ॥

ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।
वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ॥ ७१ ॥

ततोऽनन्तरमश्वसाधनः सन्गौर्या गुरुं पितरं शैलं हिमवन्तम् । उद्धूतैरश्वखुरोद्धूतैर् धातुरेणुभिर् धातूनां गैरिकादीनां रेणुभिस्तत्कूटांस्तस्य शृङ्गाणि । 'कूटोऽस्त्री शिखरं शृङ्गम्' इत्यमरः । वर्धयन्निव । आरुरोह । उत्पतद्धूलिदर्शनाद्गिरिशिखरवृद्धिभ्रमो जात इति भावः ॥ ७१ ॥

शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसंभ्रमम् ।
गुहाशयानां सिंहानां परिवृत्त्यावलोकितम् ॥ ७२ ॥

तुल्यसत्त्वानां सैन्यैः समानबलानाम् । गुहाशयानां गुहासु शेरत इति गुहाशयास्तेषाम् । 'अधिकरणे शेतेः' इत्यच्प्रत्ययः । 'दरी तु कन्दरो वास्त्री देवखातबिले गुहा' इत्यमरः । सिंहानां हरीणाम् । 'सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः' इत्यमरः । संबन्धि परिवृत्य परावृत्यावलोकितं ग्रीवाभङ्गेनैव ग्रीवाभङ्ग-

नावलोकनं कर्तुं सैन्यघोषे सेनाकलकले संभ्रमकारणे सत्यप्यसंभ्रममन्तःक्षोभविरहितम् । नञः प्रसज्यप्रतिषेधेऽपि समास इष्यते । शशंस कथयामास । सैन्येभ्य इत्यर्थाल्लभ्यते । बाह्यचेष्टितमेव मनोवृत्तेरनुमापकमिति भावः । असंभ्रान्तत्वे हेतुस्तुल्यसत्त्वानामिति । नहि समबलः समबलाद्बिभेतीति भावः ॥ ७२ ॥

भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः ।
गङ्गाशीकरिणो मार्गे मरुतस्तं सिषेविरे ॥ ७३ ॥

भूर्जेषु भूर्जपत्रेषु । 'भूर्जपत्रो भुजो भूर्जो मृदुत्वक्चर्मिका मता' इति यादवः । मर्मरः शुष्कपर्णध्वनिः । 'मर्मरः शुष्कपर्णानाम्' इति यादवः । अयं च शुक्लादिशब्दवद्गुणिन्यपि वर्तते । प्रयुज्यते च 'मर्मरैरगुरुधूपगन्धिभिः' इति । अतो मर्मरीभूता मर्मरशब्दवन्तो भूता इत्यर्थः । कीचकध्वनिहेतवः कीचकानां वेणुविशेषाणां ध्वनिहेतवः । श्रोत्रसुखाश्चेति भावः । गङ्गाशीकरिणः । शीतला इत्यर्थः । मरुतो वाता मार्गे तं सिषेविरे ॥ ७३ ॥

विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ।
दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः ॥ ७४ ॥

सैनिकाः सेनायां समवेताः । प्राग्वहतीयष्ठक्प्रत्ययः । नमेरूणां सुरपुन्नागानां छायासु निषण्णमृगनाभिभिर् निषण्णानां दृषदुपविष्टानां मृगाणां कस्तूरीमृगाणां नाभिभिर्वासितोत्सङ्गाः सुरभिततला दृषदः शिला अध्यास्याधिष्ठाय । 'अधिशीङ्स्थासां कर्म' इति कर्म । दृषत्स्वधिरुह्येत्यर्थः । विशश्रमुर्विश्रान्ताः ॥ ७४ ॥

सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः ।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ॥ ७५ ॥

सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः सरलेषु देवदारुविशेषेष्वासक्तानि यानि मातङ्गानां गजानाम् । ग्रीवासु भवानि ग्रैवेयाणि कण्ठशृङ्खलानि । 'ग्रीवाभ्योऽण्च' इति चकाराड्ढञ्प्रत्ययः । तेषु स्फुरितत्विषः प्रतिफलितभास ओषधयो ज्वलन्तो ज्योतिर्लताविशेषा नक्तं रात्रौ नेतुर्नायकस्य रघोरस्नेहदीपिकास्तैलनिरपेक्षाः प्रदीपा आसन् ॥ ७५ ॥

तस्योत्सृष्टनिवासेषु कण्ठरज्जुक्षतत्वचः।
गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः॥ ७६ ॥

तस्य रघोर् उत्सृष्टनिवासेषु उत्सृष्टेषुज्झितेषु निवासेषु सेनानिवेशेषु कण्ठरज्जुक्षतत्वचः कण्ठरज्जुभिर्गजग्रैवैः क्षता निष्पिष्टास्त्वचो येषां ते देवदारवः किरातेभ्यो वनचरेभ्यो गजवर्ष्म गजानां वर्ष्म प्रमाणम् । 'वर्ष्म देहप्रमाणयोः' इत्यमरः । शशंसुः कथितवन्तः । देवदारुस्कन्धत्वक्क्षतैर्गजानामौन्नत्यमनुमीयत इत्यर्थः ॥ ७६ ॥

तत्र जन्यं रघोर्घोरं पर्वतीयैर्गणैरभूत् ।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ॥ ७७ ॥

तत्र हिमाद्रौ रघोः । पर्वते भवैः पर्वतीयैः । 'पर्वताच्च' इति छप्रत्ययः । गणैरुत्सवसंकेताख्यैः सप्तभिः सह । 'गणानुत्सवसंकेतानजयत्सप्त पाण्डवः' इति महाभारते । नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् । नाराचानां बाणविशेषाणां क्षेपणीयानां भिन्दिपालानामश्मनां च निष्पेषेण संघर्षेणोत्पतिता अनला यस्मिंस्तत्तथोक्तम् । 'क्षेपणीयो भिन्दिपालः खड्गो दीर्घो महाफलः' इति यादवः । घोरं भीमं जन्यं युद्धमभूत् । 'युद्धमायोधनं जन्यम्' इत्यमरः ॥ ७७ ॥

शरैरुत्सवसंकेतान्स कृत्वा विरतोत्सवान् ।
जयोदाहरणं बाह्वोर्गापयामास किन्नरान् ॥ ७८ ॥

स रघुः शरैर्बाणैरुत्सवसंकेतान्नाम गणान्विरतोत्सवान्कृत्वा । जित्वेत्यर्थः । किंनरान्बाह्वोः स्वभुजयोर्जयोदाहरणं जयख्यापकं प्रबन्धविशेषं गापयामास । 'गतिबुद्धि' इत्यादिना किंनराणां कर्मत्वम् ॥ ७८ ॥

परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥ ७९ ॥

तेषु गणेषूपायनयुक्ताः पाणयो येषां तेषु उपायनपाणिषु सत्सु परस्परेणान्योन्यं राज्ञा हिमवतः सारो धनरूपो विज्ञातः । हिमाद्रिणापि राज्ञः सारो

बलरूपो विज्ञातः । एतेन तत्रत्यवस्तूनामनर्घ्यत्वं गणानामभूतपूर्वश्च पराजय इति ध्वन्यते ॥ ७९ ॥

तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः ।
पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ॥ ८० ॥

स रघुस्तत्र हिमाद्रावक्षोभ्यमधृष्यं यशोराशिं निवेश्य निधाय । पौलस्त्यतुलितस्य पौलस्त्येन रावणेन तुलितस्य चालितस्याद्रेः कैलासस्य ह्रियमादधानो जनयन्निव । अवरुरोहावततार । कैलासमगत्वैव प्रतिनिवृत्त इत्यर्थः । नहि शूराः परेण पराजितमभियुञ्जन्त इति भावः ॥ ८० ॥

चकम्पे तीर्णलौहित्ये तस्मिन्प्राग्ज्योतिषेश्वरः ।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ॥ ८१ ॥

तस्मिन्रघौ । तीर्णा लौहित्या नाम नदी येन तस्मिंस्तीर्णलौहित्ये सति । प्राग्ज्योतिषेश्वरः प्राग्ज्योतिषाणां जनपदानामीश्वरस्तस्य रघोर्गजानामालानतां प्राप्तैः कालागुरुद्रुमैः कृष्णागुरुवृक्षैः सह चकम्पे कम्पितवान् ॥ ८१ ॥

न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम् ।
रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम् ॥ ८२ ॥

स प्राग्ज्योतिषेश्वरो रुद्धार्कमावृतसूर्यम् । अधारावर्षदुर्दिनम् अधारावर्षं च तद्दुर्दिनं च धारावृष्टिं विना दुर्दिनीभूतम् । अस्य रघो रथवर्त्मरजोऽपि न प्रसेहे । पताकिनीं सेनां तु कुत एव प्रसेहे । न कुतोऽपीत्यर्थः ॥ ८२ ॥

तमीशः कामरूपाणामत्याखण्डलविक्रमम् ।
भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ॥ ८३ ॥

कामरूपाणां नाम देशानामीशोऽत्याखण्डलविक्रममतीन्द्रपराक्रमं तं रघुम् । भिन्नाः स्रवन्मदाः कटा गण्डा येषां तैर्नागैर्गजैः साधनैः भेजे । नागान्दत्त्वा शरणं गत इत्यर्थः । कीदृशैर्नागैः ? यैरन्यान्रघुव्यतिरिक्तान्नृपानुपरुरोध । शूराणामपि शूरो रघुरिति भावः ॥ ८३ ॥

कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम् ।
रत्नपुष्पोपहारेण छायामानर्च पादयोः ॥ ८४ ॥

कामरूपेश्वरो हेमपीठस्याधिदेवतां तस्य रघोः पादयोश्छायां कनकमयपादपीठव्यापिनीं कान्तिं रत्नपुष्पोपहारेण रत्नान्येव पुष्पाणि तेषामुपहारेण समर्पणेनानर्चार्चयामास ॥ ८४ ॥

इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम् ।
रजो विश्रामयन्राज्ञां छत्रशून्येषु मौलिषु ॥ ८५ ॥

जिष्णुर्जयशीलः । 'ग्लाजिस्थश्च ग्स्नुः' इति ग्स्नुप्रत्ययः । स रघुरितीत्थं दिशो जित्वा रथोद्धतं रथैरुद्धतं रजश्छत्रशून्येषु रघोरेकच्छत्रत्वादिति भावः । राज्ञां मौलिषु किरीटेषु । 'मौलिः किरीटे धम्मिल्ले चूडाकङ्केलिमूर्धजे' इति हैमः । विश्रामयन् । संक्रामयन्नित्यर्थः । न्यवर्तत निवृत्तः ॥ ८५ ॥

स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥ ८६ ॥

स रघुः सर्वस्वं दक्षिणा यस्य तं सर्वस्वदक्षिणम् । 'विश्वजित्सर्वस्वदक्षिणः' इति श्रुतेः । विश्वजितं नाम यज्ञमाजह्रे कृतवानित्यर्थः । युक्तं चैतदित्याह—सतां साधूनाम् । वारिमुचां मेघानामिव आदानमर्जनं विसर्गाय त्यागाय हि पात्रविनियोगायेत्यर्थः ॥ ८६ ॥

सत्रान्ते सचिवसखः पुरस्क्रियाभि-
गुर्वीभिः शमितपराजयव्यलीकान् ।
काकुत्स्थश्चिरविरहोत्सुकावरोधा-
न्राजन्यान्स्वपुरनिवृत्तयेऽनुमेने ॥ ८७ ॥

काकुत्स्थो रघुः सत्रान्ते यज्ञान्ते । 'सत्रमाच्छादने यज्ञे सदादाने धनेऽपि च' इत्यमरः । सचिवानाममात्यानां सखेति सचिवसखः सन् । 'सचिवो भृतकेऽमात्ये' इति हैमः । तेषामत्यन्तानुसरणद्योतनार्थं राज्ञः सखित्वव्यपदेशः । 'राजाहःसखिभ्यष्टच्' । गुर्वीभिर्महतीभिः । 'गुरुर्महत्याङ्गिरसे पित्रादौ धर्मदेशके' इति हैमः । पुरस्क्रियाभिः पूजाभिः शमितपराजयव्यलीकान् शमितं पराजयेन व्यलीकं दुःखं वैलक्ष्यं वा येषां तान् । 'दुःखं वैलक्ष्ये व्यलीकम्' इति यादवः । चिरविरहोत्सुकावरोधान् चिरविरहेणोत्सुका उत्कण्ठिता अवरोधा अन्तःपुराङ्गना येषां तान्

राजन्यान् राज्ञोऽपत्यानि राजन्याः क्षत्रियास्तान् । 'राजश्वशुराद्यत्' इत्यपत्यार्थे यत्प्रत्ययः। 'मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्' इत्यमरः । स्वपुरनिवृत्तये स्वपुरं प्रति निवृत्तये प्रतिगमनायानुमेनेऽनुज्ञातवान् । प्रहर्षिणीवृत्तमेतत् । तदुक्तम् । 'म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्' इति ॥ ८७ ॥

ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम् ।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥ ८८ ॥

ते राजानः । रेखाध्वजकुलिशातपत्रम् (रेखा एव ध्वजाश्च कुलिशानि चातपत्राणि च)। ध्वजाद्याकाररेखा इत्यर्थः । तानि चिह्नानि यस्य तत्तथोक्तम् । प्रसादेनैव लभ्यं प्रसादलभ्यम् । सम्राजः सार्वभौमस्य रघोश्चरणयुगं प्रस्थानप्रणतिभिः प्रस्थाने प्रयाणसमये याः प्रणतयो नमस्कारास्ताभिः करणैः । अङ्गुलीषु मौलिस्रक्च्युतमकरन्दरेणुगौरम् मौलिषु केशबन्धनेषु याः स्रजो माल्यानि ताभ्यश्च्युतैर्मकरन्दैः पुष्परसैः । 'मकरन्दः पुष्परसः' इत्यमरः । रेणुभिः परागैश्च 'परागः सुमनोरजः' इत्यमरः । गौरं गौरवर्णं चक्रुः ॥ ८८ ॥

इति महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया व्याख्यया समेतो महाकविश्रीकालिदासकृतौ रघुवंशे महाकाव्ये रघुदिग्विजयो नाम चतुर्थः सर्गः ॥

श्रीभर्तृहरिविरचितनीतिशतकम् ।

श्रीरामचन्द्रबुधेन्द्रविरचितया सहृदयानन्दिन्याख्यया व्याख्यया समेतम् ।

अथ मङ्गलम् ।

इह खल्वत्रभवानशेषविशेषसारपारदृश्वा विश्वातिशायिगुणगरिमावतारो भर्तृहरिनामा महायोगीश्वरो निजयोगमहिमानुसारेण करतलामलकीकृताखिलविरिञ्चिप्रपञ्चस्तृणकणमिव जगज्जालमालोकयन्, परमकारुणिको लोकव्यवहारपरिज्ञानखिन्नान्तःकरणो लोकानुजिघृक्षया नीति-शृङ्गार-वैराग्यवर्णनप्रख्यं सुभाषितत्रिशत्याख्यं कंचित्प्रबन्धं प्रारभमाणः, तत्परिपन्थिनिर्मन्थनद्वारा परिसमाप्तिप्रचयगमनलक्षणफलमाशासानः, शिष्टाचारपरिप्राप्तविशिष्टपरंज्योतीरूपेष्टदेवतानमस्काराकारं मङ्गलमादौ निबध्नाति—

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥ १ ॥

दिगिति । दिशः प्राच्यादिदिक्प्रदेशाः । काला भूतभविष्यद्वर्तमानरूपाः । आदिशब्दसंगृहीतानि वस्तूनि तथा च दिक्काला आदयो येषां तानि दिक्कालादीनि । अतद्गुणसंविज्ञानो बहुव्रीहिः । अन्यथा तेषामप्राधान्येन विनाभाने शास्त्रविरोधः स्यात् । तैरनवच्छिन्नापरिक्लृप्ता । विभुत्वान्नित्यत्वादेकत्वाच्च देशतः कालतो वस्तुतश्चापरिच्छिन्नेत्यर्थः । अत एव अनन्तापरिमिता । त्रिविधपरिच्छेदशून्यत्वादखण्डदण्डायमानेत्यर्थः । एतेन सजातीयविजातीयस्वगतभेदत्रयराहित्यमर्थात्सूचितमिति ज्ञेयम् । 'आनन्द–' इति पाठ आनन्दचिच्छब्दयोर्द्वन्द्वान्ते श्रूयमाणो मात्रशब्दः प्रत्येकं संबध्यते । तथा चानन्दमात्रा आनन्दमयी, चिन्मात्रा ज्ञानघना च । चिदेकरसेति यावत् । तादृशी मूर्तिर्यस्य तस्मै । एतद्रूपायेत्यर्थः । 'सत्यं ज्ञानमनन्तं ब्रह्म', 'एकमेवाद्वितीयं ब्रह्म', 'विज्ञानमानन्दं ब्रह्म', 'आनन्दो ब्रह्मेति

व्यजानात्', 'आनन्दमयोऽभ्यासात्' 'सत्यं ज्ञानमनन्तं यत्सानन्दं ब्रह्म केवलम्' इत्यादि श्रुतिस्मृतिकदम्बकमत्र प्रमाणमिति भावः । अत्र बहुव्रीहिराश्रयणीयः । अन्यथा 'इकोऽचि विभक्तौ' इति नुमि 'मूर्तिने' इति स्यात् । न च 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इति न पुंवद्भाव इति वाच्यम् । मूर्तिशब्दस्य नियत-स्त्रीलिङ्गत्वेनाभाषितपुंस्कत्वात् । तस्माद्यथाश्रुतमेव साधु मन्तव्यम् । भाषित-पुंस्कत्वस्यानित्यत्वविवक्षायां तु बहुव्रीहिर्विधीयते तदा न काप्यनुपपत्तिरिति सर्वं सुस्थम् । तथा स्वानुभूतिरात्मानुभव एव एकं मुख्यमद्वितीयं वा मानं स्वप्रकाश-साधनं यस्य तस्मै । स्वयंप्रकाशसंविद्रूपत्वादन्यप्रदीपवत्स्वपरप्रकाशकतया स्वसा-क्षात्कारस्वानुभव एव प्रमाणं न तु घटादेरिव चक्षुरादिप्रामाणिकत्वमिति भावः । एतेन वृत्तिविषयत्वमेव, न तु फलविषयत्वमित्यवधेयम् । तदुक्तमार्यैः—'स्वबोधे-नान्यबोधेच्छा बोधरूपतयात्मनः । न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने' ॥ इति । तथा शान्ताय अविद्यातत्कार्यसंबन्धशून्यत्वात्प्रसन्नाय । 'निष्फलं निष्क्रियं शान्तम्' इत्यादिश्रुतेः । तेजसे ज्योतीरूपाय ब्रह्मणे नमः प्रह्वीभावः । 'मनःस्वस्ति' इत्यादिना चतुर्थी । अत्र 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते, वीरपुरुषाण्यायुष्मत्पुरुषकाणि च भवन्ति, अध्येतारश्च प्रवक्तारो भवन्ति, इति भगवद्भाष्यकारवचनप्रामाण्यात् 'आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मु-खम्' इत्यादिदण्डिवचनाच्चादौ नमस्काररूपम् । अन्ते परब्रह्मस्मरणलक्षणम् । मध्ये तदुभयात्मकं च मङ्गलमाचरितमित्यवगन्तव्यम् । 'अथ शब्दानुशासनम्' इत्यादौ सर्वत्र शास्त्रारम्भे मङ्गलार्थत्वेनाथशब्दप्रयोगदर्शनात्तस्य तदर्थकत्वं च । 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इत्यभिधानात् । 'ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ ॥' इति स्मरणाच्च । तच्च निर्विघ्नप्रारिप्सितपरिसमाप्तिकामेनावश्यं कर्तव्यम् । 'परिसमा-प्तिकामो 'मङ्गलमाचरेत्' इत्यनुमितिश्रुतिबोधितकर्तव्यताकत्वात् । अनुमानं च-मङ्गलं वेदबोधितकर्तव्यताकम्, अलौकिकाविगीतशिष्टाचारविषयकत्वात्, दर्शा-द्याचारवदिति । नन्वन्वयव्यतिरेकाभ्यां तस्य कारणत्वानिश्चयात्कथमवश्यकर्त-व्यताकत्वम् । तथा हि—शाबरभाष्यादौ कृतेऽपि मङ्गले समाप्तेरजातत्वात्,

किरणावल्यादावकृतेऽपि जातत्वादिति चेत्, सत्यम् । क्वचिद्विघ्नबाहुल्येन तत्समसंख्याकमङ्गलाभावात् क्वचित्प्राचीनमङ्गलबाहुल्याच्च व्यत्यय इत्यलमतिप्रसङ्गेन । अत्र चारुत्वेन यथावद्वस्तुवर्णनात्स्वभावोक्तिरलंकारः—'स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम्' इति लक्षणात् । श्लोकाख्यमेतदानुष्टुभं वृत्तम्—'पञ्चमं लघु सर्वेषु सप्तमं द्विचतुर्थयोः । गुरुषट्कं च सर्वेषामेतच्छ्लोकस्य लक्षणम् ॥' इति वचनात् ॥ १ ॥

व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
भेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन संनह्यति ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
मूर्खान्यः प्रतिनेतुमिच्छति बलात्सूक्तैः सुधास्यन्दिभिः ॥२॥

व्यालमिति । असौ पुमान्व्यालं दुष्टगजम् । न तु साधारणजन्तुमित्यर्थः । 'व्यालो दुष्टगजे सर्पे' इति विश्वः । बालमृणालतन्तुभिः कोमलबिसकिसलयसूत्रैः । ईषन्निरोधस्याप्यनुपयुक्तैरिति भावः । रोद्धुं नियन्तुं समुज्जृम्भते कृतप्रयत्नो भवतीत्यर्थः । तथा वज्रमणिं हीराख्यमणिविशेषम् । अलोहलेख्यमपीति भावः । 'हीरो वज्रश्च कथ्यते' इति हलायुधः । शिरीषकुसुमस्यातिकोमलपुष्पविशेषस्य प्रान्तेनाञ्चलेन भेत्तुं विदारयितुं संनह्यति । उद्युक्तो भवतीत्यर्थः । तथा क्षाराम्बुधेर्लवणार्णवस्य, न तु स्वल्पजलाशयस्य, मधुबिन्दुना क्षौद्रविप्रुषा । न त्वविच्छिन्नमधुधारासंपातेनेत्यर्थः । माधुर्यं मधुरगुणं रचयितुं संपादयितुमीहते कांक्षति । कोऽसावित्यत आह—यः पुमान्बलाद्वाक्पाटवात् । सुधास्यन्दिभिरमृतस्राविभिः । अतिमधुरैरित्यर्थः । सूक्तैः प्रियोक्तिभिः । कर्तरि क्तः । मूर्खान्प्रतिनेतुं समाधातुमिच्छति सोऽसाविति संबन्धः । मृणालतन्तुभिर्व्यालनिरोधनादितत्पर इव मूर्खानुनयपरोऽप्यत्यन्ताविवेकीति भावः । अत्यन्तदुष्करं मूर्खप्रसाधनमिति फलितार्थः । अत्र यः प्रतिनेतुमिच्छति वाञ्छति असौ समुज्जृम्भत इत्यादि विशिष्टानुनयेच्छाविजृम्भणादिवाक्यार्थयोर्निर्दिष्टैकत्वासंभवात्सादृश्यलक्षणायामसंभवद्वस्तुसंबन्धो वाक्यार्थः । वृत्तिनिदर्शनाभेदः । न चायं दृष्टान्तः । वाक्यभेदेन प्रतिबिम्बकरणाक्षेपे तस्योत्थानात् । अत्र तु

वाक्यार्थे वाक्यार्थसमारोपाद्वाक्यैकवाक्यतायां तदभाव इत्यलंकारसर्वस्वकारः । शार्दूलविक्रीडितं वृत्तम्—'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति लक्षणात् ॥ २ ॥

यदा किंचिज्ज्ञोऽहं गज इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किंचित्किंचिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ ३ ॥

यदेति । अहं किंचिज्ज्ञोऽल्पज्ञः सन् यदा यस्मिन्समये गज इव मदेन दर्पेणान्धः कर्तव्याकर्तव्यविवेकशून्यः समभवं जातोऽस्मि, तदा तस्मिन्समये सर्वज्ञोऽशेषज्ञोऽस्मीति मम मनोऽवलिप्तं गर्वितमभवत् । 'अल्पविद्यो महागर्वी' इति न्यायादल्पज्ञत्वस्यैव गर्वहेतुत्वादिति भावः । 'अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपि च' इति विश्वप्रकाशः । यदा बुधजनसकाशात् विद्वज्जनमुखादित्यर्थः । 'आख्यातोपयोगे' इत्यपादानत्वात्पञ्चमी । किंचित्किंचित्स्वल्पं स्वल्पम् । शास्त्रबोधिताचारादिकमिति शेषः । अवगतं ज्ञातम्, तदा मूर्खो मूढोऽस्मीति मे मम मदो ज्वर इव व्यपगतो निर्गतः । अभूदिति शेषः । ज्वरवद्विकारकारित्वान्मदस्यैतत्साम्यमित्यवगन्तव्यम् । 'आचार्यवान्पुरुषो वेद' इति श्रवणादाचार्यावगतविद्यस्यैव विवेकसंभवादिति भावः । अल्पज्ञोऽपि सन्यः सर्वज्ञमात्मानं मनुते स एव मूर्खः । यस्तु सर्वज्ञोऽपि मूढमानी भवति स एव विद्वानिति विवेकः । मदो गर्वहेतुः, गुरुशुश्रूषा विनयहेतुरिति फलितोऽर्थः । यद्वा एतावन्तं कालं मदवशान्मूर्खोऽस्मि, इदानीं गुरुशिक्षावशाद्विवेकावगतिरिति वा योजनीयम् । शिखरणी वृत्तम्—'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरणी' इति लक्षणात् ॥ ३ ॥

अथ विदुषां तावद्विद्यैव भूषणरूपसंपदित्याह—

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः ।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ॥ ४ ॥

केयूराणीति । केयूराण्यङ्गदानि । यद्यपि केयूरयोर्भुजनिजशिरोभूषणत्वेन द्वित्वमेव वक्तव्यम्, तथापि तद्विशेषविवक्षायां बहुवचनप्रयोग इति मन्तव्यम् । पुरुषं जनं न भूषयन्ति नालंकुर्वन्तीति यथायोगं संबध्यते । चन्द्रवदुज्ज्वला धवलतरा हारा मुक्ताहाराश्च न भूषयन्ति । स्नानमभिषेकोऽपि न भूषयति । विलेपनं घनसारकस्तूरिगन्धसारचर्चापि न भूषयति । कुसुमं मल्लिकामालती-चम्पकादिपुष्पमपि । जातावेकवचनम् । न भूषयति । अलंकृता अभ्यङ्गपुष्प-माल्यादिना सम्यक्प्रसाधिता मूर्धजाः शिरोरुहा अपि न भूषयन्ति । पुरुषमिति सर्वत्रानुषङ्गः । किं त्वेका केवला वाणी पुरुषं समलंकरोति सम्य-ग्भूषयति । कथं वाणीत्यत आह—या संस्कृता व्याकरणादिपरिशुद्धा धार्यते स्वायत्तीक्रियते सेत्यध्याहृततच्छब्देन संबन्धः । ननु केयूरादीनां भूषणत्वेन प्रसिद्धत्वात्तन्निषेधे प्रत्यक्षापलापः स्यादित्याशङ्क्य तेषां क्षयिष्णुत्वान्न तथात्व-मित्याह—अखिलभूषणानि केयूराद्युक्ताशेषभूषणानि क्षीयन्ते कालक्रमेण नश्यन्ति । 'क्षीयन्ते खलु' इति पाठे खलुशब्दो वाक्यालंकारे । वाग्भूषणं संस्कृतवाग्रूपभूषणं तु सततं भूषणं नित्यभूषणम् । कदापि न नश्यतीति भावः । व्यतिरेकालंकारः । शार्दूलविक्रीडितं वृत्तम् ॥ ४ ॥

येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरन्ति ॥ ५ ॥

येषामिति ॥ येषां न विद्या न तपो न दानं न शीलं सद्वृत्तं तदपि च न गुणः सत्त्वो गुणो न धर्म एवंभूता ये मनुष्यास्तेऽस्मिन्मर्त्यलोके भुवि भारभूताः सन्तो मनुष्यरूपेण मृगा एव विचरन्ति ॥ ५ ॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ॥ ६ ॥

विद्या नामेति । रूपं नाम कुण्डलहारनूपुराङ्गदादिचतुर्विधभूषणाभावेऽपि विभूषितवद्भासमान आकारविशेषः । तदुक्तं भावप्रकाशे—'अवेध्यारोप्यविक्षेप्यबन्धनीयैरभूषितम् । यद्भूषितमिवाभाति तद्रूपमिति कथ्यते ॥' इति । विद्या नाम वेदशास्त्रद्यात्मिका विद्यैव नरस्य पुंसोऽधिकं भूयिष्ठं रूपमुक्तलक्षणाकारविशेषः । तद्वल्लोकरञ्जकत्वादिति भावः । तथा प्रच्छन्नं निगूढं यथा तथा गुप्तं रक्षितं धनं विद्यैवेति संबन्धः । तद्वत्कालान्तरेषूपकारकत्वादिति भावः । विद्या भोगान्करोतीति भोगकरी स्रक्चन्दनादिभोग्यवस्तुलाभहेतुः । तथा यशः समाख्या सुखमिन्द्रियतर्पणम् । एतत्करी एतद्धेतुश्च । उभयत्रापि 'कृञो हेतुताच्छील्यानुलोम्येषु' इति प्रत्यये टित्वान्ङीप् । तथा विद्यां गृणन्त्युपदिशन्तीति गुरवस्तेषां हिताहितोपदेष्टृणामाचार्याणामपि गुरूपदेष्टृभूता । तथा परमार्थबोधकत्वादिति भावः । विद्या विदेशगमने प्रवासे बन्धुजनः सुहृज्जनः । तद्वद्विशेषोपचारसंपादकत्वादिति भावः । यदुक्तम्—'स्वदेशीमित्रं परदेशबन्धुं विद्यासुधां ये पुरुषाः पिबन्ति' । विद्या परा देवता परात्मभूता । मोक्षदायकत्वादिति भावः । यद्वा परा देवता स्वाभीष्टदेवता । तथा ऐहिकामुष्मिकफलदत्वादिति भावः । विद्या राजसु राजमध्ये पूज्यते प्रशस्यते । गौरवसंपन्नत्वाद्राजपूज्या भवतीत्यर्थः । यद्वा विद्याशब्देन विद्यावांल्लक्ष्यते, राजशब्देन च तत्सभा लक्ष्यते । तथाच विद्यावान्राजसभासु पूज्यते पुरस्क्रियते । संभाव्यत इति यावत् । धनं द्रव्यं तु नहि । उक्तप्रकारं न भवतीत्यर्थः । तस्माद्विद्ययोक्तरूपया विहीनः शून्यो जनः पशुः पशुप्रायः । कर्तव्याकर्तव्यविवेकराहित्यादिति भावः । अतो बहूपकारित्वाद्विशिष्टविद्यैव प्रधानम्, न त्वन्यदिति तात्पर्यम् । अत्र विद्याया रूपधनाद्याकारेण बहुधा निरूपणान्निरवयवमालारूपकालंकारः ॥ ६ ॥

अथ लोकहिताहितवर्णनप्रसङ्गात्तस्या एव प्रकृष्टैश्वर्यमाह—

क्षान्तिश्चेत्कवचेन किं, किमरिभिः क्रोधोऽस्ति चेद्देहिनां
ज्ञातिश्चेदनलेन किं, यदि सुहृद्दिव्यौषधैः किं फलम् ।
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्यानवद्या यदि
व्रीडा चेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् ॥ ७ ॥

क्षान्तिरिति । देहिनां प्राणिनां क्षान्तिस्तितिक्षा । परिभवादिप्रत्ययमानेषु क्रोधप्रतिबन्धक इति यावत् । अस्ति चेत्, तर्हि कवचेन वर्मणा किम् । फलमिति सर्वत्रानुषज्यते । न किंचिदपीत्यर्थः । क्रोधश्चित्तक्षोभोऽस्ति चेद् अरिभिः शत्रुभिः किम् । तस्यैवान्तः शत्रुत्वादुपद्रवहेतुत्वाच्चेति भावः । ज्ञातिर्दायादोऽस्ति चेत्, अनलेनाग्निना किम् । तस्यैव सर्वार्थनिर्मूलनिदानत्वादिति भावः । सुहृत्सन्मित्रमस्ति यदि । 'सुहृद्दुर्हृदौ मित्रामित्रयोः' इति निपातनात्साधुः । दिव्यौषधैः सिद्धौषधैः किं फलम् । न किंचिदपि । तस्यैवारोग्यकरत्वादिति भावः । दुर्जनाः खलाः सन्ति यदि, सर्पैराशीविषैः किम् । तेषामेव प्राणापहारित्वादिति भावः । अनवद्या निर्दुष्टा । 'अवद्यपण्य—' इत्यादिना निपातनात्साधुः । ततो नञ्समासः । 'तस्मान्नुडचि' इति नुडागमः । विद्या वेदवेदाङ्गाद्यात्मिकास्ति यदि, धनैः किमु । तस्या एवाखिलभोगकरत्वादिति भावः । व्रीडा अकार्यप्रवृत्तौ लज्जा अस्ति चेत्, भूषणैः किमु हारनूपुराद्यलंकरणैः किम् । तस्या एव लोकोत्तरभूषणत्वादिति भावः । सुकविता सत्पाण्डित्यम् । 'संख्यावान्पण्डितः कविः' इत्यमरः । यद्वा कवयति वर्णयति रसोल्लसितशब्दार्थसंघटनां करोतीति कविस्तस्य भावस्तत्ता यदि राज्येन भूमण्डलाधिपत्येन किम् । तस्या एव सकललोकवशीकरत्वादिति भावः । राज्ञो भावः कर्म वा राज्यं प्रजापरिपालनात्मकम् । पुरोहितादित्वाद्यक्प्रत्ययः ॥ ७ ॥

इत्थं विद्वज्जनानुवर्ण्य संप्रति सत्संगतेः श्रेयस्करत्वमाह—

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम् ॥ ८ ॥

जाड्यमिति । धियो बुद्धेर्जाड्यं मान्द्यं हरति निरस्यति । वाचि वचने सत्यं सूनृतभावं सिञ्चत्याप्लावयति । मानोन्नतिं बहुमानातिशयं दिशति प्रयच्छति । पापं

किल्बिषमपाकरोति नाशयति । धर्मोपदेशादिनेति भावः । तथा चेतः प्रसादयति निर्मलयति । ज्ञानोपदेशादिनेति भावः । दिक्षु दिशासु कीर्तिं तनोति विस्तारयति । अतः सत्संगतिः सज्जनसमागमः पुंसां किं श्रेयो न करोति । कथय इति पृथग्जनसंबोधनम् । सर्वमपि श्रेयः करोत्येवेत्यर्थः । अतस्तैरेव संगतिः कर्तव्या न तु दुर्जनैरिति तात्पर्यम् । अत्र क्रियाणां बहूनां समुच्चितत्वात्समुच्चयालंकारः । 'गुणक्रियायौगपद्यं समुच्चय उदाहृतः' इति लक्षणात् । वसन्ततिलकावृत्तम् । लक्षणं तूक्तम् ॥ ८ ॥

अथ विदुषामपि मानशौर्ययोरपेक्षितत्वाद्विद्वत्पद्धतिनिरूपणानन्तरं मानशौर्यपद्धतिं निरूपयति—

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ ९ ॥

क्षुत्क्षाम इति । क्षुधा क्षामः क्षीणोऽपि । 'क्षायो मः' इति मत्वम् । जरया विस्रसया कृशोऽपि जीर्णोऽपि । 'विस्रसा जरा' इत्यमरः । शिथिलप्रायो विश्लथाङ्गतया बलहीनः । सन्नपीत्यर्थः । कष्टां दशामाहारालाभादतिकृच्छ्रावस्थामापन्नः प्राप्तोऽपि । 'दशा वर्ताववस्थायाम्' इति विश्वः । अत एव विपन्नदीधितिर्नष्टकान्तिरपि । किं बहुना प्राणेषु पञ्चसु नश्यत्सूत्क्रममाणेषु सत्स्वपि । प्राणप्रयाणे संप्राप्ते सत्यपीत्यर्थः । मत्तेभेन्द्रस्य मत्तगजपुंगवस्य विभिन्नो विदारितो यः कुम्भः कुम्भस्थलं तत्र यत्पिशितं मेदोमांसं तद्ग्रासे कवलने एकं मुख्यं यथा तथा बद्धा संदानिता स्पृहा वाञ्छा यस्य सः । इति शौर्यातिशयोक्तिः । तथा मानमहताम- भिमानोन्नतानामग्रेसरोऽग्रगण्यः । 'पुरोऽग्रतोऽग्रेषु सर्तेः' इति टप्रत्ययः । केसरी सिंहः । जीर्णं तृणं शुष्कघासमत्ति किमभ्यवहरति किम् । नात्त्येवेत्यर्थः । इति मानातिशयोक्तिः । नीचजन्तुस्तु नैवमिति भावः । अत्र यद्यपि सर्वत्रापिशब्दस्तावदेकैकविशेषणविशिष्टस्यैवात्यन्तनीचवृत्तिप्रवृत्तिं द्योतयति, तथाप्युक्ताखिलविशेषणविशिष्टोऽपि गजेन्द्रमेदःकवलनविहितप्रतिज्ञः केसरी न नीचवस्तुनि प्रव-

र्तत इति महती मानशौर्यपराकाष्ठोक्तिरिति मन्तव्यम् । 'प्राणानपि परित्यज्य मानमेवाभिरक्षयेत् । प्राणास्तरङ्गचपला मानस्त्वाचन्द्रतारकम् ॥' इति वचनात्संभावनाशौर्यसंपन्नेन भवितव्यं यशस्कामेनेति भावः । अत्र प्रकरणे कुत्रचिन्मानस्य कुत्रचिच्छौर्यस्य कुत्रचिदुभयस्य प्राधान्यकथनं द्रष्टव्यम् । कुलक्रमागतोत्तमशीलपरिपालनेन सहायमनपेक्ष्य शत्रुसंहरणसामर्थ्यं शौर्यमिति विवेकः । अत्र प्रायेणाप्रस्तुतप्रशंसालंकारोऽनुसंधेयः । शार्दूलविक्रीडितं वृत्तम् ॥ ९ ॥

क्षुद्रजन्तुस्तु नैवमित्युक्तमेवार्थं भंग्यन्तरेणाह—

स्वल्पस्नायुवसावसेकमलिनं निर्मांसमप्यस्थि गोः
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥ १० ॥

स्वल्पेति। श्वा शुनकः स्वल्पयोर्लेशमात्रयोः स्नायुवसयोः स्नायुर् वस्नसाह्वयनाडीभेदः, वसा मेदः, तयोरवसेकेन मेलनेन मलिनं मलदूषितमपि निर्मांसं मांसलेशशून्यमपि गोः। 'स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले। लक्ष्यदृष्ट्योः स्त्रियां पुंसि गौः' इत्यमरः । अस्थि कीकसं लब्ध्वा परितोषमेति संतुष्यति । तच्च गवास्थि तु तस्य शुनः क्षुधा । 'आपं चैव हलन्तानाम्' इति वचनाट्टाप् । तस्याः शान्तये क्षुन्निवारणाय न । पर्याप्तं न भवतीत्यर्थः । 'अस्तिर्भवन्तीपरोऽप्रयुज्यमानोप्यस्ति' इति भाष्यकारवचनात् भवन्तीति लटः पूर्वाचार्याणां संज्ञा । नीचजन्तोरिति भावः । सिंहस्त्वङ्कं समीपमागतमपि । समीपवर्तिनमपीत्यर्थः । 'अङ्कः समीप उत्सङ्गे चिह्ने स्थानापवादयोः' इति विश्वः । जम्बुकं क्रोष्टारं त्यक्त्वा । अनादृत्येत्यर्थः । अलक्षीकृत्येति वा । द्विपं गजमेव । दूरस्थमपीति भावः । निहन्ति विदारयति । तथाहि कृच्छ्रगतोऽप्यतिसंकटस्थोऽपि सर्वोऽशेषो जनः सत्त्वानुरूपं स्वशक्त्यनुगुणं फलं लाभं वाञ्छति कांक्षति । न तु दुर्बलः प्रकृष्टफलकांक्षी, प्रबलो निकृष्टलाभकांक्षी च भवति । अतः श्वसिंहदृष्टान्तेन नीचानीचवस्तुपरिग्रहतत्परेण भवितव्यमायुष्मतेति भावः । वृत्तं पूर्ववत् ॥ १० ॥

अथ विनाशप्रकारमाह—

दौर्मन्त्र्यान्नृपतिर्विनश्यति, यतिः सङ्गात्सुतो लालना-
द्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया-
न्मैत्री चाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम् ॥ ११ ॥

दौर्मन्त्र्यादिति । नृपती राजा । दुष्टो न सुलक्षणप्रयुक्तो मन्त्रः षाड्गुण्यचिन्तनं यस्य तस्य दुर्मन्त्रस्य भावो दौर्मन्त्र्यं तस्माद्धेतोर् नश्यति विनष्टो भवति । मन्त्रवैकल्ये परेषामवकाशसंभवाद्राज्याद्यपहरणादिति भावः । दुष्टमन्त्रणानि प्रधानानि यस्य तस्य भावस्तस्मान्नश्यति । अदण्ड्यदण्डनाद्युपदेशेन लक्ष्म्यादिरहितो भवतीत्यर्थः । 'सन्मन्त्रिणा वर्धयते नृपाणां लक्ष्मीर्महीधर्मयशःसमूहः । दुर्मन्त्रिणा नाशयते तथैव लक्ष्मीर्महीधर्मयशःसमूहः ॥' इति वचनादिति भावः । यतिर्योगी सङ्गात्समागमान्नश्यति । सङ्गस्य कामक्रोधादिहेतुत्वात्तदुत्पत्तौ भ्रष्टयोगो भवतीत्यर्थः । 'सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते । क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ॥' इति गीतावचनादिति भावः । सुतो लालनान्नश्यति । गुणहीनो भवतीत्यर्थः । लालनाद्बहवो दोषास्ताडनाद्बहवो गुणाः । तस्मात्पुत्रं च शिष्यं च ताडयेन्न तु लालयेत् ॥' इति न्यायादिति भावः । विप्रो ब्राह्मणोऽनध्ययनाद्वेदशास्त्राध्ययनाभावान्नश्यति नीचो भवति । 'वेदवेदाङ्गतत्त्वज्ञो विप्रः सर्वत्र पूज्यते । अनधीतश्रुतिर्विप्रः सभामध्ये न शोभते ॥' कुलं वंशः कुतनयात्कुपुत्रान्नश्यति । 'कोटरान्तर्भवो वह्निस्तरुमेकं दहिष्यति । कुपुत्रस्तु कुले जातः स्वकुलं नाशयेत्परम् ॥' इति न्यायात् । शीलं सत्स्वभावः खलोपासनाद्दुर्जनसमागमान्नश्यति । तेषामत्यन्तानर्थमूलकत्वादिति भावः । 'छादयित्वात्मनो भावं चरन्ति शठबुद्धयः । प्रहरन्ति च रन्ध्रेषु सोऽनर्थः सुमहान्भवेत ॥' इति वाक्यात् । ह्रीर्जुगुप्सितकर्माचरणान्निवृत्तिर्मद्यान्मद्यपानान्नश्यति । 'अयुक्तं बहु भाषन्ते यत्रकुत्रापि शेरते । नग्ना विक्षिप्य गात्राणि ते जाल्मा इव मद्यपाः ॥' इत्युक्तत्वात् । कृषिः सस्यमनवेक्षणान्नश्यति नित्य-

मपरामर्शान्नश्यति । 'कृषिं च पत्नीमनवेक्ष्य यः पुमानन्यानि कार्याणि समाचरेच्च । ते त्वेवमेवं हि समाकुले द्वे तथेति बाधानिचयं च यानः ॥' इति स्मरणात् । स्नेहः पुत्रदारादिषूत्पन्नमोहः प्रवासाश्रयाद्देशान्तरसंचार-समाश्रयणान्नश्यति । 'सुताङ्गनाबन्धुषु सोदरेषु नृपेषु मृत्येषु च जातमोहः । प्रवासमात्रेण हि नश्यतेऽखिलं चिरं प्रवासेन हरत्यशेषम् ॥' इति वचनात् । मैत्री मित्रभावोऽप्रणयादननुरागान्नश्यति । 'मृद्धट इव सुखभेद्यो दुःसंधानश्च दुर्जनो भवति । सुजनस्तु कनकघट इव दुर्भेद्यश्चाशुसंधेयः ॥' इति वचनात् । समृद्धिः संपत्तिरनयान्नीतिराहित्यान्नश्यति । 'रक्षायां स्वमतिच्छिपल्याधिकरं शिक्षागुणैर्लभ्यते विद्वेष्टि स्वजनं त्यजत्यवनतिं मृद्नाति मार्गस्थितान् । भूतिं नेच्छति यो जनात्प्रतिभयं दुर्वर्त्मना गच्छति क्रूराग्रं विनयांकुशं न सहते भूपालमत्तद्विपः ॥' धनं तु त्यागादर्थिसत्करणात् । 'द्यूतात्' इति पाठे द्यूता-दक्षक्रीडायां प्रमादात्, अनवधानतया वा नश्यति । 'श्रुतिनिष्पीडनाच्चैव चार्था-सक्तधियां नृणाम्' इति । प्रमादान्नाशस्त्वनुभवसिद्ध एव । दानान्नाशः समन-न्तरश्लोक एव वक्ष्यते—'शिष्टानां गर्हणान्नाशः सदाचारविवर्जनात्' । शार्दू-लविक्रीडितम् ॥ ११ ॥

यतो राजानं संबोधितवानपि तन्नीतिः कीदृशीत्याशङ्कायां तस्या बहुविधत्व-मित्याह—

सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
वाराङ्गनेव नृपनीतिरनेकरूपा ॥ १२ ॥

सत्येति । सत्या यथार्थभाषिणी अनृता असत्यवादिनी च । तथा परुषा कठोर-भाषिणी, प्रियवादिनी मधुरालापिनी च । तथा हिंस्रा घातुका । 'शरारुर्घातुको हिंस्रः' इत्यमरः । 'नमिकम्पि—' इत्यादिना रप्रत्ययः । दयालुरपि कारुणिका च । 'स्याद्दयालुः कारुणिकः' इत्यमरः । 'स्पृहिगृहि—' इत्यादिनालुच्प्रत्ययः । तथा अर्थपरा धनलुब्धा, वदान्या दानशौण्डा च । कुत्रचिद्विषय इति सर्वत्रा-

प्यध्याहार्यम् । 'स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे' इत्यमरः । तथा नित्यं व्ययो धनत्यागो यस्याः सा तथोक्ता, प्रचुरनित्यधनागमा प्रचुरं प्रभूतं यथा तथा नित्यं धनस्यागमः प्राप्तिर्यस्याः सा तथोक्ता च । अतो वाराङ्गनेव वेश्येव । 'वारस्त्री गणिका वेश्या' इत्यमरः । नृपनीती राजवृत्तिरनेकरूपा बहुप्रकारा । न त्वैकान्तिकीत्यर्थः । वाराङ्गनायामपि विशेषणानि समानि । अत्र सत्यानृतेत्यादिपदश्रवणमात्रेण झटिति विरोधः स्फुरति । तस्य स्वाभाविनाभासीकरणादलंकारः सन्वाराङ्गनेवेत्युपमयाङ्गाङ्गिभावेन संकीर्यते । वसन्ततिलकावृत्तम् ॥ १२ ॥

अथाप्तिकार्पण्यं मा कुरु लाभालाभयोर्दैवायत्तमूलकत्वादित्याह—

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ च नातोऽधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥ १३ ॥

यदिति । धात्रा ब्रह्मणा स्तोकमल्पं महद्बहुलं वा यद्धनं निजभालं निजनिटिलतटमेव पट्टं तत्र लिखितं लेखनेन निर्दिष्टं तद्ब्रह्मलिखितं धनं मरुस्थल ऊषरदेशेऽपि । किमुतान्यत्रेति भावः । नितरामतिशयेन प्राप्नोति लभते । अन्यूनमिति शेषः । 'समानौ मरुधन्वानौ' इत्यमरः । मेरौ कनकाचलेऽपि अतो ब्रह्मलिखितादधिकं न प्राप्नोति । तत्तस्मात्कारणाद्धीरः स्थिरचित्तो भव । वित्तवत्सु धनाढ्येषु विषये कृपणां दीनां वृत्तिं व्यापारं वृथा व्यर्थं मा कृथा मा कार्षीः । तेन कार्पण्यजनितनिन्दामात्राश्रयत्वमेव, न त्वधिकधनप्राप्तिरिति भावः । कृञो लुङि थास् । तनादित्वेऽपि सिचो नित्यलोपविधानान्न सिच् । 'न माङ्योगे' इत्यट्प्रतिषेधः । तत्र दृष्टान्तमाह—कूपेऽल्पजलाधारे गर्तेऽपि पयोनिधौ समुद्रेऽपि घटे कलशस्तुल्यमात्मपरिमितं जलं गृह्णाति स्वीकुरुते । पश्येति कृपणसंबोधनम् । न तु कूपेऽल्पम्, पयोनिधावधिकम् । अत एव दृष्टान्तेन समाहितचित्तेन भवितव्यम्, न तु कार्पण्यपर्याकुलेनेति तात्पर्यम् । शार्दूलविक्रीडितम् ॥ १३ ॥

अथ दुर्जनसुजनमैत्रीप्रकारमाह—

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमुपैति पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥ १४ ॥

आरम्भेति । पूर्वार्धपरार्धाभ्यां पूर्वाह्णापराह्णभेदेन भिन्ना पृथग्विधा छाया अनातप इव । 'छाया त्वनातपे कान्तौ प्रतिबिम्बार्कजाययोः' इति वैजयन्ती । आरम्भे प्रारम्भसमये गुर्वी गुरुः । वर्धिष्णुरित्यर्थः । 'वोतो गुणवचनात्' इति विकल्पान्ङीष् । क्रमेण कालक्रमेण क्षयिणी क्षयिष्णुश्च । 'जिदृक्षि–' इत्यादिना इनिः । तथा पुरा प्रारम्भे लघ्वी । ह्रस्वेत्यर्थः । पूर्ववन्ङीष् । पश्चादनन्तरं वृद्धिमुपैति प्राप्नोति । अयमर्थः—दुर्जनमैत्री पूर्वाह्णच्छायेव प्रारम्भगुर्वी क्रमेण क्षयिणी च भवति, सुजनमैत्री तावदपराह्णच्छायेवादौ लघ्वी ततो वर्धिष्णुश्च भवतीति । अतोऽत्र यदुक्तं तत्कर्तव्यं कुशलिनेति भावः । अत्र यथासंख्यासंकीर्णोपमालंकारः । उपजातिवृत्तम् ॥ १४ ॥

अथैतद्वैलक्षण्येन सुजनपद्धतिं निरूपयति । तत्रादावादरातिशयात्तान्नमस्करोति—

वाञ्छा सज्जनसंगतौ परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खलै-
रेते येषु वसन्ति निर्मलगुणास्तेभ्यो महद्भ्यो नमः ॥ १५ ॥

वाञ्छेति । सज्जनसंगतौ साधुसमागमे वाञ्छाभिलाषः, न तु जिहासा । तस्या मोक्षसाधकत्वादिति भावः । तदुक्तं ज्ञानवासिष्ठे–'मोक्षद्वारे द्वारपालाश्चत्वारः परिकीर्तिताः । शमो विचारः संतोषश्चतुर्थः साधुसंगमः॥' इति । तथा चोक्तं श्रीमद्भागवते—'महत्सेवां द्वारमाहुर्विमुक्तेः' इति । स्वेनाप्युक्तम्–'चेतः प्रसादयति दिक्षु तनोति कीर्तिं सत्सङ्गतिः कथय किं न करोति पुंसाम्' इति । परेषां गुणे प्रीतिः संतोषः, न तु दोषापादनम् । 'परगुणपरमाणून्पर्वतीकृत्य नित्यं निजहृदि

विकसन्तः सन्ति सन्तः कियन्तः' इति वक्ष्यमाणत्वादपीति भावः। गुरौ विद्योपदेष्टरि नम्रता भक्तिश्रद्धाभरेण प्रह्वीभावः, न तु गर्वोद्रिक्तता । 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते निखिला ह्यर्थाः प्रकाशन्ते महात्मनः ॥' इति। 'गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः। गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ इति श्रुतिः । विद्यायां वेदादिविद्याभ्यासे व्यसनमासक्तिः, न तु द्यूतकेल्यादौ। तस्य मोक्षसाधनब्रह्मज्ञानकत्वादिति भावः । स्वयोषिति निजदारेषु रतिः संभोगः, न तु परदारेषु। 'रम्यं कुलस्त्रीरतम्' इति वचनादिति भावः। लोकापवादाल्लोकनिन्दायाः। 'भीत्रार्थानां भयहेतुः' इत्यपादानत्वात्पञ्चमी । भयम्, न तु निर्लज्जत्वम्। 'लोकापवादो बलवानिति सत्यवती श्रुतिः' इत्यादिवचनात्तस्य बलिष्ठत्वादिति भावः। शूलिनि परदेवतायां शिवे भक्तिरनुरागः, न तु क्षुद्रदेवतायाम्। 'शिवे भक्तिः शिवे भक्तिः' इत्यादिवचनेष्वावृत्त्या तस्याः प्राशस्त्यश्रवणादिति भावः। आत्मदमने स्वपरिभवे सति शक्तिः सामर्थ्यम् । पराक्रम इति यावत्। न तूपशमेनौदासीन्यम् । 'अन्यदा भूषणं पुंसां शमो लज्जेव योषिताम्। पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥' इति वचनादिति भावः । खलैः दुर्जनैः सह संसर्गमुक्तिः सङ्गत्यागः, न तु तत्सहवासभिलाषः। 'दुर्जनं दूरतस्त्यजेत्' इति, 'दूर्जनः परिहर्तव्य'इत्यादिवचनादिति भावः। इत्येते निर्मला निष्कलङ्का गुणाः सज्जनसंगतिवाञ्छादयो गुणा येषु पुरुषेषु वसन्ति तेभ्यो महद्भ्यो नमः । इत्थंभूतगुणविशिष्टानामेव नमस्कारार्हत्वादिति भावः। 'नमःस्वस्ति—' इत्यादिना चतुर्थी। 'तैरेवभूर्भूषिता' इति पाठे तैर्निर्मलगुणसंपन्नैरेव भूरलंकृता, न त्वन्यैः। तेषामेव चारुत्वाद्यतिशयत्वादिति भावः। शार्दूलविक्रीडितं वृत्तम् ॥ १५ ॥

अथैषां निसर्गसिद्धगुणं गणयति—

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरतिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ १६ ॥

विपदीति विपद्यापत्काले धैर्यं निर्विकारचित्तत्वम्, न तु दैन्यम् । 'मनसो

निर्विकारत्वं धैर्यवत्स्वपि हेतुषु ' इति । अथानन्तरं वाक्यारम्भे वा । अभ्युदये संपदि क्षमा सहिष्णुत्वम्, न तूद्दण्डता । सदसि राजविद्वत्सभायां वाक्पटुता वाग्मित्वं सरसवचनं च । वाक्चातुर्यमिति यावत्, न तु मूकीभावः । युधि रणरङ्गे विक्रमः पराक्रमः, न तु पलायनम् । यशस्यभिरतिः संग्रहेच्छा, न त्वनादरः । श्रुतौ वेदशास्त्राभ्यसने व्यसनमासक्तिः, न तु निर्वेदः । इतीदं सर्वम् । ' नपुंसकमनपुंसकेन—' इत्यादिना नपुंसकैकशेषः । महात्मनां महानुभावानां प्रकृतिसिद्धं स्वभावसिद्धं हि । 'संसिद्धिप्रकृती त्विमे । स्वरूपं च स्वभावश्च निसर्गश्च' इत्यमरः । द्रुतविलम्बितवृत्तम् ॥ १६ ॥

गुणाढ्यत्वे को लाभ इत्याशङ्क्य तेषां श्रेयोहेतुत्वमाह—

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यं सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥१७॥

प्राणेति । प्राणाघातात्प्राणिहिंसाया निवृत्तिर्निवर्तनं च । 'मा हिंस्यात्सर्वा भूतानि', 'अहिंसा परमो धर्मस्त्वधर्मः प्राणिनां वधः' इत्यादिनाग्निषोमीयपश्वालम्भनव्यतिरिक्तहिंसाया निषेधश्रवणात् । परधनहरणे संयमो मनोरोधश्च । 'परद्रव्याणि लोष्ठवत्' इति न्यायादिति भावः । काले समये सत्यवाक्यं यथार्थभाषणं च । धर्मोपदेशश्रवणादिति भावः । अत्र 'ब्राह्मणार्थे गवामर्थे' इत्यादिष्वसत्यवचनस्यापि निषेधाभावश्रवणात्काल इत्युक्तम् । शक्त्या प्रदानं वित्तानुसारेण त्यागश्च । 'वित्तशाठ्यं न कारयेत्' इति वचनादिति भावः । युवतिजनकथायां परस्त्रीवृत्तान्तकथने मूकभावस्तूष्णींभावशीलत्वं च । 'स्वप्नेऽप्यन्यवधूकथाम्' इति वचनात् । परेषामन्येषाम् । याचकानामित्यर्थः । तृष्णा धनलिप्सा तस्या एव स्रोतसः प्रवाहस्य विभङ्गो निरोधः । अभीप्सितदानेन मनोरथपरिपूरणं चेत्यर्थः । 'याचमानजनमानसवृत्तेः पूरणाय बत जन्म न यस्य । तेन भूमिरतिभारवतीयं न द्रुमैर्न गिरिभिर्न समुद्रैः ॥' इति श्रवणादिति भावः । गुरुषु च विनयो नम्रत्वं

च । 'गुरौ नम्रता' इत्युक्तत्वादिति भावः । सर्वभूतेष्वशेषप्राणिष्वनुकम्पया दयया सामान्यं समदर्शित्वं च । सर्वशास्त्रेषु वेदवेदान्तादिसकलागमेष्वनुपहतोऽविच्छिन्नो विधिरध्ययनविधानं च । यद्वा सर्वभूतानुकम्पेति पृथक्पदम् । तथा सर्वशास्त्रेषु सामान्यमवैषम्येण तत्तत्सिद्धान्तानुवर्तित्वम्, अनुपहतविधिर्लुप्तकर्मानुष्ठानं चेति अनुगुणसमुदायः । एषः श्रेयसां पन्था अखण्डितैश्वर्यादिश्रेयःप्राप्तिमार्गः । न त्वेतद्व्यतिरिक्तोऽन्योऽस्तीत्यर्थः । एतादृशगुणसंपत्तिः सुजनानामेवेति कृत्वा त एव श्लाघ्या इति भावः । अथवा श्रेयसां प्रशस्यानां सुजनानां संबन्धी पन्था यत्प्रवृत्तिमार्ग इत्यर्थः । प्रशस्यशब्दादीयसुनि 'प्रशस्यस्य श्रः' इति श्रादेशः । अत्र 'वाञ्छा सज्जनसंगतौ' इत्यादिश्लोकेषूक्तगुणाः प्रायेण दैवसंपदभिजातानामेव संभवन्ति, न त्वन्येषाम् । तदुक्तं भगवद्गीतासु—'अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः । दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् । दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता । भवन्ति संपदं दैवीमभिजातस्य भारत ॥' इति । स्रग्धरावृत्तम्—'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्' इति लक्षणात् ॥ १७ ॥

अथाधममध्यमोत्तमवृत्तिमाह—

संतप्तायसि संस्थितस्य पयसो नामापि न श्रूयते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं दृश्यते ।
अन्तःसागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमजुषामेवंविधा वृत्तयः ॥ १८ ॥

संतप्तायसीति । संतप्तायसि सम्यगग्नितप्तायःपिण्डे संस्थितस्य । निक्षिप्तस्येत्यर्थः । पयसो जलस्य नामापि नामधेयमात्रमपि न श्रूयते । मूलतो ध्वस्तमेव भवतीत्यर्थः । स्वरूपदर्शनं तु किमु वक्तव्यमिति भावः । तदेव पयो नलिनीपत्रस्थितं पद्मपत्रगतं सत् मुक्ताकारतया मौक्तिकरूपेण दृश्यते । न तु मौक्तिकत्वेनेत्यर्थः । तदेव पयोऽन्तःसागरे सागरान्तराले । अन्तरित्यव्ययम् । या शुक्तिर्मुक्तास्फोटस्तस्या मध्य उदरे पतितं सत् मौक्तिकं जायते । मौक्तिकत्वेन

परिणमतीत्यर्थः । 'ज्ञाजनोर्जा–' इति जादेशः । मुक्तैव मौक्तिकमिति विग्रहः । विनयादित्वात्स्वार्थे ठक् । अतः प्रायेण भूम्ना अधममध्यमोत्तमजुषां निकृष्टसाधारणोत्कृष्टाश्रयाणां श्रितवतामेवंविधा नामाश्रवणादयो वृत्तयो व्यापारा भवन्तीति यथाक्रममन्वयाद्यथासंख्यालंकारः । अतः महदाश्रय एव कर्तव्यः । 'नीचाश्रयो न कर्तव्यः कर्तव्यो महदाश्रयः' इति वचनात् । अत्रोत्तममध्यमाधमा इति लोकप्रसिद्धोद्देशक्रमः कविना न वीक्षित इति ज्ञेयम् । शार्दूलविक्रीडितम् ॥ १८ ॥

अथ सत्पुत्रकलत्रमित्रसंपत्तिः पुण्यकृदधीनेत्याह—

यः प्रीणयेत्सुचरितैः पितरं स पुत्रो

यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।

तन्मित्रमापदि सुखे च समक्रियं य-

देतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ १९ ॥

य इति । यः पुत्रः सुचरितैर्वाक्यकरणादिसदाचारैः पितरं प्रीणयेत्संतोषयेत् । 'प्रीञ् तर्पणे' इत्यस्माद्धातोश्चौरादिकाण्णिचि लिङ् । 'धूञ्प्रीञोर्नुग्वक्तव्यः' इति नुगागमः । स पुत्रः पुन्नाम्नो नरकात्त्रायत इति व्युत्पन्न इति पुत्रशब्दवाच्यः, न तूत्पन्नमात्रः । 'जीवतोर्वाक्यकरणात्प्रत्यब्दं भूरिभोजनात् । गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥' इति स्मरणात् । यद्भर्तुः पत्युर्हितमिच्छति भयभक्तिभ्यां हिताचरणतत्परं भवति तदेव कलत्रं भार्या, न तु यादृच्छिकम् । 'पतिभक्तिपरा साध्वी शान्ता सानतिभाषिणी' इति पतिव्रताधर्मत्वात् । 'कलत्रं श्रोणिभार्ययोः' इत्यमरः । यदापद्यनर्थसंकटे सुखे संपदि च समक्रियम् । अविषमाचारमित्यर्थः । तुल्यवृत्ति तदेव मित्रं सुहृत्, न त्वापत्संपदोस्त्यागानुवर्तनतत्परम् । 'आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः' इति वक्ष्यमाणत्वात् । एतत्त्रयमुक्तसत्पुत्रादित्रितयं जगति भुवि पुण्यकृतो धन्या लभन्ते प्राप्नुवन्ति । न त्वकृतसुकृता इत्यर्थः । एवंविधत्रितयलाभस्य महापुण्यफलत्वादिति भावः । वसन्ततिलकावृत्तम् ॥ १९ ॥

अथ सौजन्यस्य परोपकारफलकत्वात्तन्निरूपणानन्तरं परोपकारपद्धतिं वर्णयति—

भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥ २० ॥

भवन्तीति । तरवः पनसरसालादिवृक्षाः फलोद्गमैः फलभारैर्नम्रा अवनता भवन्ति । घना मेघा नवाम्बुभिर्नूतनोदकैरुपलक्षिताः सन्तो दूरविलम्बिनः सर्वत्र प्रवर्षणार्थमन्तरिक्षसंचारिणो भवन्ति । सत्पुरुषाः समृद्धिभिरुपलक्षिता अप्यनुद्धता अनुद्दण्डा भवन्ति । तीक्ष्णस्वभावा न भवन्ति । याच्ञां विनैव परहितमाचरन्तीत्यर्थः । तथा एष उक्तनिजनम्रत्वादिव्यवहारः परोपकारिणां परहिताचरणतत्पराणां स्वभावः निसर्गसिद्ध एव । न त्वाहार्यक इत्यर्थः । महान्तो हि परोपकारार्थं क्लेशं क्लेशत्वेन न गणयन्ति । तेषां स्वाभाव्यादिति भावः । तदुक्तं—'परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः । परोपकाराय चरन्ति गावः परोपकारार्थमिदं शरीरम् ॥' इति । अर्थान्तरन्यासोऽलंकारः । वंशस्थवृत्तम्—' जतौ तु वंशस्थमुदीरितं जरौ ' इति लक्षणात् ॥२०॥

अथ व्यापारतारतम्येन पुरुषाणामुत्तमादिभेदमाह—

एते सत्पुरुषाः परार्थघटकाः स्वार्थान्परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥२१॥

एते इति । ये पुमांसः स्वार्थान्स्वप्रयोजनानि । ' अर्थोऽभिधेयैरवस्तुप्रयोजननिवृत्तिषु ' इत्यभिधानात् । परित्यज्य त्यक्त्वा परार्थघटकाः परप्रयोजनसंघटनशीलाः । एते सत्पुरुषाः पुरुषोत्तमाः । सर्वस्य तैरेवाभिव्यक्तत्वादिति भावः । ये तु स्वार्थस्याविरोधेनावैषम्येण । स्वार्थनिर्वाहतत्परत्वेनैवेत्यर्थः । परार्थं परप्रयोजननिर्वाहार्थमुद्यमभृत उद्योगभाजस्ते सामान्याः साधारणाः । मध्यम-

पुरुषा इत्यर्थः। ये तु स्वार्थाय स्वार्थनिष्पत्त्यर्थं परहितं निघ्नन्ति नाशयन्ति तेऽमी मानुषराक्षसा मानुषशब्दवाच्या राक्षसाः। तथा क्रूराचारतत्परत्वात्पुरुषाधमा इत्यर्थः। ये तु निरर्थकं निष्फलम्। प्रयोजननिष्पत्तिराहित्येनापीति यावत्। परहितं घ्नन्ति ते पुमांसः के वा कथंभूता वा न जानीमहे। उक्तत्रिविधपुरुषविलक्षणत्वात्ताञ्ज्ञातुं न शक्नुम इत्यर्थः। अत एव परमनीचा इत्यर्थः। उक्तपक्षेषु यः श्रेयांस्तत्पक्षाश्रयणं कर्तव्यमायुष्मतेति भावः। शार्दूलविक्रीडितम् ॥ २१ ॥

पुनस्तदेव क्षीरनीरदृष्टान्तेन वर्णयति—

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरोत्तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः।
गन्तुं पावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रापदं
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥ २२ ॥

क्षीरेणेति। क्षीरेण (कर्त्रा) आत्मानमुपगतं प्राप्तं यदुदकं जलं तस्मै। स्वात्ममिश्रितजलायेत्यर्थः। पुरा पूर्वं ते प्रसिद्धा अखिलाः समस्ताश्च गुणा निजमाधुर्यधावल्यादिगुणा दत्ता हि वितीर्णाः खलु। स्वगुणप्रदानद्वारा मैत्री संपादितेत्यर्थः। अतः क्षीरोत्तापं क्षीरस्य श्रपणार्थं अग्नौ निक्षिप्तस्य दुग्धस्योत्तापं संतापमवेक्ष्य तेन क्षीरमिश्रितेन पयसोदकेन। 'पयः क्षीरं पयोऽम्बु च' इत्यमरः। स्वात्मा स्वशरीरं कृशानौ वह्नौ हुतः। मित्रसंतापासहनात्संशोषित इत्यर्थः। ततस्तत्क्षीरं (कर्तृ) मित्रस्य जलस्यापदं संशोषरूपां विपत्तिं दृष्ट्वा पावकं वह्निं गन्तुमुन्मन उद्युक्तमभवत्। 'उत्क उत्मनाः' इति निपातनात्साधुः। जलसंशोषणे क्षीराणां बहिर्निर्गमनसंभवादिति भावः। तदनन्तरं तेन जलेन युक्तमिति शाम्यति प्रशान्तं भवति। 'शमामष्टानां—' इति दीर्घः। तथा हि सतां मैत्री सौहार्दम्। मैत्री व्याख्याता। ईदृशी पुनः परस्परव्यसनासहनशीला खलु। अत एतद्युक्तमिति भावः। अत्र स्वभावसिद्धस्य क्षीरनीरव्यवहारस्य परस्परसंतापदर्शनहेतुकत्वेनोत्प्रेक्षणात्क्रियानिमित्ताक्रियास्वरूपोत्प्रेक्षा। सा चोक्तार्थान्तरन्यासनिर्व्यूढेत्यनयोर्विजातीयसंकरः। शार्दूलविक्रीडितम् ॥ २२ ॥

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयता-
मम्भोदा बहवो वसन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥ २३ ॥

चातकोक्तिरुत्तरमिदम्—रे रे चातकेति । रे रे इति वीप्सा । हे चातक ! सावधानमनसा स्वस्थचेतसा क्षणं क्षणमात्रं श्रूयतां मम वच इति शेषः । हि यस्माद्गगनेऽम्भोदा मेघा बहवो वसन्ति किन्तु सर्वे एतादृशाः करुणावन्तो न कुतः केचिद्वृष्टिभिर्वसुधां पृथ्वीमार्द्रयन्ति जलेन सिंचन्ति । केचिद्वृथा गर्जन्ति गर्जनां कुर्वन्ति । तस्मात् हे मित्र ! यं यं पश्यसि तस्य तस्य पुरतोऽग्रे दीनं वचो मा ब्रूहि मा वद । दातारं प्रति याचना कर्तव्या । सर्वान् प्रति नेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ २३ ॥

उक्तमेवार्थं नीचादिवृत्तिकथनद्वारा द्रढयति—

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्ननिहता विरमन्ति मध्याः ।
विघ्नैर्मुहुर्मुहुरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥ २४ ॥

प्रारभ्यत इति । नीचैरधमैर्विघ्नभ्योऽन्तरायेभ्यो यद्भयं तेन हेतुना न प्रारभ्यते खलु नोपक्रम्यते । कार्यमिति शेषः । 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः । मध्या मध्यमास्तु कार्यं प्रारभ्योपक्रम्य विघ्नैर्निहता विह्वलीकृताः सन्तो विरमन्ति विरता भवन्तीत्यर्थः । उत्तमा उत्कृष्टा गुणा धैर्यशीलादयो येषां ते तथोक्ताः पुरुषश्रेष्ठास्तु विघ्नैर्मुहुर्मुहुः पौनःपुन्येन प्रतिहन्यमाना बंभज्यमाना अपि प्रारब्धमुपक्रान्तं कर्म न परित्यजन्ति न विसृजन्ति । अतः कालकूटबडवानलादिविघ्नाद्युपहतत्वेऽप्युक्तगुणसंपन्नतया देवानां सुधोत्पत्तिपर्यन्तं मथनं युक्तमिति श्लोकद्वयस्यापि तात्पर्यम् । अत्र प्रकरणे कुत्रचिद्धैर्यस्य कुत्रचिद्द्वयस्यापि प्राधान्यनिर्देश इति द्रष्टव्यम् । 'मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु' इत्युक्तलक्षणं

धैर्यम् । शीलं नियतकुलोचितसत्स्वभाव इति विवेकः । 'शीलं स्वभावे सद्वृत्ते' इत्यभिधानात् । वसन्ततिलकावृत्तम् ॥२४॥

अथोक्तगुणसम्पन्नस्य कृच्छ्राकृच्छ्रयोर्दुःखसुखापरिगणनया कार्यसाधनत्वमाह—

क्वचित्पृथ्वीशय्यः क्वचिदपि च पर्यङ्कशयनः ।
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ।
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥ २५ ॥

क्वचिदिति । क्वचित्कुत्रचिद्देशे काले वा । पृथ्वी शय्या यस्य स तथोक्तः । कठिनतरस्थण्डिलशयनोऽपीत्यर्थः । क्वचिच्च पर्यङ्के हंसतूलिकातल्पे शयनं स्वापो यस्य स तथोक्तः । मृदुलतरशय्योऽपीत्यर्थः । 'शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः' 'स्यान्निद्रा शयनं स्वापः' इत्युभयत्राप्यमरः । क्वचिच्छाक एवाहारो यस्य । नीरसाहारोऽपीत्यर्थः । क्वचिच्च शाल्योदने शाल्यन्ने रुचिः स्वादो यस्य स तथोक्तः । षड्रसोपेतमिष्टान्नभोजनसंतुष्टोऽपीत्यर्थः । क्वचित्कन्थां जीर्णवस्त्रशकलनिर्मिताच्छादनं धारयति कन्थाधार्यपि । क्वचिच्च दिव्याम्बरधरः कनत्कनपीताम्बरधरोऽपि कार्यार्थी कार्यनिष्पत्त्यभिलाषी । अर्थोऽभिलाषस्तद्वानर्थीति विग्रहः । 'कृद्वृत्तेस्तद्धितवृत्तिर्बलीयसी' इति महाभाष्ये । मनस्वी महामना धीरः । प्रशंसायामिनिः । पृथ्वीशय्यादिना दुःखं च न गणयति । पर्यङ्कशय्यादिना सुखं च न गणयति । किं तु सुखदुःखयोः समानावस्थयैव कार्यसाधनतत्परो भवतीत्यर्थः । शिखरिणीवृत्तम् ॥ २५ ॥

अथ धीरा लोकनिन्दास्तुतिप्राप्ता अपि न्यायमार्गान्न भ्रश्यन्तीत्याह—

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ २६ ॥

निन्दन्त्विति । नीतिनिपुणा नयविशारदा निन्दन्तु कथंचिद्दूषयन्तु वा यदि अथवा स्तुवन्तु भूषयन्तु वा । लक्ष्मीः संपत्समाविशतु प्राप्नोतु वा, उत यथेष्टं

Diplomacy Riches Death Path of justice The steadfast
The wise ... do not move a step further from the path of justice.

निरर्गलं गच्छतु वा अद्यैवेदानीमेव मरणं निधनमस्तु वा, उत युगान्तरे कल्पान्तरे वास्तु । तथापि धीरा धैर्यशालिनो न्याय्यान्न्यायादनपेतात्पथो मार्गात्पदमेकपादविन्यासमात्रमपि न प्रविचलन्ति न भ्रश्यन्ति । तेषां न्यायमार्गापरित्याग एव परमार्थो न निन्दास्तुत्यादिरिति भावः । वसन्ततिलकावृत्तम् ॥ २६ ॥

चूडोत्तंसितचन्द्रचारुकलिकाचञ्चच्छिखाभास्वरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।
अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्चाटयं-
श्चेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १ ॥

चूडेति । चूडोत्तंसितस्य शिरोभूषणीकृतस्य चन्द्रस्य चारुकलिकया मनोहरकोरकयेव चञ्चच्छिखया प्रकाशमानाग्रेण भास्वरः प्रकाशमानः । विलोलश्चञ्चलः लीलया विलासेन काम एव शलभः स दग्धो येन । श्रेयसां शुभानां दशासु अवस्थासु अग्रे पुरः स्फुरन् प्रकाशमानः । अन्तः अन्तर्मनसि स्फूर्जतः विजृम्भमाणस्य अपारस्य अनन्तस्य मोहतिमिरस्य प्राग्भारं गुरुं प्रकप्रदेशं उच्चाटयन् निरस्यन् । ज्ञानप्रदीपः ज्ञानप्रकाशकः हरः भक्तानां ज्ञानाज्ञानकृतमानसिकवाचिककायिकपापहारी भगवान् साम्बशिवः योगिनां सनकादीनां चेतःसद्मनि मनस्येव गृहे विजयते सर्वोत्कर्षेण वर्तते । प्रथमतः चूडोत्तंसितेतिवाक्ये चन्द्रपदग्रहणाद्भक्तानां तापहारीत्यर्थो लभ्यते । लीलादग्धेतिवाक्ये कामशलभपदग्रहणान्महाशत्रुसंहारीति लभ्यते । अन्तःस्फूर्जदितिवाक्ये मोहतिमिरपदग्रहणात् यथा उदितः सूर्यः सर्वतिमिराणि नाशयति, तथा अयमपि अज्ञाननाशं करोतीति । चेतःसद्मनीतिवाक्ये ज्ञानदीपपदग्रहणात्कामक्रोधादिपङ्करहितनिर्मलचित्तानां निःसङ्गानां योगिनां चेतसि यथा वर्तते तथा भक्तानां सर्वाज्ञाननाशनं कुर्वन् ज्ञानप्रदीपो हरो विजयत इत्यभिप्रायः । शार्दूलविक्रीडितम् ॥ १ ॥

उत्खातं निधिशङ्कया क्षितितलं ध्माता गिरेर्धातवो
निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन संतोषिताः ।
मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः
प्राप्तः काणवराटकोऽपि न मया तृष्णे सकामा भव ॥ २ ॥

उत्खातमिति । निधिशंकया निक्षेपोऽत्र तिष्ठतीति भ्रान्त्या क्षितितलं किंचिदिष्टकादिनिचितभूतलं उत्खातं अवदारितम् । तत्र न किंचिल्लब्धमित्यर्थः । तथा गिरेर्धातवः मन शिलाद्याः ध्माताः । सुवर्णभावं प्राप्स्यतीति धिया अग्नौ मूषायां

समूलिकाविशेषं निक्षिप्य यावत्प्राणलवोत्करैः संतापिता इत्यर्थः । तदपि न किंचिज्जातमिति भावः । 'ध्मा शब्दाग्निसंयोगयोः' इत्यस्माद्धातोः कर्मणि क्तः । 'धातुर्मनःशिलाद्यद्रेः' इत्यमरः । अत्राप्युक्तम्—'सुवर्णरूप्यताम्राश्महरितालमनःशिलाः । गैरिकाञ्जनकाश्मीरलोहसीसाश्च हिंगुलाः ॥ गन्धकाभ्रकमित्याद्या धातवो गिरिसंभवाः' इति । अत्र सुवर्णरूप्यव्यतिरेकेणैव योज्यम् । अन्यथा प्रकृतासंगतेरिति । तथा सरितां पतिः समुद्रः निस्तीर्णः । द्वीपान्तरेषु वाणिज्येन बहुधनं संपादयिष्यामीति सांयात्रिकभावेन विलङ्घित इत्यर्थः । नृपतयो राजानश्च यत्नेन छन्दानुवर्तनरूपयत्नेन संतोषिताः । तथा मन्त्राराधनतत्परेण मन्त्रजपतात्पर्यवता मनसा हेतुना श्मशाने प्रेतभूमौ निशा रात्रयो नीताः । भूतप्रेतपिशाचादिभ्यो भयमविगणय्य निध्यादिप्रदर्शकदेवताभिमुखीकरणसाधनमन्त्रजपतात्पर्येण निशासु श्मशाने स्थितमित्यर्थः । तथापि मया काणवराटकः अन्धकपर्दो न प्राप्तः । धनं तु दूरापास्तमिति भावः । 'कपर्दश्च वराटकः' इति हलायुधः । अतः तृष्णे, सकामा सफलमनोरथा भव । त्वत्प्रतिज्ञातार्थनिष्पत्तेः सिद्धसंकल्पा भवेत्यर्थः । इत्थमनर्थहेतुभूतया तृष्णया वृथाव्यापारजनितश्रम एवावशिष्टो न वाञ्छितलाभ इत्यतस्तदुन्मूलने यत्नः कर्तव्य इति भावः । वृत्तं पूर्ववत् ॥ २ ॥

अथ यद्यप्युचितमेवाचरितम्, तथापि तस्यायथातथ्यान्न फलोपधायकमभूदित्याह —

> **क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः**
> **सोढा दुःसहशीतवाततपनक्लेशा न तप्तं तपः ।**
> **ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शंभोः पदं**
> **तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वञ्चिताः ॥ ३ ॥**

क्षान्तमिति । सत्येवमपि परिभवहेतौ मनसोऽनुद्वेगः क्षमा तया न क्षान्तं न सोढम् । अवमानादिकमिति शेषः । किंत्वशक्ततयैवेति भावः । तथा गृहे उचितं युक्तं यत्सुखं मृष्टान्नभोजनकलत्रसंभोगादिजनितानन्दादि तच्च संतोषतः किमनेन तुच्छेनेति परितोषान्न त्यक्तम् । किंत्वसंभावितब्रह्मचर्येणैवेति भावः । तथा दुःसहाः सोढुमशक्या ये शीतवाततपनैः क्लेशाः दुःखानि ते सोढाः क्षान्ताः । दैह-

यात्रार्थं देशान्तरसंचारे तेषामनुभूतत्वादिति भावः । तपश्चान्द्रायणादिकं तु न तप्तं न चरितम् । तथा नियमितप्राणैः अन्तःप्रत्याहृतप्राणैः अस्माभिः अहश्च निशा च अहर्निशं अहोरात्रम् । 'अचतुर–' इत्यादिना निपातनात्साधुः । वित्तं ध्यातं चिन्तितम् । शंभोः पदं न ध्यातम् । अतो मुनिभिर्यद्यत्कर्म कृतं अवमानसहनादिकमाचरितं तत्तदेव कर्म अस्माभिश्च कृतम् । किंतु तैस्तैः तत्तत्कर्मनियतैः फलैर्वञ्चिताः वर्जिताः । तेषामयथाचरणेन वैगुण्यात्फलभाजो न जाता इत्यर्थः । क्षान्त्यादिनैव यद्यपमानादिकं क्षान्तं स्यात्तर्हि फललाभो भवेदेव, नतु तदाचरितम् । अयं चानर्थस्तृष्णादुर्विलसितमूल एवेति फलितार्थः । शार्दूलविक्रीडितं वृत्तम् ॥३॥

अथ त्रिभिर्जरादूषणद्वारा तृष्णां निन्दति—

भोगा न भुक्ता वयमेव भुक्ता-
स्तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव याता-
स्तृष्णा न जीर्णा वयमेव जीर्णाः ॥ ४ ॥

भोगा इति । भुज्यन्त इति भोगाः स्रक्चन्दनादिविषया न भुक्ताः नानुभूताः किंतु वयमेव भुक्ताः तत्प्राप्त्यर्थं दुरन्तचिन्तया ग्रस्ताः । तथा तपः व्रतोपवासादिपुण्यं न तप्तं नाचरितम्, किंतु वयमेव तप्ताः आध्यात्मिकादितापत्रयेण संतापिताः । तथा कालो न यातः न गतः तस्याखण्डदण्डायमानत्वेन यानासंभवादिति भावः । किंतु वयमेव याताः । जीवितावधिकालमुल्लङ्घ्यावसानं प्राप्ता इत्यर्थः । अथवा कालो न यातः सदाचारसज्जनसहवासादिना न गतः । तथा चेच्छ्रेयो भवेदेवेति भावः । किंतु वयमेव याताः । देहगेहादियोगक्षेमानुसंधानलम्पटत्वेन कालमतिक्रम्य गता इत्यर्थः । तथा तृष्णा न जीर्णा न शिथिला । तच्छैथिल्यहेतोरनुपस्थितत्वादिति भावः । किंतु वयमेव जीर्णाः । तृष्णासहकृतजरया शिथिलाङ्गा जाता इत्यर्थः । अतः इतः परं वा क्षिप्रं खट्वाङ्गेनेव तृष्णोन्मूलनहेतुः संपादनीय इति भावः । इन्द्रोपेन्द्रवज्रालक्षणश्रवणादुपजातिर्वृत्तम् ॥४॥

नन्वेतादृशतृष्णामुल्लङ्घ्य स्वात्मसुखानुभवतत्पराः केचन महान्तः सन्ति

किमित्याशङ्क्य सन्त्येवेति निगमयन् तस्याः पृथग्जनदुस्तरत्वद्योतनार्थं महानदीत्वं रूपयति—

आशा नाम नदी मनोरथजला तृष्णातरंगाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः ॥ ५ ॥

आशेति । मृष्टान्नपानभोजनविचित्राम्बरभूषणधारणषोडशवार्षिककामिनीसंभोगादिगोचरमानसव्यापारा मनोरथाः त एव जलानि यस्याः सा तथोक्ता । अप्राप्येष्वप्यर्थेषु प्राप्त्यभिलाषविशेषाः तृष्णाः ताभिरेव तरंगैः कल्लोलैः आकुला संकुला। अभिमतवस्तुषु स्नेहो रागः । उपलक्षणमेतद्द्वेषादीनाम् । तथा च रागद्वेषादय एव ग्राहा नक्रादयः यस्यां सन्तीति तथोक्ता । तत्तत्पदार्थलाभालाभगोचरा वितर्काः त एव विहगाः कारण्डवादिपक्षिणो यस्यां सा तथोक्ता । ' मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु ' इत्युक्तलक्षणं धैर्यं तदेव द्रुमः तं ध्वंसयति उन्मूलयतीति तथोक्ता । अज्ञानं मोहमेव तद्वृत्तयो दम्भदर्पादयो लक्ष्यन्ते । तथा च मोहा अज्ञानवृत्तय एवावर्ता जलभ्रमाः तैः सुदुस्तरा सुष्ठु तरितुमशक्या अतिगहना । एकत्र दुर्विभाव्यस्वाभाव्यात्, अन्यत्र दुरवगाहत्वाच्च इत्थमिति निर्णेतुं न शक्यत इत्यर्थः । इष्टाधिगमजनितध्यानं चिन्ता । बहुविधत्वेऽपि चिन्तानां तटद्वयरूपणोपयोगार्थं द्वित्वं वक्ष्यते । तथा प्रोत्तुङ्गे अत्युन्नते चिन्ते एव तटे यस्याः सा तथोक्ता । आशा नाम नैकविधात्यायता तृष्णा । 'दशावस्था नैकविधात्याशा तृष्णापि चायता ' इत्यमरः । नामेति प्रसिद्धौ । आशेति प्रसिद्धेत्यर्थः । या नदी । वर्तत इति शेषः । यत्तदोर्नित्यसम्बन्धात् तस्या आशानद्याः पारं गताः । ज्ञानप्लवेनेति भावः । अतएव विशुद्धमनसो निर्मलान्तःकरणा योगीश्वराः महायोगिनः नन्दन्ति । ब्रह्मानन्दमनुभवन्तीत्यर्थः । अतः सर्वदा तृष्णातरणोपायोऽन्वेषणीयः श्रेयस्कामेनेति भावः । अत्र प्रवाहरूपेणाविच्छिन्नत्वसाम्यदशायां नदीत्वम्, प्रतिकृतिस्वरूपनिरूप्यत्वसर्वतोमुखसंभ्रमत्वादिसादृश्यान्मनोरथेषु जलत्वम्, मज्जनोन्मज्जनपारम्पर्येण विरामाभावसाधर्म्यात्तृष्णासु तरङ्गत्वम्, दुष्ट-

स्वाभाव्येन ग्राहिष्णुत्वसाम्याद्रागादिषु ग्राहत्वम्, नानाविधगतिमत्त्वसादृश्याद्वितर्केषु विहगत्वम्, स्थिरतरत्वस्वाभाव्याद्धैर्ये द्रुमत्वम्, निरन्तरं दुरन्तभ्रामकत्वसाधर्म्यान्मोहेषु आवर्तत्वम्, अगाधभावद्योतकत्वसारूप्याच्चिन्तासु तटत्वं च रूपितामित्यवगन्तव्यम् । अतएव समस्तवस्तुवर्तिसावयवरूपकालंकारः । वृत्तमुक्तम् ॥५॥

उक्तमेवार्थं भङ्ग्यन्तरेणाह—

धन्यानां गिरिकन्दरेषु वसतां ज्योतिः परं ध्यायता-
मानन्दाश्रुकणान्पिबन्ति शकुना निःशङ्कमङ्केशयाः ।
अस्माकं तु मनोरथोपरचितप्रासादवापीतट-
क्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते ॥ ६ ॥

धन्यानामिति । गिरिकन्दरेषु गिरिगह्वरेषु । 'दरी तु कन्दरो वा स्त्री' इत्यमरः । वसतां विविक्ततया वर्तमानानाम् । 'विविक्तसेवी लघ्वाशी' इति वचनादिति भावः । तथा परं ज्योतिः परं ब्रह्म ध्यायतां धन्यानां पुण्यशालिनाम् । 'सुकृती पुण्यवान्धन्यः' इत्यमरः । आनन्देन ये अश्रुकणाः बाष्पबिन्दवः तान् निःशङ्कं तेषां तपःप्रशान्तत्वान्निर्भयं यथा तथा । अङ्के शेरत इत्यङ्केशया उत्सङ्गवर्तिनः । 'अधिकरणे शेतेः' इत्यच्प्रत्ययः । शकुनाः पक्षिणः पिबन्ति । किन्तु मनोरथेन वाञ्छामात्रेण उपरचिताः याः प्रासादेषु हर्म्येषु वापीतटेषु अल्पसरस्तीरेषु क्रीडाकाननेषु उद्यानेषु च केलयो विहाराः तासु कौतुकजुषां औत्सुक्यभाजां अस्माकं आयुः परं आयुरेव क्षीयते नश्यति । दुर्लभविषयचिन्तातत्परैः वृथा कालो यापितः, न तु तद्ब्रह्मज्ञानं संपादितम्, अतो वयमपि तथा न धन्या इति भावः ॥६॥

अथ विषयाणां कामिनीप्राधान्यात्तद्दूषणाभावे तत्परित्यागो न सुकर इति मनसि निधाय तां दूषयति—

स्तनौ मांसग्रन्थी कनकलशावित्युपमितौ
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।
स्रवन्मूत्रक्लिन्नं करिवरशिरःस्पर्धि जघनं
मुहुर्निन्द्यं रूपं कविजनविशेषैर्गुरु कृतम् ॥ ७ ॥

स्तनाविति। स्तनौ कुचौ मांसग्रन्थी मांसपिण्डौ, तथापि कनककलशाविति अनर्घ्यहीरमयकुम्भाविति उपमितौ। उपमाविषयीकृतकनककलशकल्पत्वेनोपवर्णिताविवित्यर्थः। मुखं वक्त्रं तु श्लेष्मागारं कफलालादन्तमलादिस्थानम्, तदपि शशाङ्केन सुधारसमयेन चन्द्रेण तुलितं समीकृतम्। तत्तुल्यत्वेनोपवर्णितमित्यर्थः। अत्र तुलितशब्दस्य सादृश्यवाचित्वात्तद्योगेऽपि न 'तुल्यार्थैरतुलोपमाभ्याम्—' इति तृतीयाप्रतिषेधः। अत्र सूत्रे सदृशवाचिन एव ग्रहणादिति। जघनं कटिपुरोभागस्तु। 'पश्चान्नितम्बः स्त्रीकट्यां क्लीबे तु जघनं पुरः' इत्यमरः। स्रवता मदनसदनदार्ढ्याभावाद्द्रवता मूत्रेण क्लिन्नमार्द्रम्। अपवित्रमित्यर्थः। तदपि करिवरशिरःस्पर्धि मदजलपरिप्लुतिश्लाघ्यगजेन्द्रकुम्भस्थलसदृशमित्युपवर्णितमिति भावः। अतः मुहुः पौनःपुन्येन निन्द्यं ग्रन्थ्याद्याकारेण जुगुप्स्यं रूपं स्तनाद्यवयवस्वरूपम्। कामिन्या इति शेषः। कविजनविशेषैः तत्तद्विशेषकल्पनाजालचतुरकवीश्वरैः गुरु कृतं कनककलशादिसादृश्यवर्णनेन श्रेष्ठीकृतम्। कविजनवाङ्मात्रसारमेवैतद्रूपम्, न तु स्वतःसिद्धसारवदिति भावः। अत्र मांसग्रन्थित्वेन स्तनयोः मर्दनानर्हत्वम्, श्लेष्मागारत्वेन मुखस्य चुम्बनाद्ययोग्यत्वम्, स्रवन्मूत्रक्लिन्नत्वेन जघनस्य हेयतया संभोगापात्रत्वं च सूचितम्। एतत्कृत एव कामिनीनां संभोगास्पदत्वेनाभिमतम्। इदमेवेत्थं जुगुप्सितत्वेन दूषितं चेत्तर्हि किमन्यत्कामिन्यां भोगयोग्यमस्तीति श्लोकतात्पर्यम्। तदुक्तम्—'हासोऽस्थिसंदर्शनमक्षियुग्ममत्युज्ज्वलं तत्कलुषं वसायाः। स्तनौ च पीनौ पिशितास्रपिण्डौ स्थानान्तरे किं नरको न योषित्॥' इति शिखरिणी॥ ७॥

अथ विषयदोषपरिज्ञानेऽप्यत्यागे कारणमाह—

अजानन्दाहात्म्यं पततु शलभस्तीव्रदहने
स मीनोऽप्यज्ञानाद्बडिशयुतमश्नातु पिशितम्।
विजानन्तोऽप्येते वयमिह विपज्जालजटिला-
न्न मुञ्चामः कामानहह! गहनो मोहमहिमा॥ ८॥

अजानन्निति। शलभः पतङ्गः दह्यतेऽनेनेति दाहः तस्य आत्मनः स्वभावस्य भावः दाहात्म्यम्। भस्मीकरणस्वाभाव्यमित्यर्थः। 'आत्मा देहे धृतौ जीवे स्वभावे

परमात्मनि' इति विश्वः । अजानन् अनवबुध्यन् तीव्रदहने जाज्वल्यमानाग्नौ पततु प्रविशतु । तत्र भस्मीभवत्वित्यर्थः । संभावनायां लोट् । तथा स प्रसिद्धो मीनो मत्स्योऽपि अज्ञानात् आत्मविनाशकारणमेतदित्यविवेकात् बडिशयुतं मत्स्यवेधनसंदानितम् । अयोमयवक्रकण्टकाग्रस्यूतमित्यर्थः । पिशितं मांसं अश्नातु भक्षयतु । आमिषलोभात्कण्टकलगनेन गलनिरोधात् सोऽपि म्रियतामित्यर्थः । नात्रानयोरपराधः । नाज्ञानमपराध्यति । 'पतङ्गमातङ्गकुरङ्गभृङ्गमीना हताः पञ्चभिरेव पञ्च' इति च न्यायादिति भावः । 'बाडिशं मत्स्यवेधनम्', 'पिशितं तरसं मांसम्' इति चामरः । किंत्विहास्मिन् लोके विजानन्तोऽपि विनिपातहेतव इति विवेकवन्तोऽप्येते वयं विपज्जालैः आपत्परम्पराभिः जटिलान्ग्रथितान् । उपद्रवहेतूनपीत्यर्थः । पचादित्वान्मत्वर्थीयः अचप्रत्ययः । कामान् विषयान् न मुञ्चामः न त्यजामः । विषयस्वरूपपरिज्ञानेऽप्यमुञ्चतामस्माकं एवापराध इति भावः । 'शे मुचादीनाम्' इति नुमागमः । विचार्यमाणे नास्माकमप्यपराधः प्रबलतरकारणसद्भावादित्याह—मोहस्य अज्ञानस्य महिमा माहात्म्यं गहनो दुर्विज्ञेयः । अघटितघटनापटुतराविद्याविलासमहिम्ना लोको जनःअविहितमपि करोति, अतो नास्माकमपराध इति भावः । शिखरिणी ॥ ८ ॥

अथ याच्ञादैन्यदूषणमारभते—अत्रायमभिप्रायः—विषयाणां याच्ञादैन्यप्रयोजनत्वाद्विषयपरित्यागविडम्बनानन्तर्येणैतत्प्रयोज्य याच्ञाजनितदैन्यमपि दूषणीयमेवेति । अतस्तत्प्रसङ्गानन्तरमेतद्दूषयितुमारभते दीनेत्यादिश्लोकदशकेन—

दीना दीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बरा
क्रोशद्भिः क्षुधितैर्निरन्नविधुरा दृश्या न चेद्गेहिनी ।
याच्ञाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं
को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान् ॥ ९ ॥

दीनेति । दीना दरिद्राः अतएव दीनानि शोभाहीनानि मुखानि येषां तैः । कृतः । क्रोशद्भिः रुदद्भिः । तत्कृतः । क्षुधितैः संजातक्षुधैः । बुभुक्षितैरित्यर्थः । क्षुधाशब्दोऽप्याबन्तः तस्मात् । 'तदस्य संजातं तारकादिभ्य इतच्' इतीतच्प्रत्ययः । तारकादिराकृतिगणः । क्षुदिति दकारान्तपक्षे तु क्षुधं प्राप्तैः क्षुधितैः

क्षुधातुरैः। कर्तरि क्तः। 'वसतिक्षुधोरिट्' इतीडागमः। शिशुकैः अत्यन्तबालकैः। अल्पार्थे कप्रत्ययः। सदा सर्वदैव आकृष्टं अन्नपानादियाच्ञापूर्वकमाक्षिप्तं जीर्णाम्बरं विशीर्णवस्त्रं यस्याः सा तथा। निरन्ना अन्नपानरहिता अतएव विधुरा विह्वला। निरन्ना च सा विधुरा चेति विशेषणसमासः। अन्नाभावात्कष्टजीवनेत्यर्थः। 'विधुरः प्रत्यवेते स्यात्कष्टविश्लिष्टयोरपि' इति विश्वः। गेहिनी गृहिणी दृश्या दृष्टिगोचरा न चेत् न स्याद्यदि तर्हि मनस्वी सुमेधाः धैर्यशाली। प्रशंसायां विनिः। कः पुमान् याच्ञाभङ्गाद्भयं तेन गद्गदो दीनस्वरः। अनुकरणशब्दोऽयम्। यो गलः कण्ठः तत्र त्रुट्यन्ति शकलीभवन्ति अतएव विलीनानि अनुच्चारितप्रायाणि अक्षराणि वर्णाः यस्मिन्कर्मणि तद्यथा तथा स्वस्य दग्धः पुष्टो यो जठरः उदरं तस्यार्थे। तत्पूरणार्थमित्यर्थः। 'अर्थे कृते च शब्दौ द्वौ तादर्थ्येऽव्ययसंज्ञितौ' इत्यमरः। दग्धशब्दोऽत्र निर्वेदाभिद्योतकः। यथोक्तं सुरेश्वरवार्तिके—'अस्य दग्धोदरस्यार्थे किं न कुर्वन्त्यसाम्प्रतम्' इति। देहीति वदेत् ब्रूयात्। न कोऽपीत्यर्थः। तस्याः दृश्यत्वादीदृगवस्थापन्नो भवति, अतोऽनर्थमूलत्वात्तत्परित्यागोऽवश्यं कर्तव्य इति भावः। शार्दूलविक्रीडितम् ॥ ९ ॥

नायं ते समयो रहस्यमधुना निद्राति नाथो यदि
स्थित्वा द्रक्ष्यति कुप्यतिप्रभुरिति द्वारेषु येषां वचः।
चेतस्तानपहाय याहि भवनं देवस्य विश्वेशितु-
र्निर्दौवारिकनिर्दयोक्त्यपरुषं निःसीमशर्मप्रदम् ॥ १० ॥

नायमिति। नायं ते समयः प्रतिप्रस्तावो नास्ति यदि प्रभुर्द्रक्ष्यति तर्हि कुप्यति अधुना रहस्यं मंत्रालोचनं स्वामी करोति स्वामी निद्राति निमीलनं कुरुते। येषां धनोन्मदानां द्वारेषु इति वचः चेतस्तान् प्रभूनपहाय विश्वेशितुः परमेश्वरस्य महेशस्य भवनं याहि। किंभूतं भवनं निर्दौवारिकनिर्दयोक्त्यपुरुषं निर्गतो दौवारिको यस्मात् स निर्गतद्वारिकं प्रतीहाररहितं निर्दयोक्त्या कठोरोक्त्यापरुषा यस्मिन् तन्निर्दयोक्त्यपरुषं निर्दौवारिकं च तत् निर्दयोक्त्यपरुषं च निर्दौवारिकनिर्दयोक्त्यपरुषं तत्पुनः किं भूतं निःसीमशर्मप्रदं सीमारहितं सर्वसौख्यं प्रददातीति अतिनिर्मलसौख्यदायकम् ॥ १० ॥

उपक्रान्तं भोगास्थैर्यं तत्तद्भङ्ग्यन्तरेण नवभिर्वर्णयति—

आक्रान्तं मरणेन जन्म जरसा चात्युज्ज्वलं यौवनं
संतोषो धनलिप्सया शमसुखं प्रौढाङ्गनाविभ्रमैः ।
लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनै-
रस्थैर्येण विभूतयोऽप्युपहता ग्रस्तं न किं केन वा ॥ ११ ॥

आक्रान्तमिति । जन्म उत्पत्तिः मरणेन स्वरूपनाशकेन मृत्युना आक्रान्तं ग्रस्तम् । 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च', 'अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः' इत्यादिवचनैरिति भावः । अत्युज्ज्वलं अतिशयेन भास्वरं यौवनं नूतनवयः । तारुण्यमिति यावत् । जरसा जरया अपायहेतुभूतया आक्रान्तम् । 'जराया जरसन्यतरस्याम्' इति जरसादेशः । संतोषः दैववशालब्धवस्तुजनितपरितोषो धनलिप्सया तदुपद्रवकारिण्या धनवाञ्छया आक्रान्तः । लभेः सन्नन्तात्स्त्रियामप्रत्यये टाप् । शमसुखं इन्द्रियव्यापारोपरमापादितानन्दः प्रौढाङ्गनानां प्रगल्भविलासिनीनां विभ्रमैः तदुपमर्दकैः कटाक्षविक्षेपकर्णकण्डूयनेन कोमलकुचमर्दनादिविलासैः आक्रान्तम् । गुणाः विद्याविनयादयः मत्सरिभिः परोत्कर्षासहिष्णुभिर्लोकैः जनैः । तदपवादकैरित्यर्थः । उपहताः । ग्रस्ता इति यावत् । वनभुवः पुण्यारण्यप्रदेशाः व्यालैः दुष्टगजैः सर्पैर्वा । तत्प्रवेशानवकाशप्रदैरिति भावः । उपहता ग्रस्ताः । नृपा राजानः दुर्जनैः दुर्मन्त्रोपदेशेन तद्बुद्धिविपर्यासकारिभिः पिशुनैः उपहताः । समाक्रान्ता इत्यर्थः । विभूतयः संपदोऽपि अस्थैर्येण तदप्रतिष्ठावहेन अस्थिरत्वेन उपहताः दूषिताः । अतः किं वस्तु केन वा उपद्रवेण न ग्रस्तम् । उक्तरीत्या सर्वमपि ग्रस्तमेवेत्यर्थः । अतः सर्वस्याप्यस्थिरत्वान्न कुत्रापि विस्रम्भः कर्तव्य इति भावः । वृत्तं पूर्ववत् ॥ ११ ॥

पुनः श्रोतृजनस्य विश्वासदार्ढ्यार्थमुक्तमेवार्थं भङ्ग्यन्तरेणाह—

आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते
लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव व्यापदः ।
जातंजातमवश्यमाशु विवशं मृत्युः करोत्यात्मसा-
त्तत्किं तेन निरङ्कुशेन विधिना यन्निर्मितं सुस्थिरम् ॥ १२ ॥

आधीति । विविधैः नानाप्रकारैः आधीनां मनोव्यथानां व्याधीनां पित्तादिशरीररोगाणां च शतैः । अनेकैराधिव्याधिभिरित्यर्थः । 'पुंस्याधिर्मानसी व्यथा', 'रोगव्याधिगदामयाः' इति चामरः । जनस्य आरोग्यं देहस्वास्थ्यं उन्मूल्यते निर्मूलीक्रियते । तथा यत्र यस्मिन्पुरुषे लक्ष्मीः ऐश्वर्यसमृद्धिः । तिष्ठतीति शेषः । तत्र तस्मिन्पुरुषे व्यापदः महोपद्रवाः विवृतानि उद्घाटितानि द्वाराणि कवाटानि यासां तास्तथोक्ता इव पतन्ति । तद्विघटनार्थमप्रतिबन्धं प्रविशन्तीत्यर्थः । तथा मृत्युः अन्तकः जातंजातं प्रारब्धकर्मवशात्पुनःपुनरुत्पन्नम् । वीप्सायां द्विर्भावः । अत एव विवशं विह्वलम् । जन्तुमिति शेषः । अवश्यं नियतं आशु शीघ्रमेव आत्मसात् आत्माधीनं करोति । मारयतीत्यर्थः । 'तदधीनवचने' इति सातिप्रत्ययः । अतः तेन प्रसिद्धेन निरङ्कुशेन निरर्गलेन । अप्रतिहतव्यापारेणेत्यर्थः । विधिना ब्रह्मणा यद्वस्तु निर्मितं तत्किं वा सुस्थिरम् । न किमपीत्यर्थः । अतोऽस्थिरभोगाशंसनं न कर्तव्यमिति भावः । शार्दूलविक्रीडितम् ॥ १२ ॥

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्री-
र्र्थाः संकल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूगाः ।
कण्ठाश्लेषोपगूढं तदपि च न चिरं यत्प्रियाभिः प्रणीतं
ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरीतुम् ॥ १३ ॥

आयुरिति । आयुः कल्लोललोलं कल्लोलवल्लोलमतिभंगुरम् । नत्वाचन्द्रार्कस्थायीत्यर्थः । यौवनश्रीः यौवनसंपत् कतिपयेषु अल्पेषु दिवसेषु तिष्ठतीति तथोक्ता । नतु यावज्जीवं वर्तिनीत्यर्थः । अर्थाः धनधान्यग्रामाश्वादिवस्तुविभवाः संकल्पकल्पाः । मनोरथतुल्या इत्यर्थः । तेऽपि न चिरस्थायिन इति भावः । 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति कल्पप्प्रत्ययः । भोगपूगाः विषयपरम्परा घनसमये वर्षाकाले यास्तडितस्तासामिव विभ्रमाः स्फुरणानि येषां तथोक्ताः । क्षणभङ्गुरा इत्यर्थः । तथा प्रियाभिः प्रौढाङ्गनाभिः यत्कण्ठाश्लेषेण कण्ठग्रहेण उपगूढम् । आलिङ्गनमिति यावत् । भावे क्तः । प्रणीतं रचितं तदपि प्रौढाङ्गनालिङ्गनमपि न चिरम् । चिरकालावस्थायि न भवतीत्यर्थः । अतः हे मनुष्याः, भवात्संसाराद्यद्भयं तदेवाम्भोधिः तस्य पारं तरीतुम् । संसारसागरमुल्लङ्घितुमित्यर्थः । ब्रह्मण्या-

सक्तचित्ता भवत । ब्रह्मध्यानैकतत्परा भवतेत्यर्थः । नह्येतद्व्यतिरेकेण तरणोपायं कंचिदपि पश्यामीति भावः । त्रिवारशुद्धया दृढतरविश्वासोत्पादनार्थं त्रिभिः श्लोकैः परमार्थपर्यवसायिनी ब्रह्मध्याननिष्ठोपदिष्टा नत्वनर्थपर्यवसायिनी संसारासक्तिः । यदत्र युक्तं तद्ग्राह्यं तत्त्वविचारपारावारपारीणैः इति श्लोकत्रयतात्पर्यम् । स्रग्धरावृत्तम् ॥ १३ ॥

अथ स्वविनिपातहेतौ संनिहिते लोका न कुशला भवन्ति । महदेतदाश्चर्यमित्याह—

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहम् ।
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस्तथाप्यहितमाचरतीति चित्रम् ॥ १४ ॥

व्याघ्रीति । जरा वार्धकावस्था व्याघ्रीव व्याघ्राङ्गनेव । 'जातेरस्त्रीविषयादयोपधात्' इति ङीप् । परितर्जयन्ती भीषयन्ती सती तिष्ठति । कलेवरकवलनाभिनिवेशेन वर्तमाना मृत्योः प्रत्यासत्तिमभिनिवेदयतीत्यर्थः । रोगाः वातपित्तश्लेष्मादिव्याधयश्च शत्रवो वैरिण इव देहं प्रहरन्ति ताडयन्ति । परिपीडयन्तीत्यर्थः । आयुश्च भिन्नघटात् सच्छिद्रकलशात् अम्भ इव परिस्रवति । प्रतिक्षणं नश्यतीत्यर्थः । तथापि लोको जनः अहितं परापकारं आचरतीति चित्रमाश्चर्यम् । परापकारादन्यत्कर्म कुशलमिति भावः । यद्वा अहितं स्वस्यानिष्टं आचरति स्वविनिपातहेतुभूतमेव कर्म करोति । नत्वात्मोद्धरणार्थं ब्रह्मध्यानादि करोतीत्यर्थः । चित्रमाश्चर्यम् । तदुक्तम्—' उद्धरेदात्मनात्मानं नात्मानमवसादयेत् । आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥' इत्यादि । तर्जयन्तीत्यत्र तर्जयतेः परस्मैपदम् ' तर्जयन्निव केतुभिः' इत्यादिमहाकविप्रयोगात्सिद्धम् । तर्जयतेरनुदात्तत्वेऽपि चक्षिङो ङित्करणेनानुदात्तत्वनिमित्तस्यात्मनेपदस्यानित्यत्वज्ञापनात्परस्मैपदमिति । उपमा । वसन्ततिलका । १४ ॥

अथ सर्वस्यापि कालनियम्यत्वात्तन्महिमानं दशभिर्वर्णयति । तत्रादौ तस्य नियामकत्वं प्रकटयन्नमस्करोति—

सा रम्या नगरी महान्स नृपतिः सामन्तचक्रं च त-
त्पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चन्द्रबिम्बाननाः ।
उद्वृत्तः स च राजपुत्रनिवहस्ते बन्दिनस्ताः कथाः
सर्वं यस्य वशादगात्स्मृतिपथं कालाय तस्मै नमः ॥ १४ ॥

सेति । अत्र सर्वत्रापि तच्छब्दः पूर्वानुभूतविषयः । अतएव न यच्छब्दापेक्षा । तदुक्तं काव्यप्रकाशे—'प्रक्रान्तप्रसिद्धानुभूतार्थगोचरस्तच्छब्दो न यच्छब्दमपेक्षते' इति । तथा च सा पूर्वानुभूता । रन्तुं योग्या रम्या मनोहरा नगरी राजधानी च तत्र स महान् साम्राज्यभारधौरेयतया पूज्यो नृपतिः राजा च । तस्येति संबन्धसामान्ये षष्ठी सर्वत्र संबध्यते । तस्य नृपतेस्तत् सामन्तचक्रं प्रत्यर्थिराजमण्डलम् । यद्वा सेवार्थं समागताखण्डमण्डलाधिपतिपरिवारश्च तस्य पार्श्वे स्थितमिति शेषः । सा विदग्धपरिषत् विद्वत्सभा । अथवा विदग्धानां कर्तव्यार्थचतुराणां परिषत् समुदायश्च । 'कृत्यवस्तुषु चातुर्यं वैदग्ध्यं परिकीर्त्यते' इति लक्षणात् । तस्य ताः चन्द्रबिम्बमिव आननं यासां ताः सुन्दर्यश्च यस्य स उद्वृत्तः उत्पथगतः । उद्दण्ड इति यावत् । राजपुत्रनिवहः राजकुमारवर्गश्च । तस्य ते बन्दिनः स्तुतिपाठकाश्च । 'बन्दिनः स्तुतिपाठकाः' इत्यमरः । यस्य ताः कथाश्च आख्यवाचश्च । इति सर्वमशेषमपि यस्य कालस्य वशात् आयत्तत्वात् । 'वश आयत्ततायां च' इत्यमरः । स्मृतिपथं स्मरणमार्गम् । 'ऋक्पूः—' इत्यादिना समासान्तोऽच्प्रत्ययः । अगात् प्रापत् । कालमहिम्ना सर्वमपि नष्टमभूदित्यर्थः । सर्वसंहर्तुः कालस्य महिमा वर्ण्यत इति भावः । 'इणो गा लुङि' इति गादेशः । तस्मै कालाय नमः प्रह्वीभावः । 'कालः कलयतामहम्' इति भगवद्वचनात्कालो भगवानेव । तथा च तन्नमस्काररूपमङ्गलाचरणं युज्यत इति भावः । 'नमः-स्वस्ति—' इत्यादिना चतुर्थी । शार्दूलविक्रीडितम् ॥ १४ ॥

अथास्याक्षधूर्तसाम्येन सर्वप्राणिनियन्तृत्वमाह—

यत्रानेकः क्वचिदपि गृहे तत्र तिष्ठत्यथैको
यत्राप्येकस्तदनु बहवस्तत्र नैकोऽपि चान्ते ।
इत्थं नेयौ रजनिदिवसौ लोलयन्द्वाविवाक्षौ
कालः कल्यो भुवनफलके क्रीडति प्राणिशारैः ॥ १६ ॥

यत्रेति । यत्र यस्मिन् गृहे वेश्मनि कोष्ठे च क्वचिदपि कदाचित् । यद्वा यत्र क्वचिदपि यस्मिन् कस्मिंश्चिद्गृहे । अनेकः बहुलः प्राणी शारश्च तिष्ठति । अथानन्तरं तत्र तस्मिन्नेव गृहे कदाचित् एकस्तिष्ठति । एकत्र कालभेदवशात् अन्यत्र परिणामवशाच्चेति भावः । तथा यत्र यस्मिन्गृहे कदाचिदेकस्तिष्ठति, तदनु तदनन्तरं बहवश्च । तिष्ठन्तीति शेषः । तत्र तस्मिन् गृहे अन्ते अवसानकाले द्यूतसमाप्तौ च एकोऽपि न तिष्ठति । इत्थमुक्तरीत्या भुवनं फलकमिव शारप्रवर्तनोचितकोष्ठयन्त्रमिव तस्मिन् नेयैः । प्रवर्तनीयैरिति यावत् । प्राणिनः शाराः द्यूतगूढा इव । अक्षोपकरणानीवेति यावत् । तैः साधनैः । 'पल्याणोऽस्त्री विहंगे ना शारे (द्यूत) गूढो नपुंसकम्' इति वैजयन्ती । कल्यः कलनासमर्थः देवनचतुरश्च.कालः (कर्ता) अक्षधूर्तश्च गम्यते । रजनिदिवसौ रात्र्यहनी (कर्म) द्वौ अक्षौ पाशकाविव । 'पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते' इत्यमरः । लोलयन् पौनःपुन्येन गृह्णन् सृजंश्चेत्यर्थः । क्रीडति दीव्यति । प्राणिसंयोगवियोगयोः वृद्धिक्षयादीनां च काल एव कर्तेति भावः । अत्राक्षाविवेति स्पष्टोपमालिङ्गात्सर्वत्रोपमितसमासः । अतएवोपमालंकारः । यदि चक्रक्रीडनोपयोगित्वाद् रूपकमेवाश्रयणीयमित्यभिमानस्तदैकदेशवर्तिरूपकमुपमात्वन्नमिति संक्षेपः । मन्दाक्रान्तावृत्तम् ॥ १५ ॥

अथ नित्यप्रमत्तोऽयं लोको नैतन्महिमानं ज्ञातुं शक्नोतीत्याह—

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं
व्यापारैर्बहुकार्यभारगुरुभिः कालोऽपि न ज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ १७ ॥

आदित्यस्येति । आदित्यस्य सूर्यस्य गतागतैः । उदयास्तमयैरिति यावत् । अहरहः प्रत्यहम् । अहन्यहनीति भावः । वीप्सायां द्विरुक्तिः । अत्यन्तसंयोगे द्वितीया । जीवितम् आयुः संक्षीयते विनश्यति । कालक्रमेणायुःक्षयो भवतीत्यर्थः । 'क्षि क्षये' इत्यस्माद्धातोः कर्तरि लट् । तथापि सोऽयं न ज्ञायत इत्याह—बहवः अनेके ये कार्यभाराः देहगेहादिनिमित्तकर्तव्यार्थपरम्पराः तैः गुरुभिः गरिष्ठैः व्यापारैः जीवनोपायोद्योगैः कालोऽपि जीवितक्षयकरसमयोऽपि न ज्ञायते । कार्यशतपर्याकुलव्यापारपारवश्यान्नावबुध्यत इत्यर्थः । तथा जन्मजराविपत्तिमरणम् । उत्पत्तिजरावस्थाविपन्निधनानीत्यर्थः । 'सर्वो द्वन्द्वो विभाषैकवद्भवति' इत्येकवद्भावः । दृष्ट्वा त्रासो भीतिश्च नोत्पद्यते नोदेति । किंतु जगत् सर्वोऽपि लोकः । मोहमयीं अज्ञानप्रचुराम् । बुद्धिविपर्यासकारिणीमिति यावत् । प्राचुर्ये मयट् । टित्त्वात् ङीप् । प्रमादोऽनवधानता । 'प्रमादोऽनवधानता' इत्यमरः । मदिरा मद्यं तां पीत्वा निषेव्य उन्मत्तभूतं क्षीबकल्पम् । विवेकशून्यमिति यावत् । भवतीति शेषः । कालेनैव प्रमादं प्रापितोऽयं लोकः कथंकारमेतन्महिमानं ज्ञास्यतीति भावः । एतदादिश्लोकपञ्चकं शार्दूलविक्रीडितम् ॥ १७ ॥

अथ प्राणिनां विचार्यमाणे सुखलेशस्याप्यवकाशो नास्तीत्याह—

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥ १८ ॥

आयुरिति । नृणां मर्त्यानामायुः जीविताविधिकालो वर्षशतं शतसंवत्सरात्मकं परिमितं क्लृप्तम् । ब्रह्मणेति शेषः । 'विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः' इत्यमरः । तदर्धं तस्य वर्षशतस्यार्धं पञ्चाशद्वत्सरात्मकं रात्रौ गतम् । इन्द्रियव्यापारोपरमरूपनिद्रावस्थया गलितं भवतीत्यर्थः । परस्य तस्य जागरूकेण वर्तमानस्य अर्धस्य पञ्चाशद्वत्सरात्मकस्य अपरं अन्यदर्धं पञ्चविंशतिसंवत्सरात्मकं बालत्ववृद्धत्वयोः गतम् । अज्ञानाशक्तत्वावस्थाविषयतया नष्टमित्यर्थः । द्वादशसंवत्सरात्मकमेकमर्धं बालत्वे, अन्यद् वृद्धत्व इति विवेकः । शेषं पञ्चविंशतिसंव-

त्सरात्मकमेतदवशिष्टार्धं व्याधिभिः रोगैः वियोगदुःखैः पुत्रकलत्रादिविरहप्रयुक्तदुःखैः सहितं सत् सेवादिभिः स्वजीवनार्थं वित्तवत्परिचर्यादिकष्टकर्मभिः नीयते अतिवाह्यते । अतः वारितरङ्गचञ्चलतरे अतिचञ्चले । क्षणिक इत्यर्थः । जीवे जीवने प्राणिनां सौख्यं सुखं कुतः । न कुतोऽपीत्यर्थः । उक्तरीत्या विचार्यमाणे सुखलेशस्याप्यनवकाशादिति भावः । शार्दूलविक्रीडितम् ॥ १८ ॥

अथ कालत्रययुक्तबाल्याद्यवस्थाक्रमेण मर्त्यः सर्वोऽपि म्रियत इत्युपसंहरति—

> क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः
> क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ।
> जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनु-
> र्नरः संसारान्ते विशति यमधानीयवनिकाम् ॥ १९ ॥

क्षणमिति । क्षणं क्षणमात्रम् । ईषत्कालमित्यर्थः । अत्यन्तसंयोगे द्वितीया । बालः शिशुः भूत्वा तथा क्षणमपि कामेन मन्मथेन रसिकः शृङ्गाररसाभिनिविष्टः । यद्वा काम्यन्ते अभिलष्यन्त इति कामाः कामिनीसंभोगादिविषयाः तेषु रसिकः अनुरागवान्, युवा तरुणश्च भूत्वा । तथा क्षणं वित्तैर्हीनः निर्धनो भूत्वा । क्षणमपि च संपूर्णविभवः परिपूर्णधनश्च भूत्वा । 'अर्थरैविभवा अपि' इति धनपर्यायेष्वमरः । तथा क्षणं जरया जीर्णैः शीथिलैः । विश्लिष्टसंधिबन्धैरिति यावत् । अङ्गैरुपलक्षितः अतएव वलीभिः विश्लथचर्मभङ्गीभिः मण्डिता भूषिता । चिह्नितेति यावत् । 'मडि भूषणे' इति धातोः कर्मणि क्तः । तनुः गात्रं यस्य तथोक्तो भूत्वा । नरः । सर्वोऽपीत्यर्थः । नटः तत्तद्वेषधारी नर्तक इव । संसारस्य बाल्ययौवनाद्यवस्थानुभवरूपसंसारकपटनाटकस्य नाट्यप्रवर्तकाडम्बरस्य च अन्ते अवसाने । यमो धीयतेऽत्रेति यमधानी संयमिनीनाम्नी यमपुरी । 'करणाधिकरणयोश्च' इति ल्युट् । टित्त्वात् ङीप् । सा यवनिका प्रतिसीरा तिरस्करिणीव तां विशति मृतो भवति । अन्यत्र प्रविष्टो भवतीत्यर्थः । 'प्रतिसीरा यवनिका' इत्यमरः । नवविशेषणानि योज्यानि । उपमालंकारः । शिखरिणीवृत्तम् ॥ १९ ॥

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महा-
न्संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥ २० ॥

यावदिति । यावत् यावत्पर्यन्तमिदमेतत् शरीरं स्वस्थं पीडारहितम् । भवतीति शेषः । एवमुत्तरत्रापि तथा । यावत् न विद्यते रुजा रुक् यस्य तत्तथोक्तं । आरोग्ययुक्तं भवति । 'स्त्री रुग्रुजा चोपताप—' इत्यमरः । यद्वा अरुजं सत् स्वस्थं अविकलं भवति । तथा यावत् जरा दूरतः दूरे भवति । वार्धकदशा याव-त्पर्यन्तं नाक्रमतीत्यर्थः । तथा यावदिन्द्रियशक्तिश्चक्षुरादीन्द्रियपाटवं च अप्र-तिहता अखण्डिता भवति । यावदायुषः क्षयो नाशो न भवति । तावत् ताव-त्पर्यन्तमेव । तन्मध्यकाल एवेत्यर्थः । वेत्तीति विद्वान् तेन विदुषा अभिज्ञेन । 'विदेः शतुर्वसुः' इति वसुप्रत्ययः । आत्मनः श्रेयसि विषये । मोक्षप्राप्तावित्यर्थः । महान् फलजननपर्याप्तत्वेन पूज्यः प्रयत्नः ज्ञानवैराग्यतपःसंपादनोद्योगः कार्यः । ननु कोऽयं नियमः अवसानेऽपि प्रयत्नस्य कर्तुं युक्तत्वादित्याशङ्क्यावकाशाभावान्न युक्त इति व्यतिरेकदृष्टान्तमाह—भवने गृहे संदीप्ते अग्निना दह्यमाने सति कूप-खननं प्रति कूपनिर्माणं प्रतिः उद्यमः प्रयत्नः कीदृशः कीदृग्विधः । न युक्त इत्यर्थः । अवकाशाभावादिति भावः । गृहदाहवेलायां कूपखननप्रयत्न इव अवसानकाले श्रेयःप्राप्त्यर्थोद्यमोऽपि न युज्यत इति भावः । तस्मात्स्वस्थावस्थायामेव श्रेयः-साधनसंपादनपरेण भवितव्यमवश्यं बुद्धिमतेति तात्पर्यम् । शार्दूलविक्रीडितम् ॥१६॥

अथ स्थायिनः शमस्योदयवशाच्छान्तरसाभिव्यञ्जकवाक्यान्याह पञ्चभिः—

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने
सुखासीनाः शान्तध्वनिषु रजनीषु द्युसरितः ।
भवाभोगोद्विग्नाः शिव शिव शिवेत्युच्चवचसः
कदा यास्यामोऽन्तर्गतबहुलबाष्पाकुलदशाम् ॥ २१ ॥

स्फुरदिति । शान्ताः उपरताः ध्वनयः पक्षिमृगादिरुतानि यासु तासु तथो-क्तासु । एतेन चित्तविक्षेपहेतुराहित्यं सूच्यते । रजनीषु रात्रिषु स्फुरन्ती प्रकाश-

माना स्फारा प्रवृद्धा च या ज्योत्स्ना चन्द्रिका तया धवलितं पाण्डुरीकृतं तलं प्रदेशः यस्य तस्मिन् क्वापि कस्मिंश्चित् द्युसरितो गङ्गायाः सम्बन्धिनि पुलिने सैकते सुखं यथा तथा आसीना उपविष्टाः सन्तः । भवाभोगात् संसारविस्तारादुद्विग्नाः विह्वलाः । दुःखजनकत्वादिति भावः । वयमिति शेषः । अतः शिवेत्यादित्रिवारं उच्चानि ताराणि वचांसि आक्रन्दवचनानि येषां ते तथोक्ताः । 'आर्तवचस.' इति पाठे दैन्यवचनाः सन्तः कदा कस्मिन्वा समये अन्तः अभ्यन्तरे गताः । नियमनवशादन्तर्लीना इति यावत् । बहुलाश्च ये बाष्पाः आनन्दाश्रूणि तैः आकुला व्याकुला या दशा अवस्था तां यास्यामः । अन्तर्नियमितानन्दबाष्पपर्याकुलावस्थां कदा गमिष्याम इत्यर्थः । 'दशम्' इति पाठे बाष्पाकुलाः या दृग्दृष्टिः तां यास्याम इत्यन्वयः । 'कदा स्यामानन्दोद्गतबहुलबाष्पाकुलदृशः' इति पाठे आनन्दादुद्गता उत्पन्ना ये बहुलबाष्पाः तैः आकुला दृशो येषां ते तथोक्ताः । कदा स्याम भवेम । तदानीं खलु वयं कृतकृत्या इति भावः । शिखरिणी ॥ २१ ॥

स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वां
ध्येये ध्यानं निवेश्य क्षितिधरकुहरग्रावपर्यङ्कमूले ।
आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्रसादात्स्मरारे
दुःखं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थम् ॥ २२ ॥

स्नात्वेति । गङ्गाया इमानि गाङ्गानि । 'तस्येदम्' इत्यण् । तैः पयोभिः गंगाजलैरित्यर्थः । स्नात्वा शुद्धो भूत्वा । हे विभो शंभो, शुचिभिः शुद्धैः । शास्त्रसंमतैरिति यावत् । कुसुमैः फलैश्च त्वां अर्चयित्वा समाराध्य । एतेन बाह्यपूजाया अप्यंशतः प्राधान्यमस्तीति सूचितम् । ध्येये ध्यातुं योग्ये वस्तुनि । त्वच्चरणारविन्द एवेत्यर्थः । ध्यानं निवेश्य । एकाग्रचित्तो भूत्वेत्यर्थः । तथा क्षितिधरकुहरे यो ग्रावा पाषाणः स एव पर्यङ्कः सुखशय्या तस्य मूले । निषण्णः सन्निति शेषः । समाधिव्युत्थानानन्तरं सुखसंवेशयोग्यताद्योतनार्थं प्राणिणः पर्यङ्कत्वरूपणम् । आत्मन्येवारमत इत्यात्मारामः । विषयान्तरासक्तिशून्यः सन्नित्यर्थः । 'रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि' इति स्मृतेः । तथा फलाशी फलाहारः । शरीरधारणार्थमिति भावः । गुरुवचनरतः आचार्योपदिष्टकर्माचरणतत्परः सन् । अहम् ।

इत्थंभूततया एव श्रेयोहेतुत्वादिति भावः । हे स्मरारे मदनान्तक शंभो, त्वत्प्रसादात् त्वदनुग्रहात् मकरेण मकराकाररेखया सह वर्तत इति समकरश्चरणो यस्य तस्मिन् तथोक्ते पुंसि महाभाग्यसम्पन्ने पुरुषे विषये । राज्ञीत्यर्थः । सेवासमुत्थं परिचर्यासमुत्पन्नं दुःखं कदा मोक्ष्ये । परमेश्वरानुग्रहं विना श्रेयोलाभाभावादिति भावः । समकरचरणस्य महाभाग्यसम्पन्नत्वमुक्तं सामुद्रिके—'मकरो मत्स्यरेखा च पद्मशङ्खाकृतिः पदे । महाधनी महाभोगी दाता दीर्घायुरेव च ॥' इति स्रग्धरा ॥ २२ ॥

अथ हिंसादिराहित्यवृत्तिमाह—

हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं
व्यालानां पशवस्तृणाङ्कुरभुजस्तुष्टाः स्थलीशायिनः ।
संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां
तामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ॥ २३ ॥

हिंसेति । हिंसया अन्योपतापकवधादिभिः शून्यं रहितम् । अयत्नेन यत्नं विना लभ्यं प्राप्यं अशनं अन्नम् । 'भिस्सा स्त्री भक्तमन्धोऽन्नम्' इत्यमरः । धात्रा चित्रविचित्रसृष्टिकर्त्रा ब्रह्मणा व्यालानां सर्पाणाम् । 'व्यालो दुष्टगजे सर्पे' इति विश्वः । मरुता वायुना कल्पितं निर्मितम् । पशवः गोप्रभृतयः तृणाङ्कुरान् बालतृणानि भुञ्जन्तः सन्तः स्थलीशायिनः अकृत्रिमप्रदेशे शयनवन्तः तुष्टाः संतुष्टाः । संसारः पुत्रमित्रकलत्रादिधारावाहिरूपा संसृतिः स एवार्णवः तस्य लङ्घने अतिक्रमणे क्षमा धीः येषां तेषां नृणां जनानाम् । यथा तरणिद्वारा समुद्रं तरन्ति तथा ज्ञानद्वारा संसारं तरन्तीत्यर्थः । सा वृत्तिः पूर्वोक्तप्रसिद्धजीवनं कृता निर्मितम् । ब्रह्मणेति शेषः । तां वृत्तिमन्वेषयतां मार्गमाणानां निरस्तरजस्तमोजनितदोषाणां सर्वे गुणाः सततं सर्वदा समाप्तिं नाशं प्रयान्ति प्राप्नुवन्ति । 'यो मे गर्भगतस्यापि वृत्तिं कल्पितवान्प्रभुः । शेषवृत्तिविधानाय स किं सुप्तोऽथ वा मृतोऽपि वा ॥' इति वचनरीत्या वृत्तिकल्पने जागरूकः सन् भगवान् वर्तत इति मत्वा हिंसादिराहित्येन वृत्तिं कुर्वन् यदृच्छया संप्राप्तद्रव्येण तुष्टः सन् यत्र

कुत्र वा वसन् रजस्तमोदोषैः अलिप्तः सन् योगी सर्वदात्मानुसंधानं कुर्वन् स्थातव्य इत्याशयः । वृत्तं पूर्ववत् ॥ २३ ॥

अथ निर्वृत्तिप्रकारमाह—

गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य
ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ।
किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशङ्काः
कण्डूयन्ते जरठहरिणाः स्वाङ्गमङ्गे मदीये ॥ २४ ॥

गङ्गेति । गङ्गायाः सुरनद्याः तीरे कूले । 'कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु' इत्यमरः । तीरग्रहणं तद्गतशीतत्वपावित्र्यादिसिद्ध्यर्थम् । हिमगिरेः शीतनगस्य शिलायाः पाषाणस्य उपरि बद्धं पद्मासनं येन तस्य । किंच ब्रह्मणः ध्यानमुपासनं तस्य अभ्यसनं अभ्यासः तस्य विधिः विधानं तेन । 'विधिर्विधाने दैवेऽपि' इत्यमरः । योगनिद्रां गतस्य प्राप्तस्य योगिनः मम तैः सुदिवसैः पुण्यादिनैः भाव्यं किम् । यत्र ते जरठहरिणाः वृद्धकुरंगाः निर्विशङ्काः निर्भीकाः सन्तः स्वाङ्गं स्वशरीरं मदीये अङ्गे शरीरे कण्डूयन्ते । तैर्भाव्यमित्यभिप्रायः । एवं च ग्रामनिवासं त्यक्त्वा गङ्गातीरे हिमवत्पर्वतपाषाणोपरि पद्मासनासनवर्ती ब्रह्मध्यानाभ्यासविधानेन योगनिद्रां गतः सन्नहं निर्विशङ्कैः जरठहरिणैः साकं यदा स्थास्ये तदा मे सुदिवसा जायन्त इत्यभिप्रायः । मन्दाक्रान्तावृत्तम् ॥ २४ ॥

अथ पञ्चभूतानि संबोध्याह—

मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जल
भ्रातर्व्योम निबद्ध एव भवतामन्त्यः प्रणामाञ्जलिः ।
युष्मत्सङ्गवशोपजातसुकृतस्फारस्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परब्रह्मणि ॥ २५ ॥

मातरिति । हे मातः जननि मेदिनि वसुमति, हे तात जनक मारुत वायो, हे सखे सुहृत् तेजः, हे सुबन्धो शोभनबन्धो जल उदक, हे भ्रातः सहोदर व्योम अम्बर, भवतां युष्माकमन्त्यः चरमः प्रणामाञ्जलिः नमस्कारपूर्वकाञ्जलिः निबद्ध एव । 'पाणिर्निकुब्जः प्रसृतिस्तौ युतावञ्जलिः पुमान्' इत्यमरः । युष्माकं

सङ्गस्य योगस्य वशेन अधीनेन उपजातं यत्सुकृतं तेन स्फारं विस्तारं स्फुरत् निर्मलं च यत् ज्ञानं तेन अपास्तः दूरतस्त्यक्तः, समस्तमोहमहिमा पुत्रमित्रकलत्राद्यभिनिवेशाज्ञानातिशयः सन् अहं परे ब्रह्मणि सच्चिदानन्दरूपिणि निर्विकारे निष्कलङ्के निरञ्जने ब्रह्मणि लीये । एवं च दारैषणावित्तैषणापुत्रैषणादिरहितः सन् चिदानन्दस्वरूपः सन् विदेहकैवल्यं जीवन्मुक्तः सन् अहं वर्ते इत्याशयः । शार्दूलविक्रीडितम् ॥ २५ ॥

> धैर्यं यस्य पिता क्षमा च जननी शांतिश्चिरं गेहिनी
> सत्यं मित्रमिदं दया च भगिनी भ्राता मनःसंयमः ।
> शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजनं,
> ह्येते यस्य कुटुंबिनो वद सखे कस्माद्भयं योगिनः ॥ २६ ॥

दैवसंपद्रूपपरिवारवतः कुतोऽपि भयं नास्तीत्याह धैर्यमिति ॥ हे सखे त्वं वद ब्रूहि । एते कुटुंबिनो यस्य योगिनस्तस्य कस्माद्भयं न कुतोऽपीत्यर्थः । कुटुंबिन एवाह । यस्य योगिनो धैर्यं पितास्ति । क्षमा च सहिष्णुता जननी मातापित्रोरिवोभयोः पालकत्वात् । यस्य शांतिश्चिरं गेहिनी भार्यास्ति । तथा सत्यं यथादृष्टश्रुतकथनरूपमिदं मित्रमस्ति । दया च सर्वभूतहितेच्छा भगिनी, मनःसंयमो मनोनिग्रहो भ्राता, भूमितलं शय्या, यस्य दिश एव वसनं वस्त्रं, ज्ञानामृतं भोजनमित्येतादृशी यस्य संपदस्ति तस्य कुतोऽपि भयं नास्तीति भावः । "दैवी संपद्विमोक्षाय निबंधायासुरी मता । इति भगवद्वचनात्तद्वतो न कुतो भयम् ॥" ॥ २६ ॥

fortitude
Companion
restraint of mind

अथ महाकवि श्रीसोमदेवभट्टविरचिते कथा-सरित्सागरे कथामुखलम्बके पञ्चमे तरङ्गे देवस्मिताकथा ।

—:o:—

अस्तीह नगरी लोके ताम्रलिप्तीति विश्रुता ।
तस्यां च धनदत्ताख्यो वणिगासीन्महाधनः ॥ १ ॥
स चापुत्रो बहून्विप्रान्संघाट्य प्रणतोऽब्रवीत् ।
तथा कुरुत पुत्रो मे यथा स्यादचिरादिति ॥ २ ॥
ततस्तमूचुर्विप्रास्ते नैतत्किंचन दुष्करम् ।
सर्वं हि साधयन्तीह द्विजाः श्रौतेन कर्मणा ॥ ३ ॥
तथा च पूर्वमभवद् राजा कश्चिदपुत्रकः ।
पञ्चोत्तरं शतं चाभूत्तस्यान्तः पुरयोषिताम् ॥ ४ ॥
पुत्रीयेष्ट्या च तस्यैको जन्तुर्नाम सुतोऽजनि ।
तत्पत्नीनामशेषाणां नूतनेन्दूदयो दृशि ॥ ५ ॥
जानुभ्यां पर्यटन्तं च बालं जातु पिपीलिका ।
ऊरुदेशे ददंशैनं मुक्तचीत्कारकातरम् ॥ ६ ॥
तावता तुमुलाक्रन्दमन्तः पुरमजायत ।
राजापि पुत्र पुत्रेति चक्रन्द प्राकृतो यथा ॥ ७ ॥
क्षणात्तस्मिन्समाश्वस्ते बालेऽपास्तपिपीलिके ।
दुःखैककारणं राजा स निनिन्दैकपुत्रताम् ॥ ८ ॥
अस्ति कश्चिदुपायो मे येन स्युर्बहवः सुताः ।
इति तत्परितापेन पप्रच्छ ब्राह्मणांश्च सः ॥ ९ ॥
ते तं प्रत्यब्रुवन्राजन्नुपायोऽत्र तवास्त्ययम् ।
हत्वैतं त्वत्सुतं वह्नौ तन्मांसं हूयतेऽखिलम् ॥ १० ॥

तद्गन्धाघ्राणतो राज्ञ्यः सर्वाः प्राप्स्यन्ति ते सुतान् ।
एतच्छ्रुत्वा स राजा तत्तथा सर्वमकारयत् ॥ ११ ॥
स्वपत्नीसमसंख्यांश्च स पुत्रान्प्राप्तवान्नृपः ।
अतस्तवापि होमेन साधयामो वयं सुतम् ॥ १२ ॥
इत्युक्त्वा धनदत्तं ते ब्राह्मणाः क्लृप्तदक्षिणम् ।
होमं चक्रुस्ततस्तस्य वणिजो जातवान्सुतः ॥ १३ ॥
गुहसेनाभिधानश्च स बालो ववृधे क्रमात् ।
पिताथ धनदत्तोऽस्य भार्यामन्विष्यति स्म सः ॥ १४ ॥
ततः स तत्पिता तेन तनयेन समं ययौ ।
द्वीपान्तरं स्नुषाहेतोर्वाणिज्यव्यपदेशतः ॥ १५ ॥
तत्र देवस्मितां नाम धर्मगुप्ताद्वणिग्वरात् ।
स्वपुत्रगुहसेनस्य कृते कन्यामयाचत ॥ १६ ॥
धर्मगुप्तस्तु संबन्धं न तमङ्गीचकार सः ।
आलोच्य ताम्रलिप्तीं तां दूरां दुहितृवत्सलः ॥ १७ ॥
सा तु देवस्मिता दृष्ट्वा गुहसेनं तदैव तम् ।
तद्गुणाकृष्टचित्तत्वाद्बन्धुत्यागैकनिश्चया ॥ १८ ॥
सखीमुखेन कृत्वा च संकेतं सह तेन सा ।
प्रियेण पितृयुक्तेन रात्रौ द्वीपात्ततो ययौ ॥ १९ ॥
ताम्रलिप्तीमथ प्राप्य तयोः कृतविवाहयोः ।
जायापत्योर्मिथः प्रेम पाशबद्धमभून्मनः ॥ २० ॥
अथास्तं पितरि प्राप्ते प्रेरितोऽभूत्स बन्धुभिः ।
कटाहद्वीपगमने गुहसेनो यदृच्छया ॥ २१ ॥
तच्चास्य गमनं भार्या तदा नाङ्गीचकार सा ।
सेर्ष्या देवस्मिता काममन्यस्त्रीसङ्गशङ्किनी ॥ २२ ॥
ततः पत्न्यामनिच्छन्त्यां प्रेरयत्सु च बन्धुषु ।
कर्तव्यनिश्चलो मूढो गुहसेनो बभूव सः ॥ २३ ॥

अथ गत्वा निराहारश्चक्रे देवकुले व्रतम् ।
उपायमिह देवो मे निर्दिशत्विति चिन्तयन् ॥ २४ ॥
सापि देवस्मिता तद्वत्तेन सार्धं व्यधाद्व्रतम् ।
ततोऽनयोः शिवः स्वप्ने दंपत्योर्दर्शनं ददौ ॥ २५ ॥
द्वे च रक्ताम्बुजे दत्वा स देवस्तावभाषत ।
हस्ते गृह्णीतमेकैकं पद्ममेतदुभावपि ॥ २६ ॥
दूरस्थत्वे च यद्येकः शीलत्यागं करिष्यति ।
तदन्यस्य करे पद्मं म्लानिमेष्यति नान्यथा ॥ २७ ॥
एतच्छ्रुत्वा प्रबुध्यैव दंपती तावपश्यताम् ।
अन्योन्यस्यैव हृदयं हस्तस्थं रक्तमम्बुजम् ॥ २८ ॥
ततः स चक्रे प्रस्थानं गुहसेनो धृताम्बुजः ।
सा तु देवस्मिता तत्र तस्थौ पद्मार्पितेक्षणा ॥ २९ ॥
गुहसेनोऽपि तं प्राप कटाहद्वीपमाशु सः ।
कर्तुं प्रववृते चात्र रत्नानां क्रयविक्रयौ ॥ ३० ॥
हस्ते च तस्य तद्दृष्ट्वा सदैवाम्लानमम्बुजम् ।
तत्र केचिद्वणिक्पुत्राश्चत्वारो विस्मयं ययुः ॥ ३१ ॥
ते युक्त्या तं गृहं नीत्वा पाययित्वा भृशं मधु ।
पप्रच्छुः पद्मवृत्तान्तं सोऽपि क्षीबः शशंस तम् ॥ ३२ ॥
ततस्तं चिरनिर्वाह्यरत्नादिक्रयविक्रयम् ।
विचिन्त्य गुहसेनं ते चत्वारोऽपि वणिक्सुताः ॥ ३३ ॥
संमन्त्र्य कौतुकात्पापास्तद्भार्याशीलविप्लवम् ।
चिकीर्षवो ययुः शीघ्रं ताम्रलिप्तीमलक्षिताः ॥ ३४ ॥
तत्रोपायं विचिन्वन्तः सुगतायतनस्थिताम् ।
प्रव्राजिकामुपाजग्मुर्नाम्ना योगकरण्डकाम् ॥ ३५ ॥
प्रीतिपूर्वं च तामूचुर्भगवत्यस्मदीप्सितम् ।
साध्यते चेत्त्वया तत्र दास्यामोऽर्थान्बहूनिति ॥ ३६ ॥

साप्युवाच ध्रुवं यूनां कापि स्त्री वाञ्छितेह वः ।
तद् ब्रूत साधयाम्येव धनलिप्सा च नास्ति मे ॥ ३७ ॥
जगाद चैतांस्तत्पुत्राः सद्भावं वदताधुना
कां स्त्रियं वाञ्छथ क्षिप्रं तामहं साधयामि वः ॥ ३८ ॥
तच्छ्रुत्वा ते च तामूचुर्यैषा देवस्मिताभिधा ।
गुहसेनवणिग्भार्या तया नः संगमं कुरु ॥ ३९ ॥
श्रुत्वेति प्रतिजज्ञे तत्कार्यं प्रव्राजिकाथ सा ।
वणिक्सुतानां चैतेषां स्वगृहं स्थितये ददौ ॥ ४० ॥
रञ्जयित्वाथ तत्रत्यं जनं भक्ष्यादिदानतः ।
गुहसेनगृहं तत्सा विवेश सह शिष्यया ॥ ४१ ॥
ततो देवस्मितावासगृहद्वारमुपागताम् ।
तां शुनी शृङ्खलाबद्धा रुरोधापूर्वरोधिनी ॥ ४२ ॥
ततो देवस्मिता दृष्ट्वा सा तां प्रावेशयत्स्वयम् ।
किमागता स्यादेषेति विचिन्त्य प्रेष्य चेटिकाम् ॥ ४३ ॥
प्रविष्टा चाशिषं दत्वा कृत्वा व्याजकृतादराम् ।
सा तां देवस्मितां साध्वीं पापा प्रव्राजिकाब्रवीत् ॥ ४४ ॥
सदैव त्वद्दिदृक्षा मे भवत्यद्य पुनर्मया ।
स्वप्ने दृष्टासि तेनाहमुत्सुका त्वां द्रष्टुमागता ॥ ४५ ॥
भर्त्रा विनाकृतां त्वां च दृष्ट्वा मे दूयते मनः ।
प्रियोपभोगवन्ध्ये हि विफले रूपयौवने ॥ ४६ ॥
इत्यादिभिर्वचोभिस्तां साध्वीमाश्वास्य सा चिरम् ।
आमन्त्र्य चाययौ तावद् गृहं प्रव्राजिका निजम् ॥ ४७ ॥
द्वितीयेऽह्नि गृहीत्वा च मरिचक्षोदनिर्भरम् ।
मांसखण्डं पुनः सा तद् ययौ देवस्मितागृहम् ॥ ४८ ॥
द्वारशुन्यै ददौ तस्यै मांसखण्डं च तत्र तम् ।
सापि तं भक्षयामास सद्यः समरिचं शुनी ॥ ४९ ॥

ततो मरिचदोषेण तस्या दृग्भ्यामवारितम् ।
अश्रु प्रववृते तस्याः प्रस्रौति स्म च नासिका ॥ ५० ॥
सापि प्रव्राजिका तस्मिन्क्षणे देवस्मितान्तिकम् ।
प्रविश्य तत्कृतातिथ्या प्रारेभे रोदितुं शठा ॥ ५१ ॥
दृष्टा च देवस्मितया सा कृच्छ्रादेवमब्रवीत् ।
पुत्रि संप्रति पश्यैतां बहिः प्ररुदतीं शुनीम् ॥ ५२ ॥
एषा ह्यद्य परिज्ञाय मां जन्मान्तरसंगताम् ।
प्रवृत्ता रोदितुं तेन कृपयाश्रु ममोद्गतम् ॥ ५३ ॥
तच्छ्रुत्वा बहिरालोक्य शुनीं तां रुदतीमिव ।
किमेतच्चित्रमिति सा दध्यौ देवस्मिता क्षणम् ॥ ५४ ॥
प्रव्राजिकाथ सावादीत्पुत्रि पूर्वत्र जन्मनि ।
अहमेषा च भार्ये द्वे विप्रस्याभूव कस्यचित् ॥ ५५ ॥
स चावयोः पतिर्दूरं देशान्तरमितस्ततः ।
वारं वारं प्रयाति स्म राजादेशेन दूत्यया ॥ ५६ ॥
तत्प्रवासे च कुर्वन्त्या स्वेच्छं पुरुषसंगमम् ।
मया भूतेन्द्रियग्रामो नोपभोगैरवञ्चयत् ॥ ५७ ॥
भूतेन्द्रियानभिद्रोहो धर्मो हि परमो मतः ।
अतो जातिस्मरा पुत्रि जाताहमिह जन्मनि ॥ ५८ ॥
एषा तु शीलमेवैकं ररक्षाज्ञानतस्तदा ।
तेन श्वयोनौ पतिता किं तु जातिं स्मरत्यसौ ॥ ५९ ॥
कोऽयं धर्मो ध्रुवं धूर्ते रचनेयं कृतानया ।
इति संचिन्त्य सुप्रज्ञा सा तां देवस्मिताब्रवीत् ॥ ६० ॥
इयच्चिरं मया धर्मो न ज्ञातो भगवत्ययम् ।
तत् त्वं केनापि कान्तेन पुंसा मे संगमं कुरु ॥ ६१ ॥
ततः प्रव्राजिकावादीत्केचिद् द्वीपान्तरागताः ।
इह स्थिता वणिक्पुत्रास्तर्हि तानानयामि ते ॥ ६२ ॥

Hari Chand.

इत्युक्त्वा सा प्रमुदिता ययौ प्रव्राजिका गृहम् ।
सा च देवस्मिता स्वैरं स्वचेटीरित्यभाषत ॥ ६३ ॥
नूनं दृष्ट्वा तदम्लानं हस्ते मद् भर्तुरम्बुजम् ।
पृष्ट्वा च तं यथावृत्तं मद्यपं जातु कौतुकात् ॥ ६४ ॥
मद्विध्वंसाय के ऽप्येते द्वीपात्तस्मादिहागताः ।
वणिक्पुत्राः शठास्तैश्च प्रयुक्तेयं कुतापसी ॥ ६५ ॥
तद् धूस्तूरसंयुक्तं मद्यमानयत द्रुतम् ।
गत्वाथ कारयध्वं च शुनः पादमयोमयम् ॥ ६६ ॥
इति देवस्मितोक्तास्ताश्चेट्यश्चक्रुस्तथैव तत् ।
एका च चेटी तद् रूपं तद्वाक्यादकरोत्तदा ॥ ६७ ॥
सापि प्रव्राजिका तस्माद् वणिक्पुत्रचतुष्टयात् ।
अहं प्रथमिकादिष्टादादायैकमथाययौ ॥ ६८ ॥
स्वशिष्यावेषसंच्छन्नं तं च देवस्मितागृहे ।
तत्र सायं प्रवेश्यैव निर्गत्याप्रकटं ययौ ॥ ६९ ॥
ततोऽत्र तं वणिक्पुत्रं तत्सधत्तूरकं मधु ।
चेटी देवस्मितावेषा सा सादरमपाययत् ॥ ७० ॥
तेन सोऽविनयेनेव मधुना हृष्टचेतनः ।
हृत्वा वस्त्रादि चेटीभिस्तत्र चक्रे दिगम्बरः ॥ ७१ ॥
शुनः पादेन दत्वाङ्कं ललाटे ताभिरेव च ।
नीत्वा सोऽशुचिसंपूर्णे क्षिप्तोऽभूत्खातके निशि ॥ ७२ ॥
यामेऽथ पश्चिमे संज्ञां लब्ध्वात्मानं ददर्श सः ।
स्वपापोपनते मग्नमवीचाविव खातके ॥ ७३ ॥
अथोत्थाय कृतस्नानो ललाटेऽङ्कं परामृशन् ।
नग्नः सन्स वणिक्पुत्रो ययौ प्रव्राजिकागृहम् ॥ ७४ ॥
ममैवैकस्य हास्यत्वं मा भूदिति स तत्र तान् ।
आगच्छन्मुषितोऽस्मीति सखीनन्यानभाषत ॥ ७५ ॥

जागरेणातिपानेन शिरोर्तिं व्यपदिश्य च ।
प्रातः स तस्थौ वस्त्रेण वेष्टयित्वाङ्कितं शिरः ॥ ७६ ॥
तथैव च पुनः सायं द्वितीयोऽपि वणिक्सुतः ।
एत्य देवस्मितागेहं खलीकारमवाप्तवान् ॥ ७७ ॥
सोऽप्येत्य नग्नो वक्ति स्म तत्रैवाभरणान्यहम् ।
स्थापयित्वापि निर्यातो मुषितस्तस्करैरिति ॥ ७८ ॥
प्रातः सोऽपि शिरः शूलव्यपदेशेन वेष्टनम् ।
कृत्वा प्रच्छादयामास ललाटतटमङ्कितम् ।
एवं सापह्नवाः सर्वे वणिक्पुत्राः क्रमेण ते ।
प्रापुः साङ्कं खलीकारमर्थनाशं च लज्जिताः ॥ ८० ॥
अस्या अपि भवत्वेवमिति ते च खलीकृतिम् ।
तस्याः प्रव्राजिकायास्तामप्रकाश्य ततो ययुः ॥ ८१ ॥
साथ प्रव्राजिकान्येद्युर्जगाम सह शिष्यया ।
कृतप्रयोजनास्मीति हृष्टा देवस्मितागृहम् ॥ ८२ ॥
तत्र देवस्मिता सा तां कृत्वादरमपाययत् ।
मधु धत्तूरसंयुक्तं परितोषादिवाहृतम् ॥ ८३ ॥
तेन मत्तां सशिष्यां च छिन्नश्रवणनासिकाम् ।
तामप्यशुचिपङ्कान्तः क्षेपयामास सा सती ॥ ८४ ॥
गत्वा मैते वणिक्पुत्राः पतिं हन्युः कदाचन ।
अहमद्यैव भर्तारं गत्वा रक्षामि युक्तितः ॥ ८५ ॥
आरुह्य च प्रवहणं वाणिज्यव्याजतस्ततः ।
कटाहद्वीपमगमद् यत्र सोऽस्याः पतिः स्थितः ॥ ८६ ॥
गत्वा तं च पतिं तत्र वणिङ्मध्ये ददर्श सा ।
गुहसेनं समाश्वासमिव मूर्तिधरं बहिः ॥ ८७ ॥
सोऽपि तां पुरुषाकारां दूराद् दृष्ट्वा पिबन्निव ।
प्रियायाः सदृशः कोऽयं वणिक्त्वादित्यचिन्तयत् ॥ ८८ ॥

सा च देवस्मिता तत्र भूपं गत्वा व्यजिज्ञपत् ।
विज्ञप्तिं मे ऽस्ति तत्सर्वाः संघट्यन्तां प्रजा इति ॥ ८९ ॥
ततः सर्वान्समानीय राजा पौरान्सकौतुकः ।
का ते विज्ञप्तिरस्तीति वणिग्वेषामुवाच ताम् ॥ ९० ॥
ततो देवस्मितावादीदिह मध्ये मम स्थिताः ।
पलाय्य दासाश्चत्वारस्तान्मे देवः प्रयच्छतु ॥ ९१ ॥
अथ तामवदद् राजा सर्वे पौरा इमे स्थिताः ।
तत्सर्वान्प्रत्यभिज्ञाय निजान्दासान्गृहाण तान् ॥ ९२ ॥
ततस्तया जगृहिरे स्वगृहे प्राक्खलीकृताः ।
वणिक्सुतास्ते चत्वारः शिरःस्वाबद्धशाटकाः ॥ ९३ ॥
सार्थवाहसुता एते कथं दासा भवन्ति ते ।
इति क्रुद्धाश्च तामूचुस्तत्रस्था वणिजस्तदा ॥ ९४ ॥
ततः प्रत्यब्रवीत्सा तान्यदि न प्रत्ययोऽस्ति वः ।
ललाटं प्रेक्ष्यतामेषां शुनःपादाङ्कितं मया ॥ ९५ ॥
तथेति तेषामुन्मोच्य चतुर्णां शीर्षपट्टकान् ।
सर्वेऽपि ददृशुस्तत्र शुनःपादं ललाटगम् ॥ ९६ ॥
लज्जितेऽथ वणिग्ग्रामे राजा संजातविस्मयः ।
किमेतदिति पप्रच्छ स तां देवस्मितां स्वयम् ॥ ९७ ॥
सा शशंस यथावृत्तं सर्वेऽपि जहसुर्जनाः ।
न्याय्यास्ते भवतीदासा इति तां चावदन्नृपः ॥ ९८ ॥
ततोऽन्ये वणिजस्तेषां चतुर्णां दास्यमुक्तये ।
ददुस्तस्यै धनं भूरि साध्व्यै दण्डं च भूपतेः ॥ ९९ ॥
आदाय तद् धनमवाप्य पतिं च तं स्वं
देवस्मिता सकलसज्जनपूजिता सा ।
प्रत्याययौ निजपुरीमथ ताम्रलिप्तीं
नास्या बभूव च पुनः प्रियविप्रयोगः ॥ १०० ॥

इति स्त्रियो देवि महाकुलोद्गता
विशुद्धधीरैश्चरितैरुपासते ।
सदैव भर्तारमनन्यमानसाः
पतिः सतीनां परमं हि दैवतम् ॥ १०१ ॥

इति महाकवि श्रीसोमदेवविरचिते कथासरित्सागरे
कथामुखलम्बके पञ्चमे तरङ्गे देवस्मिता-
कथा समाप्ता ।

॥ श्रीः ॥

पण्डितराजश्रीजगन्नाथविरचितः

भामिनीविलासः ।

अच्युतरायकृतया प्रणयप्रकाशाख्यया व्याख्यया समेतः ।

अन्योक्त्युल्लासः ।

प्रेम्णा प्रणम्य पार्श्वोः प्रपदानि प्रेयसीप्रिययोः ।
प्रचुरं प्रपञ्चयामि प्रौढ्यै प्रणयप्रकाशमहम् ॥
नहि भामिनीविलासः सुखसाध्यो भवति रसविलोलधियाम् ।
प्रणयप्रकाशविरहे तस्मात्तेनैव तैः स संपाद्यः ॥

इह श्रीमत्परमेश्वरशिरःकिरीटहीरकहारीभूतसमुल्लसत्तरङ्गां सकलोपनिषदन्तरङ्गां भगवतीं गङ्गामाराध्य तत्प्रसादसमासादितसकलविद्याकमलिनीविद्योतनत्वमहिम्ना श्रीमज्जगन्नाथनाम्ना पण्डितराजेन 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे॥' इति भरतसूत्रात्, 'सुन्दरी स्वेशहृदयं वशीकृत्य स्वसद्गुणैः । लौकिकं वैदिकं चापि कुजतीष्टं ससाधनम् ॥ तद्वत्काव्याद्यपि श्रीमन्महारामायणादिकम् । श्रोतुर्मनो वशीकृत्य हितं वक्ति सहेतुकम् ॥' इत्यादि मदुक्तसाहित्यसारप्रपञ्चितपद्धत्या धर्मादिचतुर्विधसाधनपुरुषार्थानां भामिनीविलासाख्ययथार्थलघुकाव्यप्रणयनेनोपदिदिक्षया तन्निष्प्रत्यूहतादिप्रयोजनं शिष्टाचाराद्यनुमितश्रुतितः प्राप्तविधानं वस्तुनिर्देशलक्षणं मंगलं तावदन्योक्त्युल्लासेऽत्र तयैवाप्रस्तुतप्रशंसारूपया शिष्यानुशासनार्थं ग्रन्थारम्भेऽपि द्योत्यते—

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयतु कस्मिन्मृगपतिः ॥ १ ॥

दिगन्त इति । अयं बुद्धिस्थत्वेनापरोक्षो मृगपतिः, 'सिंहो मृगेन्द्रः' इत्यमरासिंहः, इदानीं वर्तमानकाले, न तु भविष्यत्कालेऽपि, अस्मिन्प्रत्यक्षे लोके भूर्लोके पुनरप्रथमे । एतेन पूर्वं शतशः करिवरा विदारिता एवेति ध्वनितम् । अनुपमशिखानामतितीक्ष्णाग्राणां नखानां पाण्डित्यं नैपुण्यं कस्मिन्प्रकटयतु । न क्वापि प्रकटयत्वित्यन्वयः । तत्र हेतुं पूर्वार्धेनाह—यतः, मदमलिनगण्डा दानदिग्धकपोलाः करटिनः । 'करटो गजगण्डे स्यात्कुसुम्भे निन्द्यजीविनि । एकादशाहश्राद्धेऽपि दुर्दुरूढेऽपि वायसे ॥' इति विश्वः । विशालगण्डस्थलमण्डिता गजा इत्यर्थः । दिगन्ते प्राच्यादिदिक्प्रान्ते श्रूयन्ते । 'ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥' इत्यमरात्केवलं परोक्षमेव श्रवणद्वारावगम्यन्ते, न त्वपरोक्षीक्रियन्त इत्यर्थः । तथा करिण्यो गजिन्यः कारुण्यास्पदं खलु तद्यूथनाथानां प्रागेवानेन विदारितत्वात्तासां स्त्रीत्वेन वधानर्हत्वाच्च तास्तावदनुकम्पापात्रमेवेति भावः । किंच मृगा हरिणा असमशीला अतुल्यबलाः खलु । तस्माद्युक्तमेवोक्तमृगपतेः शौर्यप्रकटनस्थानाभाववर्णनमित्याशयः । इयं हि मुख्योक्त्या व्याख्या ॥ अन्योक्तिस्तु—स्वस्य कस्यचिदन्यस्य वा पण्डितमाण्डलिकचक्रवर्तिनः स्तुतिरियमिति पाण्डित्यपदान्यथापत्त्योच्यते । वस्तुतस्तु तस्याः सर्वतोमुखत्वेन यथाप्रसंगं यथायोगं प्रकल्पनेऽपि न क्षतिः । इयमेव व्यवस्था यावदग्रिमान्योक्तिष्वपीति दिक् ॥ मंगलपक्षे तु वस्तुनिर्देशलक्षणमंगलपरतया श्लेषेणार्थत्रयं ज्ञेयम् । तद्यथा—मृगपतिः । अत्र अजहत्स्वार्थलक्षणया नृमृगपतिर्नरसिंहो ग्राह्यः । तथा चेदं प्रह्लादस्य हिरण्यकशिपुवधोत्तरं ब्रह्मादीन्प्रति भगवत्प्रभाववर्णनवचनम् । हे ब्रह्मादयः, अयमपरोक्षो मृगपतिरुक्तरीत्या नृहरिः । इदानीमित्याद्युत्तरार्धशेषं

she-elephant करटिन्!

प्राग्वदेव। एवं करटिशब्देनाप्येतद्वध्यत्वेनासुरा एव ज्ञेयाः। ते तु दिगन्ते श्रूयन्ते। समुद्रपातालादिनिविष्टत्वाद्दूरतरवर्तमानत्वेन केवलमाकर्ण्यन्त एवेत्यर्थः। तद्वत्करिणीपदेनापि कयाधूप्रभृतयोऽसुरस्त्रियो बोध्याः। तथा मृगयन्त्यन्वेषयन्तीति व्युत्पत्त्या शुक्रपुत्रादयस्तन्मन्त्रिण एव मृगशब्दिताः। तस्माद्भगवतो नारसिंहस्य पुनः शौर्यप्रकाशने न किमपि प्रकृते पात्रमिति हिरण्यकशिपुवधादितच्चरितात्मकवस्तुव्यञ्जनेन विचित्रं तच्छौर्यैश्वर्यमिति द्योतितम्। तेन तस्य कविकर्तृकनमस्क्रियात्मकमपि मङ्गलं ध्वन्यते। तस्यास्त्वत्तोऽहं निकृष्टो मत्तस्त्वमुत्कृष्ट इति भावनापूर्वककायिकादित्रिविधप्रह्वीभावैकरूपत्वात्॥ पक्षे 'शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च। ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्'॥ इति स्मृतेर्मृगयन्त्यन्वेषयन्ति सदसद्वस्तु विचारयन्ति ते मृगा ब्राह्मणास्तान्पाति त्रिःसप्तवारं क्षत्रक्षपणपूर्वकं पृथ्वीप्रदानेन पालयतीति तथा। श्रीमत्परशुराम इत्यर्थः। नखानां न विद्यते खमाकाशपदवाच्यमवकाशजातं येषां ते तथा। वध्यराहित्येन निरवकाशानां शराणामित्यर्थः। ननु कुत एवमिति चेत्तत्राह—दिगन्त इति पूर्वार्धेन। करटिन ऐरावताद्यष्टदिग्गजोपलक्षिता जहत्स्वार्थलक्षणया तत्स्वामिन इन्द्रादिलोकपाला इत्यर्थः। तेषां मदमलिनगण्डत्वं तु मदजन्यस्वेदादेव बोध्यम्। एवं करिण्यः करा राजग्राह्यनियतधनभागास्ते विद्यन्ते येषां नृपाणां तेषां स्त्रिय इत्यर्थः। स्वनिहतराजरमण्य इति यावत्। तद्वन्मृगा निरुक्तव्युत्पत्त्या विचारशीला अनकादिक्षत्रिया इत्यर्थः। इदं हि श्रीमत्परशुरामविजयोत्तरं स्वगतमेव कश्यपादिसप्तर्षिवचनम्॥ उक्तार्थमेवान्यत्॥ पक्षे गोपीसान्त्वनार्थं भगवता प्रेषितमुद्धवं प्रति राधिकावाक्यमिदम्॥ तथा हि। हे उद्धव, अयमस्मद्बुद्धिस्थत्वेन प्रत्यक्षः। एतेन प्रीत्यतिशयः सूचितः। मृगेति। मृगो हरिणस्तद्वत्पतिः। स यथा वन एव प्रायः क्रीडति तद्वदयं श्रीकृष्णो वृन्दावन एवास्मद्भर्ता। न तु ग्रामादौ प्रसिद्धस्तथेत्यर्थः। अस्मज्जारः। श्रीकृष्ण इति यावत्। एवं चास्मान्वञ्चयित्वा गतस्तस्येदं वक्ष्यमाणफलमित्याकूतम्। उत्तरार्धशेषस्तु यथाश्रुत एव। तदेतत्कालावच्छेदेनास्मिँल्लोके मार्दवविलासास्पदं तस्य नास्त्येवेति भावः। तदेवोपपादयति—दिगन्त इति। मदेति। मदेन मृगमदेन मलिनाश्चित्रितत्वेन श्यामा गण्डाः कपोला यासां

तास्तथा। कस्तूरीकलुषितकपोला इत्यर्थः। एतादृशाः करटिनः करटाः पूर्वोक्तविश्वाभिन्न्यजीविनः शतशोऽसुराः सन्ति यस्येति स तथा। अनेकदुष्टासुरचमूनायकस्य। भौमासुरस्येति यावत्। तेन स्वगृहे रोधितत्वेन तत्संबन्धिन्यः करिण्यः करशब्दितबलिग्रहणशालिन्योऽनेकराजानां षोडशसहस्रसंख्याकाः कन्यका इत्यर्थः। तास्तु निरुक्तरोधनवशात्कारुण्यास्पदं यथा स्यात्तथा दिगन्ते क्वचिद्दिक्प्रान्ते श्रयन्त इति यावत्। तस्मात्ता अपि न सद्यः संभोगार्हा भवन्तीति भावः। तथा मृगा मृगयन्ति राधादिगोप्युपभोग्यत्वकीर्तिश्रवणेन श्रीकृष्णमन्वेषयन्तीति मृगाः। कुब्जादिमथुरानार्य इत्यर्थः। तास्त्वसमशीलाः सामान्यवनितात्वेनातुल्यस्वभावाः खलु। तस्मात्तासु तु पुरुषोत्तमस्य भगवतः कदाप्यनुचित एव विहार इति रहस्यम्। एवं च युक्तमेवास्यास्मान्वक्षयतः संभोगस्थलराहित्यमधुनेति तत्त्वम्॥ अत्र प्रथमतृतीयचतुर्थार्थेषु युद्धवीरः, तथा द्वितीये पाण्डित्यवीरः, पञ्चमे विप्रलम्भशृङ्गारानुप्राणितः सौन्दर्यवीरश्च रसः। अर्थचतुष्टयेऽपि धीरोदात्तो नायकः। पञ्चमे तु कितवः। परकीयाः प्रगल्भाः सौन्दर्यगर्विता विप्रलब्धा नायिकाः। अप्रस्तुतप्रशंसा श्लेषः काव्यलिङ्गं परिकरः परिकराङ्कुरः संकरश्चालंकाराः। एतेषां लक्षणानि तु सोदाहरणमुक्तानि कुवलयानन्दकारिकासु—'अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया। एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते॥ नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयात्मकः। सर्वदो माधवः पायात्स यो गङ्गामदीधरत्॥ अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना। उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः॥ समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्। जितोऽसि मन्द कंदर्प मच्चित्तेऽस्ति त्रिलोचनः॥ अलंकारः परिकरः साभिप्राये विशेषणे। सुधांशुकलितोत्तंसस्तापं हरतु नः शिवः॥ साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः। चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः॥' इति। संकरलक्षणं तूक्तं कुवलयानन्द एव—'नीरक्षीरन्यायेनास्फुटभेदालंकारमेलने संकरः' इति। एवं रसादिलक्षणान्यपि मदीयसाहित्यसारतो ज्ञेयानि। विस्तरभयात्तानि नेह प्रपञ्च्यन्ते। अत्र यद्यपि अन्योक्त्याद्युक्तरसापेक्षयाप्रस्तुतप्रशंसाद्यलंकारस्यैवाधिकचमत्कारकारित्वेन प्राधान्यादस्यार्थचित्राख्यमध्यमकाव्यत्वेऽपि निरुक्तालंकारापेक्षयापि तद्व्यञ्जितयुद्ध-

वीरस्यैवाधिक्येनाह्लादजनकत्वाद्ध्वनिसंज्ञकोत्तमोत्तमकाव्यत्वमेव ज्ञेयम् । अयं काव्यभेदस्तु रसगङ्गाधराख्यैतद्ग्रन्थ एव प्रसिद्धः । तदिहान्योक्त्याख्यप्रथमोल्लासे नीत्युपदेशात्ससाधनयोर्धर्मार्थयोः प्रतिबोधनम् । नीतिमत एव धर्मार्थयोः संभवात् । द्वितीये शृङ्गारोल्लासे तु स्वकीयाया नायिकायाः संवर्णनेन 'धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ' इति स्मृतेस्तादृशस्य तस्योपपादनम् । अवशिष्टोल्लासद्वये तु ससाधनस्य मोक्षस्यैव प्रबोधनमिति । न च वेदेनैव धर्माद्यखिलपुमर्थोपदेशस्य ससाधनं विस्तरतः कृतत्वातिक्रमेनेन पौरुषकाव्येनेति चेत्सत्यम् । तस्यार्थित्वादि-विशेषणविशिष्टाधिकारिविषयत्वात् । यथाहुः—'अर्थी समर्थो विद्वाञ्शास्त्रेणापर्यु-दस्तो यजेत याजयेत्' इति । उपलक्षणमिदं सामान्यतो यावद्वेदार्थग्रहणात-दनुष्ठानादेः । तस्माद्ये तावद्वेदाद्यर्थश्रवणादितः प्रभुसंमितोपदेशत्वादिना समु-द्विजन्ति तथा पुरुषार्थमप्यभिवाञ्छन्त्येतादृग्विषयिजनैकविषयत्वादस्य काव्यादेर्नैव नैरर्थ्यशङ्कापीति ध्येयम् । एवं चात्र विषयित्वे सति पुमर्थेच्छवोऽधिकारिणः । व्यञ्जनया पुमर्थचतुष्टयबोधनं विषयः । तत्प्राप्त्यानर्थनिवृत्तिः प्रयोजनम् । व्यङ्ग्यव्यञ्ज-कभावः संबन्धश्च सिद्धः । अत्र शिखरिणीवृत्तम्—'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी' इति वृत्तरत्नाकरोक्तेरिति शिवम् ॥

एवमलौकिकपाण्डित्येऽपि पुरुषेण तावद्गर्वः स्वप्नेऽपि नैव कर्तव्यः, किंतु 'श्रुतं प्रज्ञानुगं यस्य यस्य प्रज्ञा श्रुतानुगा । असंभिन्नार्थमर्यादः पण्डिताख्यां लभेत सः ॥' इति महाभारतोक्तपाण्डित्यरीतिमतैव भाव्यम्, नो चेद्दुर्वारदुः-खापत्तिः स्यात् । गर्वापादकख्यातिलाभपूजादिप्रयोजनस्य पाण्डित्यस्य 'क्षयान्ता निचयाः सर्वे पतनान्ताः समुच्छ्रयाः । संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ॥' इति वचनात्तत्साध्योपभोगानां नश्वरत्वात्तथा प्रतिक्षणमनुभ-वाच्च । अत एवाहुः—'वेदाभ्यासात्पुरा तापत्रयमात्राच्च शोकिता । पश्चादभ्या-सविस्मारभङ्गगर्वैश्च शोकिता ॥' इति । तस्मात्पाण्डित्याभिमानो नैव विधेय इति तात्पर्यं राजहंसान्योक्त्या द्योतयति—

पुरा सरसि मानसे विकचसारसालिस्खल-
त्परागसुरभीकृते पयसि यस्य यातं वयः ।
सपल्वलजलेऽधुना मिलदनेकभेकाकुले
मरालकुलनायकः कथय रे कथं वर्तताम् ॥ २ ॥

पुरेति । इयं हि सार्वभौमाश्रितोऽप्ययं सूरीश्वरस्तद्विरहायतो निराश्रयस्ततोऽथ क्षुद्रशूद्राद्याश्रयेण तिष्ठत्विति धनयौवनादुन्मादेन वदन्तं कंचित्प्रति कस्यचिदभिज्ञस्योक्तिः । रे इति नीचसंबोधने । यस्य पुरा प्राङ् मानसे मानसाह्वये सरसि सरोवरे । विकचेति । विकचानि प्रफुल्लानि यानि सारसानि 'सारसं सरसीरुहम्' इत्यमरात्कमलानि, तेषामालिः पंक्तिस्तस्याः सकाशात्स्खलन्तश्च्यवन्तो ये परागाः पुष्परेणवस्तैः सुरभि सुगन्धि यथा संपेदे तथा कृतं तस्मिन्नित्यर्थः । एतादृशे पयसि जले यस्य वयो यातम् । तारुण्यमतिक्रान्तमिति यावत् । ननु सारसानामालिः पंक्तिरिति त्वयोक्तम् । सा च संयोगविशेष एव । एकतानिकटसंयोगस्यैव तादृशकिंचिद्विरलसामानाधिकरण्यद्वारकसंयुक्तसंयोगस्य वा 'भुक्ता पंक्तिर्विप्रपंक्तिः' इत्यादौ तच्छक्यतायां दृष्टत्वात् । तस्य च गुणत्वात्परागरूपद्रव्यस्य ततः स्खलनवर्णनमनुचितमेवेति चेन्न । आद्ये 'वर्षत्यम्बुदमालेयम्' इत्यादिवत्, द्वितीये 'द्विजपंक्तिर्भुक्ते' इत्यादिवच्च संबन्धविशेषकल्पनया निरूढलक्षणया वोपपत्तेः । एतेन 'चकोरीगणे' (१।३) इत्यादि व्याख्यातम् । एवं चैतादृशस्यापि पण्डितवरस्य पाण्डित्याभिमानेन संपादितभोगक्षये जाते नीचाश्रयोऽप्यधुनानेन कार्य इति पामरेणापि बोध्यते खण्ड्यते चेतरेण । तथापि भोगाभावस्तु नैव हृत इति धिक्पाण्डित्याभिमानमित्याशयः । सः । मरालेति । मराला हंसाः । अत्र मरालपदस्य हंसे शक्तिग्रहस्तावन्मानसादिसिद्धपदसांनिध्यादेव । तदुक्तम्—'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यव्यवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः॥' इति मदीये साहित्यसारेऽपि । 'रौत्याम्रे पिकः' इत्यादौ प्रसिद्धपदसंनिधेरिति । तेषां कुलं वंशस्तस्य नायकः, तत्र वा नायको धुरीण इत्यर्थः । मिलदिति । मिलन्तः समुच्चयीभवन्तो येऽनेके भेका बहवो मण्डू-

कास्तैराकुलं व्याप्तं तत्रेति यावत् । एतादृशे । पल्वलेति । 'वेशन्तः पल्वलं चाल्पसरो वापी तु दीर्घिका' इत्यमरात्क्षुद्रसरोवारिणीत्यर्थः । अधुनाद्य कथं वर्ततां कथं निवसतामिति कथयेत्यन्वयः । तस्मादत्रैतद्वर्तनमनुचितमेवेति भावः । अन्योक्तिस्तूक्तैव । अत्रोदात्तो नायकः । करुणो रसः । अप्रस्तुतप्रशंसालंकारस्तु प्रायो यावदुल्लाससमाप्ति साधारण एव । इह काव्यलिङ्गमपि । पृथ्वीवृत्तम् । तदुक्तम्—'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' इति ॥

एवं निजैश्वर्यमदेन कस्यापि प्रभावापह्नवेन केषांचिदप्याशोच्छेदो नैव कर्तव्य इति विधात्रन्योक्त्या ध्वनयति—

तृष्णालोलविलोचने कलयति प्राचीं चकोरीगणे
मौनं मुञ्चति किं च कैरवकुले कामे धनुर्धुन्वति ।
माने मानवतीजनस्य सपदि प्रस्थातुकामेऽधुना
धातः किं नु विधौ विधातुमुचितो धाराधराडम्बरः ॥ ३ ॥

तृष्णेति । इयं कंचिदपूर्वगुणगणैः सर्वजनसंतोषणनिपुणस्यापि नवाभ्युदयमुपगच्छतो निजदुर्गुणाभासैः परिभावकं प्रति कस्यचिद्गुणज्ञशिरोमणेरुक्तिः । हे धातः अयि चतुरानन । तृष्णालोलेति । तृष्णया पिपासया लोलानि चपलानि विलोचनानि नेत्राणि यस्य तस्मिन् । एतादृशे चकोरीगणे, न तु चकोरकुले । एतेन करुणायोग्यत्वं व्यज्यते । प्राचीं पूर्वदिशम् । तत्रैव चन्द्रस्योदितत्वसंभवात् । कलयति पश्यति सतीत्यर्थः । किं चेति समुच्चये । तथेति यावत् । कैरवेति । 'सिते कुमुदकैरवे' इत्यमरात्कुमुदवृन्द इत्यर्थः । मौनं मुकुलीभावं मुञ्चति । त्यजति सतीत्यर्थः । विकसति सतीति यावत् । एवं कामे मदने धनुर्मल्लयादि पौष्पं चापं धुन्वति भ्रमरविरुतलक्षणटणत्कारेण कम्पयति सतीत्यर्थः । न केवलमेतावदेव तिर्यङ्मात्रोपकरणम्, अपि तु मनुष्योपकारित्वमपि भूरितरं तत्रेति द्योतयति—मान इति । मानवतीति । रूपाद्यभिनिवेशशालिसुन्दरीवृन्दस्येत्यर्थः । माने निरुक्तगर्वे । न चात्र मानपदार्थपौनरुक्त्यम् । मानवतीत्यत्र मानं पद्मिन्यादिलक्षणप्रतिपादकं शास्त्रं प्रमाणं विद्यते यासु विषये तास्तथेति व्युत्पत्तेर्विवक्षितत्वात्तासामेव रूपाद्यभिमानस्य

दुरुत्सार्यत्वात्तत्संकरजातीनां तु तादृग्प्रपवत्त्वासंभवेन यौवनैकमहिम्ना कदाचित्तत्सत्त्वेऽपि तस्य सुनिरस्यत्वाच्चेति ध्येयम् । माने निरुक्तगर्वे सपदि तत्कालं प्रस्थातुकामे गन्तुकामे सतीति यावत् । न तु गते तदैतत्सत्त्वेऽप्युक्तेः । चन्द्रोदये सत्येतच्चतुष्टयं तावत्स्पष्टमेव स्वभावाद्भवतीति । तस्मादधुनेोक्तरीत्या । सर्वलोकाभ्युदयसमय इदानीमित्यर्थः । त्वयेत्यार्थिकम् । धोरेति । जलदपटलाटोप इत्यर्थः । 'आडम्बरः समारम्भे' इति विश्वः । तत्रापि विधौ चन्द्रे, न तु नभःप्रदेशविशेषे । विधातुं कर्तुमुचितो युक्तः किं नु । अपि तु नैव योग्य इति योजना । तदभ्रेण शुभ्रच्छव्याच्छादनं भवता नैव भावनीयमिति भावः ॥ यद्वा गोकुले भगवता हेतुवादैरैन्द्रयागे भग्ने प्रवर्तिते च गोवर्धनाराधने क्रुद्धेन वृद्धश्रवसा प्रारब्धेऽतिवृष्टिविवर्धने तत्रत्यानां ब्रह्माणं प्रतीयं मघवन्मौढ्यध्वननधुरीणा वाणी । तद्यथा—हे धातः । चकोरीति । चकोरवच्छ्रीकृष्णचरणनखचन्द्रैकजीविनां गोपानां स्त्रीसमूह इत्यर्थः । प्राचीं पुराकृतभगवत्संघटनां कांचिद्दूतीमित्यर्थः । 'कैः अवकुले' इति छेदः । फलोद्गमे स्वनाशकत्वात्तुच्छकुले । वंश इत्यर्थः । कैः सुखरूपैर्ध्वनिभिः । विधौ 'विधुः शशाङ्के कर्पूरे हृषीकेशेऽपि' इति विश्वाच्छ्रीकृष्ण इत्यर्थः । इन्द्रेणेति शेषः । शिष्टं तु प्राग्वदेव । इह ललितो नायकः । चरणत्रये शृङ्गारश्चरमे करुणश्च रसः । श्लेषोऽप्यलंकारः । शार्दूलविक्रीडितं वृत्तम् । तदुक्तम्—'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इति ॥

ननु सत्यमेव यदुपदिष्टं निरुक्तान्योक्त्या स्ववैभवमदात्कस्यापि गुणापलापेन केषांचिदपि तदेकोपजीविनां जीवातुत्वेनाशो नैव विधेय इति, तथाप्येते मदनुयायिनस्तावन्मां प्रति प्रतिदिनम् । 'अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः । पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥' इति । 'पादाहतं यदुत्थाय मूर्धानमधिरोहति । स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥' इति । 'असंपादयतः कंचिदर्थं जातिक्रियागुणैः । यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम् ॥' इति । 'तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता । अलङ्घनीयताहेतुरुभयं तन्मनस्विनि ॥' इति । तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत् । हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम् ॥' इति । 'अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः । केसरी

निष्ठुराक्षिप्तमृगयूथो मृगाधिपः ॥' इति च बहुतरमाघकाव्यादिसंमतिपूर्वकं स्वाभ्युदयार्थं परापकारमेव कर्तव्यतयोपदिशन्तीत्याशङ्किनं प्रति तत्रत्य एव कश्चित्तटस्थो मध्यस्थ इव सकलगुणज्ञतया प्राक्तनोपदेष्टर्येव कमलान्योक्त्या श्रद्धाविधानं व्यनक्ति—

अयि दलदरविन्द स्यन्दमानं मरन्दं
तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः ।
दिशि दिशि निरपेक्षस्तावकीनं विवृण्वन्
परिमलमयमन्यो बान्धवो गन्धवाहः ॥ ४ ॥

अयीति । इदं हि कोमलामन्त्रणे संबोधनम् । तेन वक्तरि शिक्षकत्वेऽपि कारुण्यं व्यज्यते । दलदिति । भोः । विकसितकमलेत्यर्थः । एतेन मरन्दे स्यन्दमानतायां हेतुः सूचितः । भृङ्गा भ्रमराः, न तु हंसाः । तेन क्षुद्रत्वादि द्योत्यते । तव त्वत्संबन्धिनमित्यर्थः । एवं च भृङ्गेष्वर्थमात्रलोलत्वं ध्वन्यते । स्यन्दमानं किंचित्स्रवमाणम् । तेन मयि भूयः संपद्यते ततो भक्षयन्तु नाम ये केचन यथेच्छमित्यौदासीन्यव्युदासः । मरन्दं मकरन्दम् । किमपि कथंचिदपि । एतेन स्वामित्वाभावः सूचितः । लिहन्तः । आस्वादयन्तः सन्त इत्यर्थः । एवं च यावदर्थमेवैते मधुरं भाषन्ते तदूर्ध्वं तु स्वप्नेऽप्येते नैव गोचरीभविष्यन्तीत्यनुचितपात्रत्वं तेषु व्यज्यते । मञ्जु मनोज्ञम् । 'मञ्जु मञ्जुलम्' इत्यमरः । क्रियाविशेषणमिदम् । मनोहरं यथा स्यात्तथा गुञ्जन्तु गुञ्जारवाख्यकर्णजापं कुर्वन्त्वित्यर्थः । एतेनातिनीचत्वं तेषु ध्वन्यते । उक्तं हि महाभारते—'सुलभाः पुरुषा लोके सततं प्रियवादिनः । अप्रियस्य च पथ्यस्य वक्ता श्रोतापि दुर्लभः ॥' इति । न च सर्वेऽप्येवमेवेति पूर्वपद्याशयोपदेष्टुरस्य तथात्वाभावादित्याह—दिशिदि शीत्युत्तरार्धेन । दशदिशास्वपीत्यर्थः। एतेनाचिन्त्यशक्तिः सूचिता । तावकीनं त्वत्संबन्धिनं परिमलं सुगन्धं विवृण्वन्विशदयन् । 'वितन्वन्' इति पाठे विस्तारयन्नित्यर्थः । किं लोभेन, नेत्याह—निरपेक्ष इति । एतादृशोऽयं प्रत्यक्षो गन्धवाहः पवनाख्यो बान्धवः सखा अन्य एव अलौकिक एवास्तीति संबन्धः । तस्मादेतदादरणमेव करणीयमिति तात्पर्यम् । अत्रोदात्तो नायकः । शान्तो रसः । भेदकातिशयोक्तिरप्य-

लंकारः । मालिनी वृत्तम् । तदुक्तम्—'ननमयययुतेयं मालिनी भोगिलोकैः' इति ॥

एवं जीवनैकनिर्वाहार्थं कंचिदुपागतमर्थिनं नैवावजानीयादिति कुटजान्योक्त्या द्योतयति समुपागतवतीत्यार्यावृत्तविशेषेण—

समुपागतवति दैवादवहेलां
कुटज मधुकरे मा गाः ।
मकरन्दतुन्दिलानाम-
रविन्दानामयं महामान्यः ॥ ५ ॥

रे कुटज । 'नवकुटजकदम्बामोदिनो गन्धवहाः' इति भर्तृहरेः, 'उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजद्रुमाः' इति कुवलयानन्दकारिकायाश्चोक्तेः 'कुडा इति महाराष्ट्रभाषाप्रसिद्धो वर्षाकालविकासी कश्चित्तिक्ततमो वृक्षविशेषः कुटजस्तत्संबुद्धौ । एतेनातिनिन्द्यत्वं ध्वनितम् । दैवात्प्रारब्धाद्धेतोः समुपागतवति सादरं समीपमभिसर्पति । एतेनावश्यादरणीयत्वं व्यज्यते । तत्रापि मधुकरे मधुसंपादके त्वयि तदाविर्भावाभावेऽपि स्वसांनिध्येन तज्जनके मृगविषये, न तु भ्रमरे । एवं च व्ययहेतुत्वेऽव्ययकारणत्वान्नित्यसंग्राह्यत्वं सूचितम् । अवहेलामवज्ञां मा गाः । माकार्षीरित्यर्थः । एवमप्यनास्थायामाह—मकरन्देत्युत्तरार्धेन । तस्मात्त्वयायं सर्वथा सेव्य एवेत्याशयः । इह पूज्यो नायकः । करुणो रसः । काव्यलिङ्गमप्यलंकारः ॥५॥

अस्त्वेवं सति विभवे नीत्युपदेशः कस्यचिद्दैवाद्विपत्तौ सत्यां कथं कार्यं तेनेत्यत्र धैर्यमेव । उक्तं हि भर्तृहरिणा—'विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः । यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥' इतीति कोकिलान्योक्त्या व्यनक्ति तावदित्यार्यया—

तावत्कोकिल विरसान्यापय
दिवसान्वनान्तरे निवसन् ।
यावन्मिलदलिमालः कोऽपि
रसालः समुल्लसति ॥ ६ ॥

हे कोकिल, त्वं तावद्वनान्तरेऽन्यारण्यमध्ये । एतेन धैर्यभङ्गहेतुविषयिसम्बन्धु-

दासः सूचितः । निवसन्नितरां तिष्ठन्सन्नित्यर्थः, न तु क्षणमात्रं विहरन् । एवं च तत्सम्भवाभावो व्यज्यते । विरसान्दिवसान्यापय । नयेत्यर्थः । तावत्पदापेक्षितं पूरयति—यावदित्युत्तरार्धेन । रसाल आम्र । 'आम्रश्चूतो रसालोऽसौ' इत्यमरः। मिलदिति । मिलन्त्याश्लिषन्ति मिलन्त्योऽभिसमालिङ्गन्त्यो वालिमाला भ्रमर-पंक्तयो यस्मिन्स तथेत्यर्थः । तस्मात्स्वाभीष्टदविकासपर्यन्तं धैर्यमेवावलम्ब्य विपन्नेन वन एव विहर्तव्यमिति तात्पर्यम् । इह करुणो नायकः । शान्तो रसः । लोको-क्तिरप्यलंकारः । तदुक्तम्—'लोकप्रवादानुकृतिर्लोकोक्तिरिति भण्यते । सहस्व कति-चिन्मासान्मीलयित्वा विलोचने ॥' इति ॥ ६ ॥

ननु भवता भूर्युपदेशे क्रियमाणेऽपि मम संशयः पुनः पुनर्नवो नव एवाविर्भ-वतीति धिङ् मामतिनीचमिति स्वमनसि खिन्नमिव शिष्यमालक्ष्य गुरुस्तं कूपा-न्योक्त्या प्रोत्साहयति—

नितरां नीचोऽस्मीति त्वं
खेदं कूप मा कदापि कृथाः ।
अत्यन्तसरसहृदयो यतः
परेषां गुणग्रहीतासि ॥ ७ ॥

नितरामिति । हे कूप, अहं नितरामत्यन्तं नीचो निम्नः । पक्षे हीनः कुता-र्किक इत्यर्थः । अस्मीति खेदं कदापि मा कृथाः । नैव कुर्वित्यर्थः । तत्र हेतुः—अत्यन्तेत्युत्तरार्धेन । यतस्त्वमत्यन्तसरसहृदयः । रसो जलम् । पक्षे शृङ्गारादिः । तेन सहितं सरसमत्यन्तमुत्कटं सरसं हृदयमन्तःप्रदेशः । पक्षे मनो यस्य । तथा परेषां लोकानाम् । गुणेति । गुणो नीत्युपदेशादिः । पक्षे रज्जुः । तं गृह्णातीति तथा । एतादृशोऽसीत्यर्थः । अत्र काव्यलिङ्गमलंकारः । शिष्टं प्राग्वत् ॥७॥

ननु तत्र वनादावपि केनचिदवज्ञा कृता चेत्तदा किं विधेयमित्याशङ्क्य स्वगुण-फलाभसम्भावनया धैर्यमेवेति कमलिन्यन्योक्त्या व्यनक्ति—

कमलिनि मलिनीकरोषि चेतः
किमिति बकैरवहेलितानभिज्ञैः ।
परिणतमकरन्दमार्मिकास्ते
जगति भवन्तु चिरायुषो मिलिन्दाः ॥ ८ ॥

कमलिनीति । इह पूर्वार्धं तु सरलमेव । तस्मान्मूर्खकृतावज्ञावशात्खेदो नैव कर्तव्य इति भावः । तत्र हेतुः—परिणतेत्युत्तरार्धेन । परिणतः परिपक्व एतादृशो यो मकरन्दः पुष्परसस्तस्य मार्मिकाः । मर्मज्ञा इत्यर्थः । एतादृशा मिलिन्दा भ्रमराः । स्पष्टमेव शिष्टम् । तस्माद्गुणज्ञा एव त्वद्गुणाञ्ज्ञास्यन्ति न त्वन्य इति तल्लाभार्थं धैर्यमेव धार्यमिति तत्त्वम् । अत्र खिन्ना नायिका । करुणो रसः । निरुक्त एवालंकारः । वृत्तमिदं पुष्पिताग्राभिधम् । तदुक्तम्—'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा' इति ॥८॥

तोयैरल्पैरपि करुणया भीमभानौ निदाघे
मालाकार व्यरचि भवता या तरोरस्य पुष्टिः ।
सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां
धारासारानपि विकिरता विश्वतो वारिदेन ॥ ९ ॥

तोयैरिति । हे मालाकार । मालाः पुष्पस्रजः करोतीति तथा तत्संबुद्धौ । भवता कर्त्रा करुणया अल्पैरपि तोयैर्वाप्यादुद्धृतैर्जलैः करणैरस्य तरोर्या पुष्टिर्भीमभानौ भीमश्चण्डो भानुः सूर्यो यस्मिंस्तत्र निदाघे ग्रीष्मर्तौ व्यरचि अकारीत्यन्वयः । किं ततस्तत्राह—सेत्युत्तरार्धेन । सा पुष्टिरिह लोके प्रावृषेण्येन प्रावृषि वर्षाकाले भवः प्रावृषेण्यः प्रावृट्कालीनस्तेनेत्यर्थः । अत एव विश्वतः सर्वतः वाराम् 'आपः स्त्री भूम्नि वार्वारि' इत्यमराज्जलानामित्यर्थः । धारासारानपि धाराश्चासाराश्च धारासारास्तान् । धारा जलधाराः प्रसिद्धा एव । तथा आसाराः 'धारासंपात आसारः' इत्यमराद्धाराणां संभूयपतनमिति रामाश्रमकृताद्व्याख्यानाच्च धाराणां समुच्चितपरिपातास्तानपीत्यर्थः । एतेन पुष्टिसामग्रीप्राचुर्यं सूचितम् । विकिरता वर्षता एतादृशेन वारिदेन मेघेन जनयितुं कर्तुं शक्या योग्या किम् । अपितु नैव योग्येति योजना । तस्मात्त्वं निरुपमत्वेन स्तोतुं योग्य एवेति भावः । अत्रोक्त एव

नायको भावश्च । प्रतीपविशेषोऽलंकारोऽपि । मन्दाक्रान्तावृत्तम् । तदुक्तम्—'मन्दाक्रान्ता जलधिषडगैम्भौं नतौ ताद्गुरू चेत्' इति ॥ ६ ॥

एवं निरुक्तश्लोकेऽल्पपदं क्षुद्रत्वं गुरुत्वाभिव्यनक्तीत्यस्वरसान्मेघान्योक्त्या पुनः स्तौति—

आरामाधिपतिर्विवेकविकलो नूनं रसा नीरसा

वात्याभिः परुषीकृता दश दिशश्चण्डातपो दुःसहः ।

एवं धन्वनि चम्पकस्य सकले संहारहेतावपि

त्वं सिञ्चन्नमृतेन तोयद कुतोऽप्याविष्कृतो वेधसा ॥ १० ॥

आरामेति । हे तोयद जलद । आरामेति । 'आरामः स्यादुपवनम्' इत्यमरादुद्याननायकः । विवेकेति । विचारहीनः । नूनं निश्चितम् । अस्तीति शेषः । एवं 'रसा विश्वंभरा स्थिरा' इत्यमराद्रसा पृथ्वी । नीरसा निर्गता रसा उदकानि यस्याः सकाशात्तथा । जलहीनेत्यर्थः । तद्वद्वात्याभिश्चक्रवातैर्दशदिशः परुषीकृता रूक्षीकृताः सन्तीति यावत् । तथा । चण्डेति । चण्डस्तीव्र आतपः । 'प्रकाशो द्योत आतपः' इत्यमरात्प्रकाशो यस्य स तथा । सूर्य इत्यर्थः । दुःसहो ग्रीष्मकालिकत्वेन सोढुमशक्योऽस्तीति यावत् । एवं धन्वनि । 'समानौ मरुधन्वानौ' इत्यमरान्मरुदेशे चम्पकस्य । सकले संहारेऽपि । ध्वंसकारणे सत्यपीत्यर्थः । त्वममृतेन । 'पयः कीलालममृतम्' इत्यमराज्जलेन । पक्षे पीयूषेण । सिञ्चन्प्लावयन् । एतादृशो वेधसा 'स्रष्टा प्रजापतिर्वेधाः' इत्यमराद्ब्रह्मणा कुतोऽप्यस्मादृष्टाद्धेतोः । आविष्कृतः प्रकटीकृतोऽसीति संबन्धः । अतस्त्वल्लाभ एव पुमर्थ इत्याशयः । इहोक्तावेव नायकरतिभावौ । प्रहर्षणमप्यलंकारः । शार्दूलविक्रीडितं वृत्तं तूक्तमेव ॥ १० ॥

तत्राप्येकः काम एव तव शत्रुर्जेतव्य इति ध्वनयति मूलमित्यादि वृक्षपरत्यन्योक्त्या—

मूलं स्थूलमतीव बन्धनदृढं शाखाः शतं मांसला

वासो दुर्गमहीधरे तरुपते कुत्रास्ति भीतिस्तव ।

एकः किंतु मनागयं जनयति स्वान्ते ममाधिज्वरं

ज्वालालीवलयीभवन्नकरुणो दावानलो घस्मरः ॥ ११ ॥

enhancement

anguish

हे तरुपते । वृक्षाणां पतिः श्रेष्ठस्तत्संबुद्धौ । भो वृक्षराजेत्यर्थः । अत्र तज्जातिविशेषस्याकथनात्तच्छद्मनापदेश्ये अश्वावध्युत्तमत्वादिजात्यनिर्णयादप्रौढत्वं व्यज्यते । यतस्तव मूलमतीवात्यन्तमेव स्थूलं महत्तरम् । तथा बन्धनदृढं बन्धनं भूमेरन्तर्गते महापाषाणादौ वेष्टनं तेन दृढमचलं चास्तीत्यर्थः । एतेन चक्रवातादिभीत्यपनुतिः सूचिता । एवं शाखाः स्कन्धत्वेन प्रसिद्धास्ताः शतं ननु स्वल्पाः । तत्रापि मांसला लक्षणया पल्लवपरिपुष्टा ननु शुष्काः । एतादृश्यः सन्तीति यावत् । न चैवमपि राजमार्गनिष्ठत्वेन मे छेदनादिभयमस्त्येवेति वाच्यम् । तव पर्वतदुर्गनिष्ठत्वादित्याह—वास इति । दुर्गो दुःखेन गन्तुं शक्यः दुर्गः । स चासौ महीधरः पर्वतस्तस्मिन्वासोऽपि भवतीत्यतो हेतोस्तव भीतिः कुत्रास्ति । न क्वापि भयं सम्भवतीत्यर्थः । किन्त्वेकोऽयं दावानलो दावाग्निर्मम स्वान्तेऽन्तःकरणे मनागीषदाधिज्वरम् । 'पुंस्याधिर्मानसी व्यथा' इत्यमरादाधिर्मानसी व्यथा तया ज्वरः सन्तापस्तं जनयति । सम्पादयतीत्यर्थः । तत्र हेतुं वदंस्तं विशिनष्टि—ज्वालेत्यादिचरमपादगतविशेषणाभ्याम् । कीदृशः । अकरुणो निर्दयः । पुनः कीदृशः । ज्वालेति । ज्वालानामर्चिषामाली पंक्तिस्तया वलयीभवन्कटकाकारीभवन्सन् । घस्मरः । बहुभक्षक इति यावत् । 'भक्षको घस्मरोऽद्मरः' इत्यमरः । एतेन तत्र स्वभीतिहेतुसामग्री द्योतिता । तस्मादेतस्मात्त्वया भेतव्यमेवेति भावः । पक्षे तरव एव पतयः फलादिप्रदानेन पालयितारो यस्य तत्सम्बुद्धौ । अत एव तव वासो दुर्गमहीधर इति संगतम् । एतेनारण्यविहारित्वेन विरक्तत्वं सूचितम् । यतस्तव मूलम् 'ऊर्ध्वमूलम्-' इति स्मृतेरधिष्ठानीभूतं ब्रह्म स्थूलमतीव परममहत्परिमाणम् । परिच्छेदत्रयशून्यमेवास्तीत्यर्थः । कीदृशं तत् । बन्धनेति । बन्धने संसारबन्धने त्वदृशानुभूतेऽपि दृढम् । अविनाशीति यावत् । एवं ज्ञाने सामग्री केत्यत्राह—शाखा इति । तैत्तिरीयादिरूपा इत्यर्थः । दावानलपदादौ गौणी लक्षणा । तेन लुप्तोपमा । एतेन दावानलो यथा वनस्थवृक्षयोरेवान्योन्यसंघर्षादुत्पन्नस्तद्दाहकोऽन्यदाहकश्च भवति, तद्वद्वारण्ये स्त्रीपुंसयोः परस्परसंनिकर्षतः प्रादुर्भूतः 'कामोऽपि तद्घातकः श्रवणादिनान्यघातकश्चेति व्यक्तम् । एतादृशः । अघेति छेदः । अघहेतुः परस्त्रीविष-

यकत्वेन पापकारणीभूतो यः स्मरः कामः स तथेत्यर्थः । शेषं सूक्तार्थम् । तस्मात् 'जहि शत्रुं महाबाहो कामरूपं दुरासदम्' इति स्मृतेः काम एव जेय इत्याशयः । अत्र विरक्तो नायकः । शान्तो रसः । श्लेषोऽप्यलंकारः ॥ ११ ॥

एवं गुरुवाक्यमाकर्ण्य भवत्प्रतापाग्रे कोऽयं मशकः कामो यन्मामेवैतज्जय-कर्तव्यतयोपदिश्यते श्रीमद्भिर्मम त्वेतत्प्राणान्तसंकटमेव परिस्फुरत्यतः स्वप्रभावादेवायमुपशमनीय इति मेघान्योक्त्या व्यनक्ति—

ग्रीष्मे भीष्मतरैः करैर्दिनकृता दग्धोऽपि यश्चातक-
स्त्वां ध्यायन्घन वासरान्कथमपि द्राघीयसो नीतवान् ।
दैवाल्लोचनगोचरेण भवता तस्मिन्निदानीं यदि
स्वीचक्रे करकानिपातनकृपा तत्कं प्रति ब्रूमहे ॥ १२ ॥

ग्रीष्म इति । अत एव । भीष्मेति । 'दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्' इत्यमरादतिभयंकरैरित्यर्थः । एतादृशैः करैः किरणैः कृत्वा दिनकृता दिवसकारेण कर्त्रा दग्धोऽपि । दाहवत्प्राणान्तसन्तापितोऽपीत्यर्थः । एतादृशोऽपि यश्चातकः हे घन, त्वां ध्यायन्मनसा जीवनदातृत्वेन चिन्तयन्सन् द्राघीयसोऽतिशयेन दीर्घा इति द्राघीयांसस्तान् । ग्रीष्मर्तौ दिवसविस्तीर्णत्वं प्रसिद्धमेव । एतादृशानपि । एतेन परमासह्यत्वं व्यज्यते । वासरान्दिवसान्कथमपि येनकेनाप्यनिर्वाच्यप्रकारेणापि नीतवाननयदिति सम्बन्धः । लोचनेति । नेत्रविषयीभूतेन । प्रत्यक्षेणेत्यर्थः । एतादृशेन भवता त्वया । तस्मिन्नुक्तरूपे चातके । करकेति । 'वर्षोपलस्तु करका' इत्यमरात्पाषाणाकारवारिपरिणामविशेषा एव करकास्तासां निपातनं तद्रूपा या कृपा सा यदीदानीं स्वीचक्रेऽङ्गीकृता तर्हि कं प्रति ब्रूमह इत्यन्वयः । तस्मादतुलश्रद्धालुरनन्यगतिकश्च मादृशो भक्तजनः कदापि नैवोपेक्षणीयः किंतु स्वसामर्थ्यलेशेनैव कामादिविघ्नसहस्रतोऽप्यमृतप्रदानेन संरक्षणीय एवेति भावः । अत्र दग्धोऽपीत्यनेन श्रद्धातिशयः सूचितः । एवं दैवादित्यनेनाचार्यदौर्लभ्यं ध्वनितम् । इदानीमित्यनेन स्वाभ्युदयसमये हि वदान्यचक्रवर्तिनां प्रायेण पात्राद्यविचार्यैव वितरणप्रवीणत्वं प्रसिद्धं किमुत निजकजीवने परमसुजने तत्प्रकटीकरणमिति द्योतितम् । अत्र पूज्यतमो नायकः । करुण एव रसः । विषमविशेषोऽलंकारः । तदुक्तं विषमं

प्रकृत्य—'अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात् । भक्ष्याशया हि मञ्जूषां भङ्क्त्वाखुस्तेन भक्षितः ॥' इति ॥१२॥

तत एवं शिष्यवाक्यं श्रुत्वाप्यश्रुतमिव भावयंस्तदुत्तरमविधायैवान्यजनैः सहैव वार्तान्तरासक्तमाचार्यमालक्ष्य स तावत्तस्य तद्वैमुख्यपूर्वकं स्वैकपरायणत्वं संपादयितुं तस्मै निजौत्सुक्यं मेघान्योक्त्यैव व्यनक्ति—

दवदहनजटालज्वालजालाहतानां
परिगलितलतानां म्लायतां भूरुहाणाम् ।
अयि जलधर शैलश्रेणिशृङ्गेषु तोयं
वितरसि बहु कोऽयं श्रीमदस्तावकीनः ॥ १३ ॥

दवेति । अयि जलधर । इदं हि कोमलामन्त्रणं स्वकारुण्योत्पादनार्थम् । भो जलपदवाच्यानाममृतानां जीवनानां च धारक मेघेत्यर्थः । एतेनाखिलपुरुषार्थदानदक्षत्वं द्योतितम् । त्वम् । दवदहनेति । 'दवदावौ वनारण्यवह्नी' इत्यमराद्दवस्यारण्यस्य संबन्धी यो दहनो वह्निस्तस्य जटाला जटा इव येन दीर्घतरा अंशविशेषास्तद्विशिष्टा ये ज्वालाः । 'वह्नेर्द्वयोर्ज्वालकीलौ' इत्यमरः । तेषां जालानि तैराः समन्ताद्धतास्ताडिताः । त्वगादौ दग्धा इति यावत् । तेषामित्यर्थः । अत एव । परिगलितेति । च्युतलतानामत एव म्लायतां म्लायन्ति ग्लानिं प्राप्नुवन्ति ते म्लायन्तस्तेषाम् । म्लानानामित्यर्थः । एतादृशां भूरुहाणाम् । 'वृक्षो महीरुहः शाखी' इत्यमराद्वृक्षाणामिति यावत् । 'षष्ठी चानादरे' इति षष्ठी ।ताननादृत्येत्यर्थः । शैलेति । पर्वतशिखरेषु तोयं जलं बहु विपुलं वितरसि वर्षसि । पर्वतेषु हि भूयसी वृष्टिर्भवतीति प्रसिद्धमेव । अयं निरुक्तस्तावकीनस्त्वदीयः श्रीमदः संपदुन्मादः कः । आक्षेपार्थकोऽयं किंशब्दः । अनुचित एवेत्यर्थः । तस्मादस्मास्वेवामृतवृष्टिः पात्रतया कार्येति तात्पर्यम् । इह स्थूललक्ष्यो नायकः । करुणो रसः । परिकरोऽप्यलंकारः । मालिनी वृत्तम् ॥ १३ ॥

इत्थं शिष्यवचनं श्रुत्वा श्रीगुरुस्तमाश्वासयति शृण्वन्निति पान्थान्योक्त्या—

शृण्वन्पुरः परुषगर्जितमस्य हन्त
रे पान्थ विह्वलमना न मनागपि स्याः ।
विश्वार्तिवारणसमर्पितजीवनोऽयं
नाकर्णितः किमु सखे भवताम्बुवाहः ॥ १४ ॥

रे इति नीचसंबोधने । तेन निरुक्ताक्षेपस्त्वयानुचित एव विरचित इति सूचितम् । पान्थ पथिक । पक्षे हितजिज्ञासुत्वेन भो सन्मार्गगामिन्नित्यर्थः । त्वमस्य प्रकृतस्य मेघस्य । पक्षे गुरोर्मम । पुरोऽग्रभागे । परुषेति । परुषं भयंकरम् । पक्षे त्वय्यौदास्यमिव विधायान्यं प्रत्युक्तत्वेन दुःसहं च तद्गर्जितं स्तनितम् । पक्षे उच्चैर्भाषितं शृण्वन्सन्मनागपि ईषदपि विह्वलमना विकलान्तःकरणो न स्याः मा भवेत्यन्वयः । तत्र हेतुः । विश्वेति । हे सखे, भवता । एतेन सान्त्वनं व्यज्यते । विश्वेति । विश्वस्य सर्वस्यार्तिः पीडा तस्या वारणं दूरीकरणं तदर्थं समर्पितं जीवनमुदकम् । पक्षे प्राणधारणं येन स तथेत्यर्थः । परोपकारैकतत्पर इति यावत् । एतादृशोऽयं प्रत्यक्षोऽम्बुवाहो वारिदः । पक्षेऽम्बुशब्दवाच्यममृतपदश्लिष्टं कैवल्यं वहति ब्रह्मात्मबोधपर्यन्तोपदेशेन निर्वहतीति तथा श्रीगुरुरित्यर्थः । नाकर्णितः किमु प्रथितमहिमत्वान्न श्रुतः किम् । अपितु श्रुत एवेति योजना । तस्मादयुक्त एवायं त्वदाक्षेप इति भावः । इह संबोध्यो नायकः । शान्तो रसः । श्लेषः काव्यलिंगं चालंकारः । वसन्ततिलका वृत्तम् ॥ १४ ॥

एवमाश्रास्य चतुर्विधान्यतमपुमर्थार्थिनापि दुःसङ्गस्त्याज्य एवेति रहस्यं सूचयति चन्दनान्योक्त्या—

सौरभ्यं भुवनत्रयेऽपि विदितं शैत्यं तु लोकोत्तरं
कीर्तिः किं च दिगङ्गनाङ्गणगता किं त्वेतदेकं शृणु ।
सर्वानेव गुणानियं निगिरति श्रीखण्ड ते सुन्दरा-
नुज्झन्ती खलु कोटरेषु गरलज्वालां द्विजिह्वावली ॥ १५ ॥

सौरभ्यमिति । हे श्रीखण्ड श्रीः खण्डेषु यस्य तत्संबुद्धौ । चन्दनस्य हि यादृशी काष्ठखण्डदशावच्छेदेन सौरभ्यशोभोपलभ्यते न तादृग्द्रुमादिदशावच्छेदेनेति सुप्रसिद्धमेव । अतो युक्तैवोक्तव्युत्पत्तिः । अयि चन्दनेत्यर्थः । तव सौरभ्यं सौगन्ध्यम् ।

भुवनेति । लोकत्रयेऽपि विदितं सर्वमान्यतया प्रख्यातम् । वर्तत इति यावत् । तथा शैत्यं तु संतापोपशामकत्वं तु लोकोत्तरमलौकिकमेव । अस्तीत्यर्थः । किंच तव कीर्तिर्दोहादावपि परिमलपौष्कल्यख्यातिः । दिगिति । प्राच्यादिचपलविलोचनाजिरसंचारिणीत्यर्थः । भवतीति शेषः । किं तत इति चेत्तदाह—किंत्वित्यादि । तदेव स्फुटयति—इयं प्रत्यक्षा द्विजिह्वावलिः सर्पराजिस्तव कोटरेष्वनायाससंपन्नत्वात्काष्ठबिलेष्वित्यर्थः । गरलज्वालां गरलानि वान्तविषाणि तैर्या स्वनिष्ठसूक्ष्माग्निना सह त्वत्काष्ठसंयोगाज्ज्वालार्चिस्ताम् । यद्वा तान्येव ज्वालेव दाहकत्वाज्ज्वाला ताम् । यद्वा तानि ज्वालेव ज्वाला तामित्यर्थः । उज्झन्ती उद्भावयन्ती सती ते सर्वानेव तव संपूर्णान्सुन्दरानेव रम्यानेव निरुक्तसौरभ्यादीन्गुणान् । धर्मानित्यर्थः । निगिरति खलु भक्षयत्येवेति योजना । तस्मादेतस्याः परिग्रहस्तव परमनाशहेतुत्वादनुचित एवेति भावः । अत्र सुन्दरपदेन गुणेष्ववश्यं संरक्षणीयत्वं द्योत्यते । इह संबोध्यनायकपक्षेऽपि कोटरपदमात्रे गौणीं वृत्तिमाश्रित्यान्तःपुरादिगृहैकान्तदेशविशेषार्थकत्वमुररीकृत्यार्थान्वयो विधेयः । तद्यथा—भो देवदत्त, ते सौरभ्यं सुरभेः 'सुगन्धे च मनोज्ञे च वाच्यवत्सुरभिः स्मृतः' इति विश्वान्मनोज्ञस्य भावः सौरभ्यम् । रम्यत्वमित्यर्थः । शैत्यं 'शितशीतौ कृशे तीक्ष्णे' इति हैमात्तैक्ष्ण्यम् । तेजस्वित्वमिति यावत् । 'द्विजिह्वेति । 'द्विजिह्वौ सर्पसूचकौ' इत्यमरात्परच्छिद्रसूचकपंक्तिरित्यर्थः । गरलेति । गरलमिव दुरुपदेशजातं मारकत्वाद्गरलं तेन ज्वालेव कोपाग्निजन्या या परध्वंसनेच्छा तामित्यर्थः । शेषं तूक्तार्थमेव । तस्मात्पिशुनवचो नैवादरणीयमित्याशयः । अत्रोपदेश्यो नायकः । करुणो रसः । श्लेषलुप्तोपमे अप्यलंकारौ । शार्दूलविक्रीडितं वृत्तम् ॥१५॥

अथैवं शिष्यवाक्यमाकर्ण्य यद्येवं तव श्रद्धा चेत्तर्ह्यनुपम एवासीति कमलान्योक्त्या तदुत्पत्तिस्थितिसम्पत्तिगुणपंक्तिस्तवनतो व्यनक्ति—

समुत्पत्तिः स्वच्छे सरसि हरिहस्ते निवसनं
निवासः पद्मायाः सुरहृदयहारी परिमलः ।
गुणैरेतैरन्यैरपि च ललितस्याम्बुज तव
द्विजोत्तंसे हंसे यदि रतिरतीवोन्नतिरियम् ॥ १६ ॥

समुत्पत्तिरिति। हे अम्बुज भो कमल, तव समुत्पत्तिः प्रादुर्भावः स्वच्छ निर्मले सरसि मानसादौ सरोवरे। नतु पल्वलेऽस्तीत्यर्थः। एवं निवसनमपि वसतिरपि हरिहस्ते विष्णुपाणौ। तवेत्यस्तीति चाद्यन्तयोरनुबन्धनीयम्। किंच त्वं पद्माया लक्ष्म्या निवासो वसतिस्थानम्। असीति शेषः। तथा तव परिमलः सुगन्धोऽपि। सुरेति। देवमनोहर इत्यर्थः। भवतीत्याध्याहारः। एतेन गोदुग्धादेरुत्तमस्थानजन्यत्वेऽपि ताम्रपात्रादिस्थित्या तस्य पुनस्तदितरपात्रादिगत्वे शर्करादियोग्यसंमेलनाभावेन लवणाद्ययोग्यसंमेलनेन वा तथा शोधितत्वादग्न्यादिसंस्कृततैलादिसुवासितत्वाभावेन हिङ्ग्वादि दुर्गन्धित्वादिना वा त्याज्यत्वमिवास्यापि निम्नजत्वादिना हेयत्वं व्युदस्तम्। तर्हि किमेतावन्त एव मयि गुणाः सन्ति नेत्याह—गुणैरिति। अन्यैरपि निरुक्तेतरैः स्वीयसुन्दरीस्मितसदनसादृश्याद्यैरपीत्यर्थः। ललितस्य। रम्यस्येति यावत्। एतादृशस्य तव यदि। द्विजेति। पक्षिश्रेष्ठे। पक्षे त्रैवर्णिकशिरोमणौ। हंसे राजहंसे, पक्षे परमहंसे। कस्मिंश्चिद्ब्रह्मनिष्ठ इत्यर्थः। रतिः प्रीतिरस्ति। तर्ह्ययमतीवानुपमैवोन्नतिरुत्कटता भवतीत्यन्वयः। तस्मादेवमेव सार्वदिकी श्रद्धा वर्धनीयेति तत्त्वम्। अत्र द्विजेत्यादरणीया शब्दब्रह्मनिष्णातत्वादिबहिःसामग्री हंसेत्यन्तःसामग्री च सूचिता। इह बुभुत्सुर्नायकः। शान्तो रसः। काव्यलिंगादिरप्यलंकारः। शिखरिणी वृत्तम् ॥१६॥

ननु तर्हि किं सर्वपालकेन राज्ञा मया नीचजनोज्जीवनं नैव विधेयमिति चेत्सर्वजीवनं त्वया संपादनीयमेव परन्तु तत्तद्योग्यतातारतम्यं विवेकेनैव न त्वन्यथेति क्षीराब्ध्यन्योक्तितो ध्वनयति—

साकं ग्रावगणैर्लुठन्ति मणयस्तीरेऽर्कबिम्बोपमा
नीरे नीरचरैः समं स भगवान्निद्राति नारायणः।
एवं वीक्ष्य तवाविवेकमपि च प्रौढिं परामुन्नतेः
किं निन्दाम्यथवा स्तवानि कथय क्षीरार्णव त्वामहम् ॥ १७ ॥

साकमिति। ग्रावेति। 'पाषाणप्रस्तरग्रावोपलाश्मानः' इत्यमरात्पाषाणगणैः साकं सार्धम्। नीरे नीरवत्सर्वतः परिपूर्णे क्षीर एव। ननु फलवादिवत्क्वचित्कदाचि-

त्केनचिदुपलभ्यमान इति यावत्। एतेन क्षीरार्णवे नीरासम्भवान्नीरपदप्रयोगानौचित्यं परास्तम्। एवं नीरचरपदेऽपि तेषामतितुच्छत्वबोधनार्थमेव नीरपदम्। तेन वक्ष्यमाणाविवेकपरिपोषोऽपि ध्वन्यते। नीरचरैः। मकरादिभिर्जलचरैरित्यर्थः। स भगवानिति पदाभ्यां श्रुतिप्रसिद्धत्वं सर्वेश्वरत्वं ततोऽतिपूज्यत्वं च व्यज्यते। हे क्षीरार्णव, त्वामहं किं निन्दान्यथवा स्तवानीति त्वमेव कथयेति सम्बन्धः। अत्राविवेकी नायकः। संदेहोऽप्यलंकारः। शार्दूलविक्रीडितं वृत्तम्॥१७॥

एवमनधिकारितया सदुपदेष्टर्यपि तटस्थजन एव रुष्टः स राजकुमारस्तमेव तिरस्करोति—प्रारम्भ इति भृङ्गान्योक्त्या।

प्रारम्भे कुसुमाकरस्य परितो यस्योल्लसन्मञ्जरी-
पुञ्जे मञ्जुलगुञ्जितानि रचयंस्तानातनोरुत्सवान्।
तस्मिन्नद्य रसालशाखिनि दशां दैवात्कृशामञ्चति
त्वं चेन्मुञ्चसि चञ्चरीक विनयं नीचस्त्वदन्योऽस्ति कः॥१८॥

हे चञ्चरीक भ्रमर। कुसुमेति। वसन्तस्य प्रारम्भे। यस्य। उल्लसदिति। विकसद्वल्लरीविसर इत्यर्थः। त्वम्। मञ्जुलेति। मनोज्ञगुञ्जारवजातानीति यावत्। रचयन्कुर्वंस्तान्प्रसिद्धानुत्सवानातनोर्विस्तारितवानसीत्यर्थः। अथ तस्मिन्। रसालशाखिनीति। आम्रवृक्ष इत्यर्थः। न चात्र शाखीत्यधिकं तस्य परिपुष्टत्वाभिप्रायत्वात्। दैवात्कृशां पल्लववैकल्यवतीमित्यर्थः। दशामवस्थामञ्चति स्वीकुर्वति विषये त्वं विनयं प्रश्रयं मुञ्चसि त्यजसि चेत्तर्हि त्वत्त्वत्तः सकाशादन्य इतरो नीचः कः। न कोऽपीति योजना। तस्मादेवमौद्धत्यं नैव त्वया विधेयमित्याशयः॥ १८॥

अथ तं तटस्थं प्रत्यपि स एव पण्डितवरस्तावन्मया निरुक्तरीत्योपशमितस्यास्य निकटे त्वया नैवेतः परं स्थातव्यमिति गजान्योक्तिभ्यां व्यनक्ति—

स्थितिं नो रे दध्याः क्षणमपि मदान्धेक्षण सखे
गजश्रेणीनाथ त्वमिह जटिलायां वनभुवि।
असौ कुम्भिभ्रान्त्या खरनखरविद्रावितमहा-
गुरुग्रावग्रामः स्वपिति गिरिगर्भे हरिपतिः॥ १९॥

स्थितिमिति। मदेति। मदेनान्धे ईक्षणे नेत्रे यस्य स तथा। तत्सम्बुद्धौ।

एतेनावस्थितिशीलत्वं ध्वन्यते । सखे । एवं चोपदेशार्हत्वं व्यज्यते । गर्जति । रे करिकुलपते, त्वमिह जटिलायां वल्लीबाहुल्येन संजातजटायामेतादृश्यां वनभुव्यरण्यभूमौ क्षणमपि । एतेन भीत्यतिशयः सूच्यते । स्थितिं नो दध्या नैव कुर्वित्यन्वयः । तत्र हेतुः—असाविति । एतेन प्रत्यक्षत्वादविश्वासव्युदासः । कुम्भाति । गजविभ्रमेणेत्यर्थः । कुम्भिपदभ्रान्त्यर्हत्वं व्यनक्ति—खरेति । खराणि तीक्ष्णानि यानि नखराणि नखानि तैर्विद्राविता विदारिता महागुरुग्राव्णां महापाषाणानाम् । अत्र महत्त्वं स्थूलत्वम् । गुरुत्वं तु वज्रमणिवद्दुर्भेद्यत्वमेवेति न पौनरुक्त्यम् । अत्र 'महागिरि' इत्येव पाठः प्रामाणिकः । ग्रामाः संघा येन स तथेति यावत् । तत्र खरपदं निरुक्तकार्यक्षमत्वसूचनार्थम् । एतादृशः । अतएव—हरीति । मृगराजराजः । गिरीति । कन्दर इत्यर्थः । स्वपिति निद्रातीति योजना । तस्मादिह तवावस्थानमनुचितमेवेति भावः । भ्रान्त्यलंकारः ॥१६॥

अथोक्त एव तटस्थोऽपि संस्तुवन्राजकुमारनिन्दां ध्वनयति—यस्मिन्निति राघवान्योक्त्या ।

यस्मिन्खेलति सर्वतः परिचलत्कल्लोलकोलाहलै-
र्मन्थाद्रिभ्रमणभ्रमं हृदि हरिदन्तावलाः पेदिरे ।
सोऽयं तुङ्गतिमिंगिलाङ्गकवलीकारक्रियाकोविदः
क्रोडे क्रीडतु कस्य केलिकलहत्यक्तार्णवो राघवः ॥ २० ॥

यस्मिन्खेलति क्रीडति सति । हरिदिति । 'दन्ती दन्तावलो हस्ती' इत्यमरादिग्गजा इत्यर्थः । हृदि मनसि । कल्लोलेति । महोर्मिनिनादैः । मन्थेति । मन्था समुद्रमथनदण्डीभूतो मन्दरः स चासावद्रिश्च तस्य यद्भ्रमणं परिवर्तनं तस्य यो भ्रमोऽवभासस्तमित्यर्थः । पेदिरे प्रापुरिति यावत् । किं तावतेत्यत आह—सोऽयमित्युत्तरार्धेन । सोऽयं प्रत्यक्षः । तुङ्गेति । तुङ्गा महत्तरास्ते च ते तिमिंगिला महामत्स्यास्तेषां यान्यङ्गानि तेषां यः कवलीकारो ग्रासीकरणं तत्र क्रियाकोविदो व्यापारेण कुशलः । न तु ज्ञानमात्रनिपुण इत्यर्थः । एवं च कवलीकारकोविद इत्येतावतैव सार्थक्ये क्रियापदानर्थक्यं परास्तम् । एतादृशः । अत एव—केलीति । केलिना वध्वादिभिः सह क्रीडया न तु तदपराधेन यः कलहः संप्रा-

मस्तेन त्यक्तोऽर्णवः समुद्रो येन स तथा। एतादृशो राघवः । 'तिमिंगिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः' इति वचनान्निरुपमो मत्स्यविशेषः। कस्य सरसः क्रोडे। 'क्रोडः सूकरमातंगयोः क्रोडा क्रोडं च वक्षसि' इति विश्वाद्वक्षसि। मध्य इति यावत्। क्रीडतु विहरतु। न कस्यापि विहरत्विति सम्बन्धः। तस्मादेतादृशकिंचिल्लीलाकलहत्यक्तसार्वभौमाश्रयः पण्डितमण्डलीपूजनीयः श्रीगुरुरयं क्षुद्रस्य राजकुमारस्य तव निकटेऽवस्थातुं नैव योग्य इत्याशयः। 'तिमिंगिलादयश्चान्ये' इत्यमरः। अत्रोदात्तो नायकः। अद्भुत एव रसः। अक्रमातिशयोक्त्यलंकारः॥२०

एवं तटस्थस्यातिगुणज्ञतामालक्ष्य स एव पण्डितः स्वगतमेवानेन राजकुमारेणास्य परिपालनमेव कर्तव्यं न तु तिरस्करणमिति द्योतयंल्लवङ्गलतिकान्योक्त्या वदति—

लूनं मत्तगजैः कियत्कियदपि च्छिन्नं तुषारार्दितैः
शिष्टं ग्रीष्मजभीष्मभानुकिरणैर्भस्मीकृतं काननम्।
एषा कोणगता मुहुः परिमलैरामोदयन्ती दिशो
हा कष्टं ललिता लवङ्गलतिका दावाग्निना दह्यते॥ २१॥

लूनमिति। काननं वनं यद्यपि कियत्किंचिन्मत्तगजैर्लूनं छिन्नम्। तथा कियदपि तुषारार्दितैस्तुषारेण। 'तुषारस्तुहिनं हिमम्' इत्यमराद्धिमेनार्दिताः पीडितास्तैः। शीतव्याकुलितैर्लोकैरित्यर्थः। छिन्नं खण्डितम्। इन्धनार्थमित्याशयः। शिष्टमुर्वरितम्। ग्रीष्मेति। ग्रीष्मे निदाघे जातः, अत एव यो भीष्मो भूरितापकत्वाद्भयंकर एतादृशो यो भानुः सूर्यस्तस्य ये किरणास्तैर्मयूखैरित्यर्थः। भस्मीकृतं नीरसतापादनेन भस्मतां नीतमिवेति सम्बन्धः। तथाप्येषा प्रत्यक्षा कोणगता कोणमप्रसिद्धैकदेशं गतेति तथा। रहसि विद्यमानापीत्यर्थः। मुहुर्भूयः परिमलैः सुगन्धैर्दिशः ककुभ आमोदयन्ती सुरभयन्ती सत्यपि तत्रापि। लवङ्गेति। 'लवङ्गं देवकुसुमम्' इत्यमराद्देवपुष्पवल्लीत्यर्थः। न तु मालती लता। एतेनोष्णत्वसुरभित्वाभ्यां कस्तूर्यादिवत्परमादरणीयत्वं द्योतितम्। तत्रापि ललिता नवीना न तु जीर्णा। एव चावश्यरक्षणीयत्वं ध्वन्यते। हा कष्टमित्यनुपमखेदे। दावेति। दावानलेन दह्यते भस्मीक्रियत इत्यन्वयः। तस्मादिदमनुचितमेवेति भावः। अत्र तृतीयचरणेनालौकिकगुणवत्त्वं लवङ्गलतायां व्यज्यते। एवं च जगति प्रायोऽन्य

गुणिनः सुदुर्लभा एव । तत्रायं त्वचिन्त्यगुणवत्त्वात्त्वया संरक्षणीय एवेति हृदयम् । न च 'ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे' इति जयदेवप्रयोगादत्र ललितेत्यादिपदापहारः शङ्क्यः । अस्य व्यस्तत्वादिति । अत्र लवङ्गलतापदं स्त्रीत्वेन करुणरसपरिपोषार्थमेव । तेन करुणावेव रसनायकौ ॥ २१ ॥

ततः स तटस्थोऽपि स्वमनोरथभङ्गदुःखं तं पण्डितं प्रति कीरान्योक्त्या व्यनक्ति—

स्वस्वव्यापृतिमग्नमानसतया मत्तो निवृत्ते जने
चञ्चूकोटिविपाटितारलकुटो यास्याम्यहं पञ्जरात् ।
एवं कीरवरे मनोरथमयं पीयूषमास्वादय-
त्यन्तः संप्रविवेश वारणकराकारः फणिग्रामणीः ॥ २२ ॥

स्वस्वेति । जने लोके । स्वस्वेति । स्वस्वव्यापारसमासक्तचित्ततयेत्यर्थः । मत्तो मत्सकाशात् । निवृत्ते परावृत्ते सति । एतेनैकान्तलाभः सूच्यते । चञ्च्विति । चञ्च्वाः कोटिरग्रं तेन विपाटितो विदारित आरलकुट आराख्यलोहशलाकाविशिष्टकाष्ठविशेषो येन स तथेत्यर्थः । अत्र 'विदारितारपुटः' इति पाठः प्रामाणिकः । अररपुटं कपाटपुटम् । 'कपाटमररं तुल्ये' इत्यमरः । एतादृशः सन्नहं पञ्जराद्यास्याम्युड्डीय गमिष्यामीति योजना । एवं कीरवरे शुकश्रेष्ठे । मनोरथमयं मनोराज्यैकविकारं पीयूषममृतमास्वादयत्यास्वादग्रहणपूर्वकं पिबति सतीति यावत् । अन्तः पञ्जराभ्यन्तरे । वारणेति । गजशुण्डाकार इत्यर्थः । महतोऽप्यहेः स्वल्परन्ध्रेऽपि प्रवेशो लोके प्रसिद्ध एवेति नानुपपत्तिः । फणीति । सर्पश्रेष्ठः संप्रविवेशेति संबन्धः । तस्मादीश्वर एवैतत्संकटादभिरक्षत्वित्याशयः । अत्र करुणो रसः । सचिन्तो नायकः । रूपकलुप्तोपमे अलंकारौ ॥ २२ ॥

औदार्यं भुवनत्रयेऽपि विदितं संभूतिरम्भोनिधे-
र्वासो नन्दनकानने परिमलो गीर्वाणचेतोहरः ।
एवं दातृगुरोर्गुणाः सुरतरोः सर्वेऽपि लोकोत्तराः
स्यादर्थिप्रवरार्थितार्पणविधावेको विवेको यदि ॥ २३ ॥

औदार्यमिति । संभूतिरुत्पत्तिः । परिमल इति । इदं पद्यं यद्यपि 'नीरान्निर्म-

लतः' (१ । ६१) इति प्राक्तनपद्ये पठितत्वाद्विशेषणपदविशिष्टमपि पुनरुक्तमेव, तथापि वक्तुरुभयत्राप्येकत्वान्नीत्युपदेशावेशवशेन पौर्वापर्यानुसंधानहीनतया तथा प्रयुक्तमपि नैव दोषावहम्। प्रत्युत रसनिर्भरपोषकत्वाद् गुणावहमेव। एवमेव नैषधीयचरितेऽपि कीर्तिमण्डलपदं प्राथमिकपद्यद्वयेऽपि पठितं प्रसिद्धमेव । अत्र विशेषणचतुष्टयेऽपि सुरतरोरिति संबन्धनीयम् । तेनास्य क्रमात्कीर्तिसमुत्पत्तिनिवसतिगुणसंपत्तीनां लोकोत्तरत्वं द्योत्यते । एवं निरुक्तप्रकारेण दातृगुरोर्वदान्यमान्यस्येत्यर्थः । सुरेति । कल्पद्रुमस्येति यावत् । अत्र 'दातृगुरो सुरतरो' इति संबुध्यन्तपाठे तवेत्यध्याहार्यम् । सर्वे संपूर्णा अपि गुणास्तदा लोकोत्तरा एव। अचिन्त्या एव स्युरिति शेषः । तदा कदेत्यत्राह—स्यादित्यादिचरमचरणेन। यदि अर्थीति। अर्थिनां सामान्यतो यावद्याचकानां प्रवरमुत्कटं यदर्थितं तस्य योऽर्पणविधिर्दानविधिस्तस्मिन्विषय इत्यर्थः । एकः केवलो विवेको योग्यतादिविचारः स्यादित्यन्वयः। तस्मादनेन विवेक एव संपादनीय इत्याशयः। इहोदात्तो नायकः। दानवीरो रसः। विनोक्तिरलंकारः ॥ २३ ॥

एवं वदति सति पण्डितवरे तदैश्वर्यमसहमानः कश्चन पिशुनः प्रकृतराजकुमारं प्रसंज्ञयैवायं त्वद्गुरुरपि त्वामविवेकिनमेव मनुत इति किमस्मिन्कृतघ्ने विफलभक्तिसंपादनेनेति सूचयन्बहिरेव बहुतरविनयवानकस्मान्मृगयां विधायागच्छन्तं व्याधं मयेदं विश्वासेन मृगादिहिंसनमनुचितमेव क्रियत इति कंचिदुदासीनं प्रति जल्पन्तं सन्तमालक्ष्य तेनैव पण्डितवरेण प्रस्तुताङ्कुराख्यकिरातान्योक्त्या निन्द्यते—

एको विश्वसतां हराम्यपघृणः प्राणानहं प्राणिना-
मित्येवं परिचिन्त्य मात्ममनसि व्याधानुतापं कृथाः।
भूपानां भवनेषु किंच विमलक्षेत्रेषु गूढाशयाः
साधूनामरयो वसन्ति कति न त्वत्तुल्यकक्षा नराः ॥ २४ ॥

एक इति। रे व्याध, त्वमहमपघृणः। 'कारुण्यं करुणा घृणा' इत्यमरादपगता घृणा दया यस्मात्स तथा। निर्दय इत्यर्थः। अत एव विश्वसतां हरिततृणादिदर्शनेन सदयत्वादिविश्वासशालिनामित्यर्थः। एतादृशां प्राणिनां मृगादिजीवानां प्राणानेक एव हरामीत्येवमात्ममनसि स्वचेतसि परिचिन्त्यानुतापं संतापं मा कृथाः।

नैव कुर्विति सम्बन्धः । 'मा स्म' इत्यपि पाठः । तत्र हेतुः—भूपानामित्युत्तरार्धेन । गूढेति । अप्रकटपरघातकरणाद्यभिप्राया इति यावत् । एतादृशाः। तत्रापि साधूनामरयः । अतएव—त्वत्तुल्येति । त्वया सह तुल्या समाना कक्षा गूढहिंसनादिकल्पना येषां ते तथा । एतादृशो नराः । 'खलाः' इत्यपि पाठः । कति न वसन्ति । अपि तु सहस्रशो वसन्तीति योजना । तस्माद्भवता निरुक्तपिशुनानात्मसाम्येनानुसंधायोक्तानुतापस्त्याज्य एवेति भावः । अत्र शठो नायकः । करुणो रसः ।

एवं पण्डितवरं रुष्टमालक्ष्य स राजकुमारः परिसान्त्वयन्सामान्यतो विदुषः स्तौति—

अन्या जगद्धितमयी मनसः प्रवृत्ति-
रन्यैव कापि रचना वचनावलीनाम् ।
लोकोत्तरा च कृतिराकृतिरार्तहृद्या
विद्यावतां सकलमेव गिरां दवीयः ॥ २५ ॥

अन्येति । निरुपमगुणत्वेन विलक्षणैवेत्यर्थः । कृतिराचारः । दवीयः । 'दवीयश्च दविष्ठं च सुदूरे' इत्यमरादतिदूरमेवास्तीत्यन्वयः । इह ललितो नायकः । अद्भुतो रसः ॥ २५ ॥

अथ स एव नरवरकुमारस्तमेव स्वगुरुं प्रति निजापराधक्षमापनप्रार्थनं व्यनक्ति—

आपद्गतः खलु महाशयचक्रवर्ती
विस्तारयत्यकृतपूर्वमुदारभावम् ।
कालागरुर्दहनमध्यगतः समन्ता-
ल्लोकोत्तरं परिमलं प्रकटीकरोति ॥ २६ ॥

आपद्गत इति । महाशयेति । महान्विशालो गम्भीरश्चाशयोऽभिप्रायो येषां तेषां बुद्धिशालिनां पुंसां यश्चक्रवर्ती । सार्वभौम इत्यर्थः । स कश्चिद्धीरवरस्तावदापद्गतोऽपि विपद्ग्रस्तोऽपि । एवं चात्र सावधानत्वानर्हत्वं ध्वन्यते । अकृतेति । पूर्वं कृतः प्राक्केनचिदनुष्ठित इति कृतपूर्वः । तादृशो न भवतीत्यकृतपूर्वस्तम् । विचित्रमिति यावत् । एतादृशमुदारभावमौदार्यमित्यर्थः । विस्तारयति खल्विति योजना । उक्तमेवार्थं दृष्टान्तेन दृढयति—कालेति । कृष्णागरुसंज्ञकः प्रसिद्धश्चन्द-

नविशेषः । दहनेति । दहनो वह्निस्तस्य मध्यस्तं गतोऽपि परमदह्यमानोऽपीत्यर्थः । समन्तात्परितः, नत्वेकदेशे । तत्रापि लोकोत्तरमलौकिकं न तु सामान्यं परिमलं सुगन्धं प्रकटीकरोतीति सम्बन्धः । तस्मान्मदपराधाः श्रीमद्भिः स्वाभाव्यादेव क्षम्यन्ते, तथाप्यधीरतयाहं व्यर्थमेव प्रार्थयामीत्याशयः । अत्र धीरो नायकः । निरुक्त एव रसः । दृष्टान्तोऽलंकारः ।

न चास्त्वेवमेवास्माकं स्वभावाच्छमस्तथापि त्वयि राजप्रकृतित्वेन 'यौवनं धनसंपत्तिः प्रभुत्वमविवेकिता । एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ।' इति, ' यत्र श्रीर्यौवनं वापि शारदा वापि तिष्ठति । तत्र सर्वान्धता नित्यं मूर्खत्वमपि जायते ॥' इति च बृहन्नारदीये कपिलाचार्यवचनाच्च मद्वचसा 'हितं मनोहारि च दुर्लभं वचः' इति न्यायेन कोपश्चेदनुचितमेवेति वाच्यम् । गुरूणां भवादृशामस्मदेकहितार्थं कोपघटितत्वेन परुषवाक्यस्यापि काश्मीरकटुत्ववत्तोषैकपोषकत्वादित्याशयेन महतां कोपमपि सामान्यतो रम्यत्वेनैव वर्णयति—

विश्वाभिरामगुणगौरवगुम्फितानां
रोषोऽपि निर्मलधियां रमणीय एव ।
लोकंपृणैः परिमलैः परिपूरितस्य
काश्मीरजस्य कटुतापि नितान्तरम्या ॥ २७ ॥

विश्वेति । विश्वस्मिञ्जगति येऽभिरामाः सुन्दरा एतादृशा ये गुणास्तेषां यद्गौरवं पौष्कल्यं तेन गुम्फिता प्रथितास्तेषामित्यर्थः । एतादृशां निर्मलधियां सुमनसां रोषोऽपि कोपोऽपि रमणीय एवेति यथाश्रुतमेवान्वयः । अपि हितोपदेशार्थं स चेत्किमु वक्तव्यमिति द्योत्यते । तत्र दृष्टान्तं स्पष्टयति—लोकमित्युत्तरार्धेन । लोकं जगत्पृणन्ति परितोषयन्तीति तथा तैः । काश्मीरेति । कुङ्कुमस्येत्यर्थः ॥२७॥

गीर्भिर्गुरूणां परुषाक्षराभि-
स्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां
न जातु मौलौ मणयो वसन्ति ॥ २८ ॥

गीर्भिरिति । नरा गुरूणां परुषाक्षराभिर्न तु तादृगर्थाभिर्गीर्भिस्तिरस्कृताः सन्तो महत्त्वं यान्तीति सम्बन्धः । तमेवार्थमर्थान्तरन्यासेन दृढयति—अलब्धेति । न लब्धं शाणोत्कषणं यैस्ते तथा एतादृशो मणयो जातु कदाचिदपि नृपाणां मौलौ मुकुटे नैव वसन्तीत्यन्वयः । तस्मान्न मम रोषलेशोऽपीत्याशयः । तस्मादुक्तितिरस्करणमिष्टमेवेति भावः । इह धीरो नायकः । शान्तो रसः । अर्थान्तरन्यासोऽलंकारः ॥ २८ ॥

ननु दुःसङ्गाद्दुर्मार्गप्रवृत्तिस्ततः पापोत्पत्तिस्तस्माद्दुर्बुद्धेरेव यदि सर्वदा दुःसङ्गः कर्तुमनुचितः किल तर्हि ' धर्मेण पापमपनुदति ' इति श्रुतेरैश्वर्यसाध्येन धर्मेण निरुक्तपापं पराकरिष्यामस्ततः का नः क्षतिर्दुर्जनसंगतोऽपीत्याशङ्क्यैश्वर्यस्य क्षणिकत्वान्मैवमिति सीतावृत्तान्तकथनेन ध्वनयति—

वनान्ते खेलन्ती शशकशिशुमालोक्य चकिता
भुजप्रान्तं भर्तुर्भजति भयहर्तुः सपदि या ।
अहो सेयं सीता दशवदननीता हलरदैः
परीता रक्षोभिः श्रयति विवशा कामपि दशाम् ॥ २९ ॥

वनान्त इति । या वनान्ते दण्डकारण्यप्रान्ते । गोदावरीतीरादावित्यर्थः । 'वनान्तः' इति पाठे तु वनमध्य इति यावत् । खेलन्ती क्रीडन्ती सती । शशकेति । शशशावकमालोक्य चकिता सती भयहर्तुः सर्वेश्वरत्वेन यावद्भयभञ्जकस्येत्यर्थः । एतादृशस्य । भुजेति । बाह्वेकदेशम् । सपदि तत्कालं नतु विलम्बेन । एतेन भीत्यतिशयो व्यज्यते । भजतीष्टसाधनताधिया सेवत इत्यर्थः । अहो इत्याश्चर्ये । सा निरुक्तगुणेयं वर्ण्यत्वेन बुद्धिस्थतया प्रत्यक्षा । दशामिति । अतएव—हलेति । हलानीव लाङ्गलानीव रदा दन्ता येषां तैः । एतादृशै रक्षोभिः संरक्षकराक्षसैः परीताऽशोकवनिकायां परिवृता । अतएव विवशा पराधीना सती कामप्यनिर्वाच्यभीत्यादिरूपामिति यावत् । एतादृशीं दशामवस्थां श्रयत्यवलम्बत इत्यन्वयः । तस्मादैश्वर्यमदेनापि नैव दुःसङ्गः कार्य इति तात्पर्यम् । इह मध्या स्वकीया नायिका । भयानको रसः । काव्यलिङ्गमलंकारः ॥ २९ ॥

एवं श्रीगुरोः क्षोभमवलोक्य तदुपशमनार्थमतिनम्रीभूय 'भो भोः श्रीमदाचार्य, क्षम्यतामस्मदादीनामपराधकदम्बम्. तथा मया यत्किंचित्पृच्छ्यते प्रश्नपञ्चकेन प्रपञ्चरहस्यं तन्निर्णायोपदिश्यतां च' इति राजकुमारः संप्रार्थ्य पृच्छति—

किं तीर्थं हरिपादपद्मभजनं किं रत्नमच्छा मतिः

किं शास्त्रं श्रवणेन यस्य गलति द्वैतान्धकारोदयः।

किं मित्रं सततोपकाररसिकं तत्त्वावबोधः सखे

कः शत्रुर्वद खेददानकुशलो दुर्वासनानां चयः ॥ ३० ॥

किं तीर्थमिति। तदुत्तरयति—हरीति। एवमेव प्रश्नोत्तरपरम्परेयं पर्यायचतुष्टयेऽप्यग्रे बोध्या। अच्छेति। स्वच्छेत्यर्थः। विषयित्वस्वभावशाली राजतनूजो भेदवादाभिनिवेशात्तत्प्रतिपादकशास्त्रेषु किमुत्तमं शास्त्रं यस्य श्रवणे तात्पर्यनिर्णये जाते सति द्वैतं तिष्ठत्येव, येन विषयसुखं मोक्षसुखं चास्माकं स्यादित्याशयेन पृच्छति—किं शास्त्रमित्यादिना। गुरुः स्वचातुरीमाहात्म्येन तदभिमतविशेषण एवाद्वैतित्वेन तृतीयान्तविवक्षया समाधत्ते—श्रवणेनेति। द्वैतेति। दृश्यरूपध्वान्ताभ्युदय इति यावत्। अत्र यच्छब्दानुरोधेन पूर्वं तच्छास्त्रं किमिति प्रश्नेऽपि तच्छब्दाध्याहारो बोध्यः। सततेति। निरन्तरोपकारतत्परमित्यर्थः। मित्रम्। विशेषणादेवात्र क्लीबत्वम्। पुंलिङ्गपाठस्तु किं शास्त्रमित्यादिप्राक्तनप्रश्ने, तथा, कः शत्रुरित्याद्युत्तरप्रश्नेऽपि विशिष्टस्यैव पृष्टत्वेन तत्स्वारस्यान्मध्यवर्तिनः किं मित्रमित्यादिप्रश्नस्यापि संदंशन्यायेन तथैव वक्तुमुचितत्वादसततोपकाररसिकस्य तत्त्वावबोधस्यादृष्टत्वेन तद्व्युदासार्थं निरुक्तविशेषणानपेक्षणाच्चानुचित एव। हे सखे इति संबोधनं तु हरिपादेत्यादिसमाधानपञ्चकेऽपि ज्ञेयम्। तेन सौहार्दातिशयध्वननान्निरुक्तोत्तरेऽप्याश्वसनीयतमत्वं व्यज्यते। तत्त्वेति। अद्वयात्मसाक्षात्कारेति यावत्। अत्रैव सखे इति संबोधनप्रयोगादेतदपेक्षयान्यद्रहस्यं नैवेति द्योत्यते। एवं वदेति पदमपि प्रश्नपञ्चकेऽपि। तथा तदनुरोधात्त्वंपदाध्याहारश्च कर्तव्य एव। खेदेति। दुःखदानदक्ष इत्यर्थः। दुर्वासनानामन्तःकरणादिनिष्ठदुष्टसंस्काराणां चयः संघ एवेति योज्यम्। 'सखा' इति प्रथमान्तपाठः 'संचयः' इति पाठश्च कः सखेत्यध्याहारापत्तेः क्रमभङ्गापत्तेः प्रश्नसरणित्यागापत्तेः सखिमित्रयोर-

वान्तरविशेषेऽपि हितकारित्वाविशेषेण पौनरुक्त्यापत्तेः खेददानकुशल इत्यत्रापि क्रमभङ्गभिया प्रश्नान्तरत्वाद्यापत्तेरन्यथा दुर्वासनेत्यादावनन्वितत्वापत्तेश्च संबुद्ध्यन्त-पाठेऽपि क्रमभङ्गदोषस्य तु प्रथमे चरण एवाविशिष्टपृष्टत्वेन पराकरणीयत्वादनुचित एव। तथा 'सम्' पदेन गुणानाधानात्प्रत्युत पदचतुष्टयसमासघटकत्वाच्च तस्य मधुररसे प्रकृतेऽनुपयुक्तत्वाच्च तथैव सोऽपीति ध्येयं धीरैः। अत्र किं शास्त्रमि-त्यादिर्विशिष्टप्रश्नत्रयेऽपि क्रमाद्धर्ममीमांसायाः सुग्रीवादिवद्यत्किंचित्कालावच्छेदेनो-पकारपरायणमित्रस्य, शिशुपालादिलक्षणस्य खेददानाकुलस्य शत्रोरपि व्युदासः सूचितः। तस्माद्धरिपादपद्मभजनादिचतुष्टयं पुमर्थचतुष्टयेच्छुना संपादनीयमेव तथा दुर्वासनाध्वंसनं चेति तत्त्वम्। इह बुभुत्सुर्नायकः। शान्तो रसः। उक्ति-प्रत्युक्तिरलङ्कारः॥ ३०॥

एवं स राजकुमारः खलनिन्दामाकर्ण्य ततः परमक्षुब्धं श्रीगुरुमालक्ष्य 'गुरुं प्रणतिभिः' इति न्यायादुक्तनिन्दाप्रधानपद्यत्रयद्योतितस्वस्तुतितः प्रचुरप्रमुदितः संस्तं वृक्षान्योक्त्या प्रणमति—

धत्ते भरं कुसुमपत्रफलावलीनां
घर्मव्यथां वहति शीतभवां रुजं च।
यो देहमर्पयति चान्यसुखस्य हेतो-
स्तस्मै वदान्यगुरवे तरवे नमोऽस्तु॥ ३१॥

afflicting

धत्ते भरमिति। यो वक्ष्यमाणगुणगणस्तरुवरः। कुसुमेति। भरं भारम्। अन्यसुखस्य हेतोरितरानन्दकरणार्थमित्यर्थः। न हि तेन तस्य किंचिद्धितम्। धत्ते धरति। तथा घर्मव्यथामातपपीडां शीतभवां हिमसंभवां रुजं पीडां च वहति। इदं वृष्ट्यादेरप्युपलक्षणम्। किंबहुना, देहमप्यर्पयति। इन्धनाद्यर्थिभ्य इत्यर्थः। तस्मा-यित्यादि यथाश्रुतमेव योज्यम्। वदान्येति। अनेनैतादृशो दातृशिरोमणिस्त्वमेव, अहं तु वदान्याभास एवेति भावः। अत्र चरणत्रयेण क्रमेण विद्यासंभारसंभरण-श्रमशालित्वं खलपीडासहिष्णुत्वं प्राणप्रायब्रह्मविद्याप्रदातृत्वं चेति वदान्यगुरुत्वे हेतवो द्योतिताः। नमनेन च तत एव सर्ववन्द्यत्वं व्यज्यते। इहोदात्तो नायकः। दानवीरो भक्तिश्च रसः। काव्यलिङ्गमलंकारः॥ ३१॥

अथायं निरुक्तापराधी तटस्थादिरपि मूढजनः श्रीमद्भिः करुणयानुग्राह्य एवेति श्रीगुरुं प्रार्थयन्राजकुमारस्तेन प्रबोध्यते—

हालाहलं खलु पिपासति कौतुकेन
कालानलं परिचुचुम्बिषति प्रकामम्।
व्यालाधिपं च यतते परिरब्धुमद्धा
यो दुर्जनं वशयितुं तनुते मनीषाम् ॥ ३२ ॥

हालाहलमिति। यो दुर्जनं वशयितुं मनीषाम्। 'बुद्धिर्मनीषा' इत्यमरात्तद्वृत्तिविशेषरूपामिच्छामित्यर्थः। तनुते विस्तारयति। स हालाहलम्, न तु जलम्। तत्रापि कौतुकेन, न तु मृतीच्छया। खलु निश्चितम्। विषमेवेत्यर्थः। पिपासति पानकर्मीकर्तुमिच्छति। तथा। कालेति। प्रलयकालीनवह्निम्, न तु सामान्याग्निम्। तत्रापि प्रकाममत्युत्कटम्, न तु यत्किंचित्। तत्रापि परिचुचुम्बिषति भूयोऽपि समन्तादपि वक्त्रसंयुक्तीकर्तुमिच्छति। न केवलमेतावदेव, किं तु— व्यालेति। सर्पराजं तक्षकमपि। तत्राप्यद्धा साक्षादव्यवहितम्। तत्रापि परिरब्धुम्, न तु द्रष्टुम्। यतते प्रयत्नं करोतीत्यन्वयः। तस्मादिदं दुर्घटमेवेति भावः। इह मूर्खो नायकः। औदासीन्यध्वनितः शान्तो रसः। दृष्टान्तविशेषोऽलंकारः ॥३२॥

ततः स तटस्थोऽपि स्वदोषमवधार्यानुतप्तस्तं पण्डितं व्याजनिन्दाघटिताप्रस्तुतप्रशंसालंकारेण पण्डितवरंमन्य इवोपालभते—

दीनानामिह परिहाय शुष्कसस्या-
न्यौदार्यं प्रकटयतो महीधरेषु।
औचित्यं विपुलमवाप्य दुर्मदस्य
ज्ञातोऽयं जलधर तावको विवेकः ॥ ३३ ॥

दीनानामिति। हे जलधर, तावकस्त्वदीयः। अयं प्रत्यक्षः। विवेको विचारः। इह लोके दीनानामनन्यगतीनां कृषीवलानाम्। एतेनावश्यानुकम्पनीयत्वं व्यज्यते। तत्रापि। शुष्केति। शुष्कधान्यानि। एवं च तत्पुष्ट्यभावे तेषां मृत्युरेव स्यादिति द्रुतपरित्रणीयत्वमावेद्यते। परिहाय त्यक्त्वा। महीधरेति। पर्वतेष्वित्यर्थः। औदार्यं वृष्टिपुष्ट्या वदान्यत्वमिति यावत्। प्रकटयतः स्फुटीकुर्वतः। एतेनोप-

हासः सूचितः। एतादृशस्य दुर्मदस्य दुष्टश्चासौ मदश्चेति तथा। उन्मादस्येत्यर्थः। विपुलं प्रचुरमौल्वल्यमौत्कट्यमवाप्य प्राप्य। ज्ञातः 'प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः' इत्यमरात्प्रिख्यातोऽस्तीति संबन्धः। तस्मान्मादृशा दीनास्त्वयानुकम्पनीया एवेत्याशयः। इहाविवेकी नायकः। करुणो रसः। अलंकारस्तूक्त एव ॥३३॥

अथ तत्रैवावस्थितः प्रागुक्तः कश्चित्तटस्थः स्वमनसि यदयं पण्डितवरस्तावदिमं राजतनूजं स्वसुन्दरीत्यागानौचित्योपदेशान्यथानुपपत्त्या प्रागुक्तरीत्या चतुर्वर्गोपदिक्षुरपि नास्मान्प्रति करुणालेशेनेषदप्यनुगृह्णात्यतो धिङ्मामिति परमविषण्णस्तेनानुकम्पया किमिति त्वं खिन्नोऽसीति पृष्टस्तदपलाप्यानुतापवशात्सत्त्वप्रधानचेताः सन् धनलोभलक्षणं स्वापराधमेव तत्र हेतुं द्योतयन्सामान्यतः स्वार्थं परार्थं वा धनार्थित्वावच्छेदेन मुखमालिन्यव्याप्तिं स्पष्टयति—

स्वार्थं धनानि धनिकात्प्रतिगृह्णतोऽपि
स्वास्यं भजेन्मलिनतां किमिदं विचित्रम्।
गृह्णन्परार्थमपि वारिनिधेः पयोऽपि
मेघोऽयमेति सकलोऽपि च कालिमानम् ॥ ३४ ॥

स्वार्थमिति। प्रतिगृह्णतोऽपि, न तु स्तेयादिना हरतः। स्वास्यं स्वस्य प्रतिग्रहीतुरस्मदादेरास्यं वदनमित्यर्थः। शोभनं वा मुखं। 'यदास्यम्' इति पाठे तु यत्पदमिदमा संबध्यते। ननु कुतो नेदं विचित्रं प्रत्युत धनलाभजन्यसंतोषात्प्रसादेनैव भाव्यमित्याशङ्क्य कैमुतिकन्यायेन समादधत्तत्रार्थान्तरन्यासमुपन्यस्यति—गृह्णन्नित्युत्तरार्धेन। सकलोऽपि संपूर्णोऽपि न त्वेकदेश एव। अयं बुद्धिस्थः सर्वलोकप्रत्यक्षो वा। मेघः परार्थमपि, न तु स्वार्थम्। वारिनिधेः सकाशात्पयोऽपि जलमपि। तेनास्य तुच्छत्वं व्यज्यते। गृह्णन्कालिमानं कार्ष्ण्यमेतीति योजना। तस्माद्धिग्धनयाचनमित्याकूतम्। अत्रोदासीनो नायकः। शान्तो रसः। काव्यार्थापत्त्यनुप्राणितोऽर्थान्तरन्यासोऽलंकारः ॥ ३४ ॥

एवं यावद्रम्यस्याशुविनाशित्वमाकर्ण्य स तटस्थः श्रीगुरुविरहेण निरुक्तनरवरकुमारस्य दुरवस्थाकथनच्छलेनोभयोरपि तच्चरणकमलयुगे रतिमाभ्रान्योक्त्या व्यनक्ति—

धूमायिता दश दिशो ललितारविन्दा
देहं दहन्ति दहना इव गन्धवाहाः ।
त्वामन्तरेण मृदुजालकलाम्र मञ्जु-
गुञ्जन्मधुव्रतमथो किल कोकिलस्य ॥ ३५ ॥

धूमायिता इति । हे मृद्विति । मृदु कोमलमेतादृशं यज्जालकं कलिकाजालं तल्लाति आदत्त इति तथा एतादृश भो आम्र । अथोऽनन्तरं त्वामन्तरेण भवन्तं विना कोकिलस्य । ललितेति । ललितानि फुल्लत्वादिना सुन्दराण्यरविन्दानि महोत्पलानि यासु ताः । एतादृशो दशदिशोऽपि । यद्यप्यूर्ध्वाधोदिशोर्नारविन्दसम्भावना तथापि ब्रह्मलोकनागलोकयोस्तद्दर्शनाद्युक्तैव सा । धूमेति । धूम इव आचरिताः । सधूमा इत्यर्थः । तथा गन्धवाहाः सुरभिवायवो दहना इवाग्नय इव । देहं दहन्ति किलेति सम्बन्धः । कुत इत्यत आह—मञ्ज्विति । कीदृशं त्वाम् । मञ्जुलध्वनन्मधुकरमित्यर्थः । अत्र 'दलितारविन्दाः' इति 'मृदुताम्रदलाम्रमञ्जुगुञ्जन्मधुव्रत मधौ' इति च पाठस्तु समीचीनः । तत्र दलितपदं विकसितपरम् । एवं मृदून्यत एव ताम्राणि दलानि पत्राणि यस्य तत्संबुद्धौ । अत एव मञ्ज्विति । एतादृश हे आम्र, त्वामन्तरेण त्वां विना मधौ वसन्ते कोकिलस्येत्यादि योज्यम् । तस्मात्त्वद्वियोगो मैवास्त्विति रहस्यम् । इह विषादी नायकः । करुणो रसः । गुरुरतिर्भावश्च । अप्रस्तुतप्रशंसालंकारः ॥ ३५ ॥

अथैवं स नरवरकुमारोऽपि निजक्षात्रनिसर्गसिद्धशौर्यस्यापि 'जहि शत्रुं महाबाहो कामरूपं दुरासदम्' इति श्रीमद्भगवद्गीतावचनात्, 'कः शूरो यो ललनालोचनबाणैर्न विव्यथितः' इति श्रीमद्विमलाचार्यचरणकमलीयप्रश्नोत्तररत्नमालोक्त्यान्तःशत्रुभूतकामाद्यासुरवृत्तिविजयमन्तरा वैयर्थ्यमेवेति प्रपूर्वपद्यध्वनितयावद्दृश्यविनश्वरत्वाकर्णनजन्यनिजनिर्वेदं सिंहान्योक्त्या श्रीगुरुं प्रति द्योतयति—

भिन्ना महागिरिशिलाः करजाग्रजाग्र-
दुद्दामशौर्यनिकरैः करटिभ्रमेण ।
दैवे पराचि करिणामरिणा तथापि
कुत्रापि नापि खलु हा पिशितस्य लेशः ॥ ३६ ॥

भिन्नेति । करिणां गजानामरिणा शत्रुणा सिंहेन । अत एव यद्यपि दैवेऽदृष्टे पराचि परांमुखे सति करटिभ्रमेण । 'काकेभगण्डौ करटौ' इत्यमरात्, 'करटः करिगण्डे स्यात्कुसुम्भे निन्द्यजीवने । काके वाद्ये दुर्दुरूढे नवश्राद्धे' इति हैमाच्च करटशब्दितगण्डपिण्डद्वन्द्वशाली करटी । गजेन्द्र इति यावत् । तद्भ्रमेण स्थूलत्वनीलत्वादिसाधर्म्याद्गजेन्द्रभ्रान्त्येत्यर्थः । करजेति । करजा नखास्तेषां यान्यग्राणि तेषां ये जाग्रन्तोऽतन्द्रा अत एव उद्दामा उत्कटा एतादृशा ये शौर्यनिकरा वीर्यसमूहास्तैरित्यर्थः । महागिरिशिला भिन्ना विदारिताः । हा इति खेदे । तथापि कुत्रापि पिशितस्य । 'पिशितं तरसं मांसम्' इत्यमरान्मांसस्येत्यर्थः । लेशोऽपि स्वल्पांशोऽपि नापि खलु नैव लब्ध इति योजना । तस्माददृष्टपुष्टमिथ्यादृष्टिवशादेव मयैते शत्रवः पराजिताः सर्वेऽपि । वास्तविकविजयस्तु तेभ्यः सकाशात्तेषामेवावास्तविकत्वात्क्वचिदपि देशे काले नैव लब्धः । अतः सर्वं परित्यज्यान्तःशत्रुविजयार्थमेवाहं यतिष्यामीत्याकूतम् । इह निर्विण्णो नायकः । वीरानुप्राणितः शान्तो रसः ।। ३६ ॥

इदानीं कविर्नीत्युपदेशफलमन्तःशत्रुविजयार्थं सन्मार्गप्रयत्नलक्षणं धर्मं तत्सिद्ध्यर्थं दानाद्युपयोगिनं स्वस्वोचितगुणप्रावण्यैकसाध्यमर्थं च सम्पादयितुं शिष्यस्य संजातं विज्ञानं प्रारम्भवत्समाप्तावपि सिंहान्योक्त्यैव द्योतयति—

> गर्जितमाकर्ण्य मनागङ्के
>
> मातुर्निशार्धजातोऽपि ।
>
> हरिशिशुरुत्पतितुं द्रागङ्गान्या-
>
> कुञ्च्य लीयतेऽतिभृशम् ॥ ३७ ॥

इति पण्डितराजश्रीजगन्नाथविरचिते भामिनीविलासे ऽन्योक्त्युल्लासः प्रथमः ।

गर्जितमिति । हरीति । सिंहशिशुः । पक्षे श्रीकृष्णसुतः कामः । एतेन देवताविजयवर्णनलक्षणवस्तुनिर्देशलक्षणं मंगलमपि प्रकरणसमाप्तौ सूचितं भवति । तथोत्तरप्रकरणप्रतिबोध्यकामपुमर्थस्य सूत्रणमपि ध्वन्यते । निशेति । निशाया रात्रेरर्धं यामद्वयं तत्परिमितं जातं 'जातिर्जातं च' इत्यमराज्जात्युपलक्षितं वयो यस्य स तथा । तादृगपीत्यर्थः । यद्वा निशार्धे जातः । पक्षेऽङ्कुरितोऽपीति यावत् ।

मनागीषद्गर्जितं मेघध्वनितम्। तस्योद्दीपनविभावत्वात्। पक्षेऽप्येवमेव। मातुर्जनन्याः। पक्षे अमातुर्जीवस्य। अङ्क उत्सङ्गे। पक्षे मनोरूपैकदेशे। आक्रष्टुमुत्पतितुम्। अतिभृशमत्यन्तम्। अङ्गान्यवयवान्। पक्षे मोदनादीनि साधनानि। आकुञ्च्य लीयत इत्यन्वयः। 'निभृतम्' इति पाठे तु निगूढामिति व्याख्येयम्। अत्र धीरो नायकः। वीरो रसः। श्लेषश्चालंकारः॥ ३७॥

इति प्रणयप्रकाशे प्रथमः प्रमोदः॥

करुणविलासः।

एवं तृतीयः कामाख्यः पुरुषार्थोऽपि स्वकीयया सहैव संपाद्यो न परकीययापि सह नापि परकीययैव सहेति श्रीरामादिनिदर्शनेन द्योतयित्वाधुना क्रमप्राप्तस्य मोक्षाख्यचतुर्थपुमर्थस्य ज्ञानैकसाध्यत्वात्तस्य च भक्तिविरक्त्यादिप्रयोज्यत्वात्तस्यापि प्रायः शोकमन्तरा संभवाभावान्निर्वेदस्थायिभावाख्यं शान्तरसं चतुर्थविलासे वर्णयिष्यन्नत्र तृतीये विलासे शोकस्थायिभावं करुणरसं श्रीरामस्य सीतारसातलप्रवेशोत्तरकालिकैर्वाक्यैरेव व्यनक्ति—दैवे परागित्याद्या प्रकरणसमाप्ति।

दैवे पराग्वदनशालिनि हन्त जाते
याते च संप्रति दिवं प्रति बन्धुरत्ने।
कस्मै मनः कथयितासि निजामवस्थां
कः शीतलैः शमयिता वचनैस्तवाधिम् ॥ ३८ ॥

जानक्या रसातलप्रवेशादिकं तूक्तं महारामायण एवोत्तरकाण्डे—'सर्वान्समागतान्दृष्ट्वा सीता कौशेयवासिनी । उदङ्मुखा ह्यधोदृष्टिः प्राञ्जलिर्वाक्यमब्रवीत् ॥ यथाहं राघवादन्यं मनसापि न चिन्तये । तथा मे माधवी देवि विवरं दातुमर्हसि ॥ तथा वदन्त्याः सीतायाः प्रादुरासीत्समन्ततः । भूतलाद्दिव्यमत्यर्थं सिंहासनमनुत्तमम् ॥ ध्रियमाणं शिरोभिस्तदुदतिष्ठद्दुरासदम् । दिव्यं दिव्येन वपुषा नागैरमितविक्रमैः ॥ तस्मिंस्तु धरणी देवी सीतां संगृह्य बाहुना । स्वागतं तेत्युवाचैनामासने चोपवेशयत् ॥ तामासनगतां सीतां प्रविशन्तीं रसातलम् । पुष्पवृष्टिरविच्छिन्ना दिव्या सीतामवाकिरत् ॥' इत्याद्यासर्गान्तं तद्विस्मयादिकमुक्त्वाग्रिमसर्गे तावच्छ्रीरामशोकोऽप्युक्तः—'दण्डकाष्ठमवष्टभ्य शोकव्याकुलितेन्द्रियः । अवाक्शिरा दीनमना रामोऽप्यश्रूण्यवर्तयत् । क्रोधशोकसमाविष्टो रामो वचनमब्रवीत् । अभूतपूर्वशोको मे पुनः संद्रष्टुमिच्छति ।" इति । हे मनः । एतेन वस्तुतः स्वस्याखण्डानन्दाद्वैतसच्चिदानन्दब्रह्मैकरूपत्वेन शोकलेशस्याप्यभावेऽपि लोकानुग्रहार्थं मायिकमनुष्यनाट्यपटुलीलाविग्रहशालितया जगदीशस्यापि मे यदा विषयसङ्गेन शोकत्वं तदा जीवकोटिनिविष्टानां भवतां कैव कथेत्यतः

सर्वात्मना विषयसङ्गपरित्याग एवाहरहः कार्य इति मनःसंबोधनतात्पर्यं व्यज्यते । दैवे प्रारब्धकर्मणि । पराङिति । पराङ्मुख इत्यर्थः । जाते सति । चः समुच्चये । अत एव संप्रतीदानीं बन्धुरत्ने ' बन्धु बन्धूकपुष्पे स्याद्बन्धुर्भ्रातरि बान्धवे ' इति विश्वाद्बन्धूनां बान्धवानां सर्वसम्बन्धिनां मध्ये रत्नमिव श्रेष्ठं तस्मिन् । एतादृशे सीताख्ये कलत्र इति यावत्। हन्तेति खेदे । दिवं प्रति रसातलाभिधबिलस्वर्गं प्रतीत्यर्थः । याते गते सति । एवं चैतस्य दुष्परिहरत्वाद्वक्ष्यमाणाक्षेपार्हदुःखहेतुत्वं ध्वन्यते । त्वं निजां स्वकीयाम् । अवस्थां लोकोत्तरशोकदशां कस्मै कथयितासि । न कस्मा अपीत्यर्थः । एतेन 'सुहृदि निरन्तरचित्ते गुणवति भृत्ये प्रियासु योषित्सु। करुणाशालिनि भूपे निवेद्य दुःखं सुखी भवति ॥' इत्युक्तदुःखशामकस्थलवैकल्यं व्यज्यते । तेनास्य दुःखस्य लोकविलक्षणत्वं सूच्यते। अत एव कः शीतलैः शिशिरैर्वचनैरमृतोपमसान्त्ववाक्यैरित्यर्थः । तवाधिं शमयिता । न कोऽपीत्यन्वयः । एवं च निरवधिक एवायं शोकस्तवेति भावः । इह यावत्प्रकरणसमाप्ति संतप्तो नायकः । करुण एव रसः । काव्यलिङ्गादिरलंकारश्च तत्र तत्र यथार्थमूह्यः ॥३८॥

निर्दूषणा गुणवती रसभावपूर्णा
सालंकृतिः श्रवणकोमलवर्णराजिः ।
सा मामकीनकवितेव मनोभिरामा
रामा कदापि हृदयान्मम नापयाति ॥ ३९ ॥

निर्दूषणेति । विशेषणचतुष्टयं तु पक्षद्वयेऽपि स्पष्टमेव । श्रवणेति। श्रवणं श्रोत्रं तस्य कोमलानुद्वेजकत्वाददतिप्रिया वर्णराजिर्भणितादिलक्षणोच्चारिताक्षरपंक्तिः । पक्षे 'तपःस्वाध्यायनिरतम्' इत्यादिप्रथिताक्षरसरणिर्यस्याः सा तथेत्यर्थः। एतादृशी सा पूर्वानुभूता । मामकीनेति । ममेयं मामकीना मदेकमुख्यवर्णनपरत्वेन मत्संबन्धिनी श्रीमद्वाल्मीकिविरचितमहारामायणाभिधकवितेवेति यावत् । स्पष्टमन्यत् । अत्र कविवाक्यत्वभ्रान्तिस्त्वनालोचितपूर्वापरतात्पर्यतया विदुषामपि केषांचिदास्तां नाम परिपक्वाम्रफलविशेषे सिन्दूरधीरिव का नः क्षतिस्तावतास्वादितरसानामितररसानां चेति दिक् ॥ ३९ ॥

चिन्ता शशाम सकलापि सरोरुहाणा-
मिन्दोश्च बिम्बमसमां सुषमामयासीत् ।
अभ्युद्गतः कलकलः किल कोकिलानां
प्राणप्रिये यदवधि त्वमितो गतासि ॥ ४० ॥

चिन्तेति । असमामतुल्याम् । निरुपमामित्यर्थः । अयासीत् । प्रापेति यावत् । शिष्टं तु स्पष्टमेव । इह क्रमेण त्रिपाद्यां चरमचरणेन सीतालोचनादेराननस्य स्वनस्य चाभावो हेतुत्वेन ध्वनितः ॥ ४० ॥

सौदामनीविलसितप्रतिमानकाण्डे
दत्त्वा कियन्त्यपि दिनानि महेन्द्रभोगान् ।
मन्त्रोज्झितस्य नृपतेरिव राज्यलक्ष्मी-
र्भाग्यच्युतस्य करतो मम निर्गतासि ॥ ४१ ॥

सौदामनीति । 'तडित्सौदामनी विद्युत् ' इत्यमराद्विद्युद्विक्रीडितसमत्वेन क्षणिकानित्यर्थः । एतेन दशसहस्रवर्षपर्यन्तत्वेऽपि वक्ष्यमाणविषयभोगेष्वनुपमसुखत्वेन तद्ध्वंसकाले क्षणिकत्वमतिरुचितेवेति द्योतितम् । एतादृशान् । महेन्द्रेति । महानिन्द्रो येन 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेर्हिरण्यगर्भान्तसकलविषयानन्दकूटस्थस्याद्वैतब्रह्मानन्दस्यैव ये भोगा इव तानित्यर्थः । एतेन तेष्वलौकिकविषयानन्दत्वं व्यज्यते । कियन्त्यपि दिनानि यत्किंचित्कानिचिदहानि । मन्त्रेति । मन्त्रेण सन्ध्यादिकरणगूढविचारेणोज्झितस्त्यक्तस्तस्य । विषयासक्त्या प्रमादेन तस्य विस्मृतत्वेनैतस्य दौःस्थ्यमवेद्यते । नैव परित्यक्तस्यैवेत्यर्थः । मम करतोऽकाण्डेऽनवसर एवाकस्माद्वा निर्गतासीति सम्बन्धः ॥४१॥

अथ ब्रह्मादिभिर्बोधितः सन् श्रीरामः किंचित्सावधान इव तद्वाक्यादेः सर्वजनस्तव्यत्वं व्यनक्ति—

रीतिं गिरामसृतवृष्टिकरीं तदीयां
तां चाकृतिं कृतिवरैरभिनन्दनीयाम् ।
लोकोत्तरामथ कृतिं च सुधारसार्द्रां
स्तोतुं न कस्य समुदेति मनःप्रसारः ॥ ४२ ॥

रीतिमिति । कृतिवरैः । कुशलश्रेष्ठैरित्यर्थः । सुधेति । इदं हि विशेषणं विशेष्यत्रयेऽप्यन्वेति । न च प्रथमेऽमृतेति विशेषणेन पौनरुक्त्यापत्तिः । शोभना धारा यस्यां सा सुधारा, आर्द्रया नक्षत्रविशेषेण सह वर्तत इति सार्द्रा । सुधारा चासौ सार्द्रा चेति तथा तामित्यर्थः । एतेन वृष्टौ पुष्टतरत्वं सूचितम् । आकृतिपक्षे स्निग्धत्वम् । कृतिपक्षे रसातलप्रवेशरूपमहाशपथलक्षणपातिव्रत्यवीररसघटितत्वेन सरसत्वं च । तस्मादितःपरं वैदेही सर्वात्मना स्तव्यैव सर्वैर्न तु तदुद्देशेन मयान्येन वा शोकः कार्य इति तात्पर्यम् ॥४२॥

शान्तविलासः।

एवमहो सकलजगन्नियन्तुरनन्तकल्याणगुणानिलयस्य भक्तानुग्रहार्थमेव प्रकटीकृतमायिकलीलाविग्रहस्य वस्तुतः संविदेकरसस्य स्वप्रकाशसत्यज्ञानानन्तानन्दाद्वैतकूटस्थब्रह्मरूपस्य भगवतः श्रीरामस्यापि यदा स्वधर्मैकरीत्या विषयान्भुञ्जतश्चक्रवर्तिनोऽपि यदा प्रेयसीवियोगेन विवेकेतरप्रतीकारविधुरः शोकव्यतिकर एवं संपन्नस्तदा कैव कथा मादृशस्य पामरतरस्येति संजातविचाराङ्कुरः प्रथमोल्लासप्रस्तुतः कश्चिन्नरवरकुमारः सद्यः संपन्नवैराग्यभरः श्रुत्यन्तमहावाक्यैककरणकाशेषदृश्यशोकतरणद्वारीभूताद्वैतब्रह्मात्मैक्यसाक्षात्कारफलकद्वैतमिथ्यात्वानुभवस्य यावत्काम्यनिषिद्धवर्जनपूर्वकानेकजन्मानुष्ठितवेदैकनिष्ठापूर्वकनित्यादिस्ववर्णाश्रमकर्मपरितुष्टान्तर्याम्येकप्रसादासादितचित्तशुद्धिसत्वे 'यस्य देवे परा भक्तिः' इति, 'भक्त्या मामभिजानाति' इत्यादिश्रुतिस्मृतिप्रसिद्धभगवद्भक्त्येकसाध्यतया तदर्थं तमेव प्रार्थयते—

विशालविषयावलीवलयलग्नदावानल
प्रसृत्वरशिखावलीविकलितं मदीयं मनः।
अमन्दमिलदिन्दिरे निखिलमाधुरीमन्दिरे
मुकुन्दमुखचन्दिरे चिरमिदं चकोरायताम्॥ ४३॥

विशालेति। इदम्। एतेन वर्तमानकालावच्छिन्नत्वं ध्वन्यते। तेन त्वरातिशयात्तापप्राचुर्यं सूच्यते। मदीयं मामकम्। मनोऽन्तःकरणं न तु चक्षुः। तेन प्रतिपादनासक्त्या विवेकपौष्कल्यं द्योत्यते। मुकुन्देति। 'मुकुन्दो मुरमर्दनः' इत्यमराद्विष्णुरेव मुकुन्दस्तस्य यन्मुखं वदनं तदेव चन्दिरः। 'चिदि आह्लादने' इति धातोरुणादिप्रत्ययविशेषाच्चन्द्रस्तस्मिन्विषय इत्यर्थः। 'चन्दिरोऽनेकपे चन्द्रे' इति विश्वः। चिरं न तु क्षणम्। प्रेमदार्ढ्यं व्यज्यते। चकोरायतां चकोरवदाचरतु। स यथा लौकिकराकामकरे संसक्तो भवति तत्किरणामृतपानार्थमेवमिदमत्र मधामृतपानार्थमासक्तं भवत्वित्यन्वयः। ननु लौकिकचन्द्रे कामिनीमुखचन्द्र एव वा किमिति न तथात्वं प्रार्थ्यत इत्याशङ्क्य तयोः क्षयिष्णुत्वात्सर्वांशिकशोभावत्त्वेऽनादरबीजे व्यञ्जयंस्तं विशिनष्टि—अमन्देत्याद्युत्तरार्धशेषेण। अमन्दमखण्डं मिलन्तीन्दिरा शोभा लक्ष्मीश्च यस्मिंस्तत्रेत्यर्थः। एतेन प्रकृतचन्द्रव्यतिरेकः सूचितः।

निखिलेति । सर्वमधुरिमाधार इति यावत् । एवं च सकामैककल्पितमधुरिमाधारत्कामिनीवदनादसौ द्योत्यते । तेन प्रकृते नित्यनिरतिशयसौन्दर्यशालित्वं सकामनिष्कामसाधारणतृप्तिजनकदीप्त्यादिमालित्वं च क्रमात्सूच्यते । नन्वधिकारविरहे शशकशिशोः सिंहशौर्यं प्रार्थनशतेनापि कथं घटेतेत्यतस्तद्विशिनष्टि—विशालेति । विशाला ब्रह्मलोकान्तत्वेन महती येयं विषयावली शब्दादीष्टविषयपङ्क्तिः सैव वलयाकारा । एतेन पलायनादिना प्रतीकारायोग्यत्वं ध्वनितम् । एतादृशी लभा संश्लिष्टा या दावानलस्य दावाग्नेः प्रसृत्वराणां 'प्रसृत्वरः प्रसमरः' इत्यमरात्प्रसरणशीलानां शिखानां 'अर्चिर्हेतिः शिखास्त्रियाम्' इत्यपि तदुक्तेर्ज्वालानामावलिस्तया विकलितमित्यर्थः । अत्रैकविंशतिभक्त्यभिन्नः शान्त एव रसः । इह रूपकव्यतिरेककाव्यलिङ्गलुप्तोपमादयोऽलंकाराः ॥ ४३ ॥

अथास्य ग्रन्थस्य प्रचारप्रतिबन्धकानि नीचगृहसंपत्तिर्विप्रगृहविपत्तिः साधुच्छिन्नमतिरसाध्वायुर्वृद्धिमततिश्चेति चत्वार्येवातः सांप्रतिकत्वेन तत्प्रयोजकमीश्वरमेव कविरुपालभते—

> भूतिर्नीचगृहेषु विप्रसदने दारिद्र्यकोलाहलो
> नाशो हन्त सतामसत्पथजुषामायुः शतानां शतम् ।
> दुर्नीतिं तव वीक्ष्य कोपदहनज्वालाजटालोऽपि स-
> न्किं कुर्वे जगदीश यत्पुनरहं दीनो भवानीश्वरः ॥ ४४ ॥

भूतिरिति । नीचगृहेषु म्लेच्छाद्यधमतमसद्मस्वित्यर्थः । भूतिरैश्वर्यसंपत्तिः । तथा विप्रसदने ब्राह्मणानां गृहे दारिद्र्यकोलाहलो दारिद्र्येणान्नाच्छादनादेरपि शून्यत्वेन यः कोलाहलो बालानां रोदनादि कलकलशब्द इत्यर्थः । 'कोलाहलः कलकल.' इत्यमरः । हन्तेति खेदे । सतां साधूनां नाशः शीघ्रमेव मृत्युः । अल्पायुष्ट्वमिति यावत् । एवमसत्पथजुषां कुमार्गगामिनाम् । शतानां शतम् । असंख्यातमित्यर्थः । अतिशयोक्तिरियम् । यद्वा 'समानाम्' इत्येव पाठः । तथा च 'हायनोऽस्त्री शरत्समाः' इत्यमराद्वर्षाणामित्यर्थः । 'शतं शतायुर्वै पुरुषः' इति श्रुतेस्तेषां पूर्णायुष्ट्वमिति यावत् । हे जगदीश परमेश्वर, एवं विश्वनियन्तुस्तव दुर्नीतिं वीक्ष्याहम् । कोपेति । क्रोधानलज्वालाजटालोऽपि सन्नहं किं कुर्वे । न

किमपि करोमीत्यर्थः । कुत इति चेत्तत्राह—यदित्यादिशेषेण । यद्यस्मात्कारणादहं दीनोऽस्मि । भवान्पुनरीश्वरोऽतिसमर्थोऽस्तीति संबन्धः । तस्मात्त्वयेदं चतुष्टयं नैव विधेयं तथा च मद्ग्रन्थप्रथावश्यमेव भविष्यतीति भावः । अत्र जगदीशेश्वरपदाभ्यां द्विरुक्तिस्तु वक्तुः कवेरतिरभसपारवश्येनानवधानादेवेति ध्येयम् । एवं चात्र नीतिवीरो रसः । काव्यलिङ्गादिरेवालंकारः ॥ ४४ ॥

ननु त्वं किमित्येवमीश्वरमाक्षिपसि तत्तज्जीवादृष्टानुसारत एव तस्य फलदत्वात्तथा च यदि त्वत्काव्यस्याप्रसिद्धिरेव स्याच्चेत्किं ततः सन्त्येव मानुषकविष्वपि कालिदासादीनां रघुवंशादीनि काव्यानि ततस्तैरेव तदधिकारिणां कान्तोपदेशरीत्या धर्मादिपुमर्थतत्साधनध्वननं च भूयादिति चेत्तत्राह—आमूलादित्यादिसप्तभिरासमाप्ति ।

आ मूलाद्रत्नसानोर्मलयवलयितादा च कूलात्पयोधे-
र्यावन्तः सन्ति काव्यप्रणयनपटवस्ते विशङ्कं वदन्तु ।
मृद्वीकामध्यनिर्यन्मसृणरसझरीमाधुरीभाग्यभाजां
वाचामाचार्यतायाः पदमनुभवितुं कोऽस्ति धन्यो मदन्यः ॥४५॥

रत्नसानोर्मेरोः । 'रत्नसानुः सुरालयः' इत्यमरः । मूलादा । मर्यादार्थकोऽयमाङ् । मेरुमूलं मर्यादीकृत्येत्यर्थः । तथा मलयेति । मलयाचलवेष्टितादित्यर्थः । एतादृशात्पयोधेः क्षाराब्धेः कूलात्तीरात् आ । तीरं मर्यादीकृत्येति यावत् । एवं च सेतुसुरालयमध्यदेश इति फलितम् । काव्येति । काव्यरचनचतुरा इत्यर्थः । 'दक्षे तु चतुरपेशलपटवः' इत्यमरः । वदन्त्विति पदमितिशब्दाध्याहारेण कोऽस्ति धन्यो मदन्य इति वदन्त्विति योजना । मृद्वीकेति । 'मृद्वीका गोस्तनी द्राक्षा' इत्यमरः । तस्या अपि मध्यस्तस्मादपि निर्यस्तत्परिपाकात्स्वयमेवाविर्भवन् । न तु निष्काशितः । अत एव यो मसृणरसो माधुर्याधिक्येन कोमलरसस्तस्यापि या झरी सूक्ष्मः प्रवाहस्तस्य या माधुरी तस्या यद्भाग्यमैश्वर्यं तद्भजन्ति सेवन्ते तास्तथा । एतादृशीनां वाचां काव्यवाणीनाम् । आचार्यताया गुरुतायाः पद स्थानम् । अनुभवितुं विशदयेव (?) । तथा चाहमेवोक्तपदानुभवनधन्य इति ध्वन्यते । तस्मात्के मदग्रे कालिदासादय इत्याशयः । एवं च युक्तैवोक्तेश्वरप्रार्थनेति रहस्यम् । अत्र

कवित्ववीर एव रसः । रूपकं लुप्तोपमा चालंकारः ॥ ४५ ॥

एवं तर्हि भवद्वाच्यपि केचिदेव किमिति सादराः, कुतो वा न सर्वेऽपीत्याचिपे, किमेतावता क्षतं प्रत्युत यावन्मनुष्येषु पशुतत्पतित्वयोर्निर्णायकं श्रावणद्वारा मत्काव्यमेव संपन्नम्, तदन्यतरनिर्णयसंदेहस्तु सहवासेनैव पराकरणीय इत्याशयेनोत्तरयति—

> गिरां देवी वीणागुणरणनहीनादरकरा
> यदीयानां वाचाममृतमयमाचामति रसम् ।
> वचस्तस्याकर्ण्य श्रवणसुभगं पण्डितपते-
> रधुन्वन्मूर्धानं नृपशुरथवायं पशुपतिः ॥ ४६ ॥

गिरां देवीति । वागधिष्ठात्री भगवती । सरस्वत्यपीत्यर्थः । एतेन निरुपमशक्तिमत्त्वं स्वस्य सूच्यते । वीणेति । वीणायाः कच्छप्यभिधाया वल्लक्या ये गुणास्तन्त्र्यभिधानि सूक्ष्मसूत्राणि तेषां यद्रणनं वादनं तत्र हीनादर आसक्तिशून्यः करो हस्तो यस्याः सा तथा । एतादृशी सतीत्यर्थः । एकक्षणावच्छेदेन हि ज्ञानकर्मेन्द्रियाभ्यां केवलाभ्यां वा तत्र केनचित्कुशलेन तत्तत्साध्ये साध्यमानेऽप्यन्यतरस्य हीनतावश्यंभाव एव । एवं च प्रकृते वक्ष्यमाणकाव्याकर्णनतस्तद्रसास्वादने करसंचारणेन वीणावादने किंचिन्न्यूनतापत्तिः । अतः संपूर्णतया तदास्वादनार्थं लुब्धचेतस्त्वेन तस्याः करस्य स्वयमेव तत्रानादरः संपन्न इति ध्वन्यते । तेन प्रकृतकाव्यस्यालौकिकत्वं द्योत्यते । यदीयानां यत्संबन्धिनीनां वाचां प्रकृतादिकाव्यवाणीनाम् । अमृतमयं पीयूषरूपं रसं शृङ्गारादिरसम् । आचामत्यास्वादयतीति संबन्धः । तस्य पण्डितपतेः । एतेन स्वस्य सकलशास्त्रपाटवमपि द्योतितम् । वचः काव्यवाक्यं न तु तर्कव्याकरणादि कर्णकर्कशवाक्यम् । तत्र फलविशेषसत्त्वेऽपि सद्यः श्रवणादिसंतोषाजनकत्वात् । आकर्ण्य श्रुत्वा । यो मूर्धानम् । महारम्यतममिदमिति संतोषेण शिरःकम्पनं हि लोके तत्सूचकचेष्टात्वेन सुप्रसिद्धमेव । तदभावादधुन्वन्नकम्पयन्भवति स नृपशुरेव । नराकारः पशुरेवेह बोध्य इत्यर्थः । ननु सुभाषितश्रवणतो जीवन्मुक्तानामपि परितोषाभावस्य समुद्रे तृष्णया जलतृड्रूपभावस्येव लोकादाववलोकितत्वात्कथमेतादृशस्य भवता पशुत्वमेवाध्यवसीयत इत्याशङ्क्य, न

मयैवं निर्णीयते किंतु संदिह्यत एवेति कोऽप्यन्तरकथनतो व्यनक्ति—अथवेत्यादिशेषेण। अयं पृथिव्याद्यष्टमूर्तिरूपत्वेन प्रत्यक्षः पशुपतिः श्रीशंकर एव स इति योजना। तथा चाम्नायते—'ब्रह्मविद्ब्रह्मैव भवति' इति। उक्तं चान्यत्रापि सुभाषितायनानन्दिनः पशुत्वादि—'सुभाषितेन गीतेन युवतीनां च लीलया। यस्य नो द्रवते चित्तं स वै मुक्तोऽथ वा पशुः॥' इति। यथाश्रुते तु प्रकृतकवेः सर्वज्ञत्वाभावात्प्रत्यक्षविषयवाचीदंशब्दप्रयोगानापत्तिः। एवं श्रवणेति वचोविशेषणस्य पूर्वार्धेन सहार्थिकाद्विरुक्त्यापत्तिरपि। प्रकृतकवेर्गङ्गाप्रसादप्रसिद्धेः पशुपतिस्वरूपपृथिव्याद्यष्टमूर्तिप्रमासंभवेन तद्विषयकप्रत्यक्षवाचीदंपदप्रयोगादोषात्सरस्वतीसान्निध्यभावेऽपि तस्याः सर्वज्ञत्वेन स्वकाव्यरसं सा मनसैवास्वादयतीत्यवश्यवक्तव्यं तथा चात्रार्थिकसादृश्येऽपि श्रुतिकटुप्रभृतिशाब्दिकदोषसत्त्वेनाश्रव्यत्वव्युदसनोपयिकतयैवोक्तविशेषणसार्थकत्वात्पराकार्येति दिक्। अत्राप्युक्त एव रसः। अतिशयोक्तिः संदेहः काव्यलिंगं परिकरः परिकराङ्कुरो लुप्तोपमादिश्चालंकारः॥ ४६॥

भवत्वेवं यस्त्वद्वाग्रसमनास्वादयति तस्य पशुत्वादिकल्पनमथापि यस्तु तद्रसं ज्ञात्वापि मत्सरवशादेव शिरःकम्पादिकायिकादिव्यापारैर्नैव तां स्वप्नेऽपि बहु मन्यते तस्य किं वन्द्यकोटौ निन्द्यकोटौ वा त्वया निवेशः क्रियत इति चेन्न, उपेक्ष्याख्यतृतीयकोटावेव मम तन्निवेशस्य विवक्षितत्वादित्यभिसंधाय कवित्ववीररसाविष्टचेतस्तया कविस्तावन्मूर्तिमतीम् 'निर्दूषणां गुणवतीं सरसां सुवर्णां सालंकृतिं ध्वनिमतीं शुभलक्षणां च। सद्वृत्तिरीतिमृदुमञ्जुपदामुदारां शृङ्गारभावललितां गतबालभावाम्॥ हृद्येव भूरि कठिनां वदने प्रसन्नामन्यत्र चारुमसृणां दृशि कृष्णसाराम्। मर्यादयातिविनतां विशदाशयाढ्यां साध्वीमुपैति सुकृती तरुणीं च वाणीम्॥' इत्यादि मदुक्तप्रकारेणाग्रतः स्थितामिव प्रकृतमत्सरिकृतानादरखिन्नामिव च स्ववाचं प्रकल्प्य तां सान्त्वयति—

मद्वाणि मा कुरु विषादमनादरेण
मात्सर्यमग्नमनसां सहसा खलानाम्।
काव्यारविन्दमकरन्दमधुव्रताना-
मास्येषु धास्यसितमां कति नो विलासान्॥ ४७॥

मद्वाणीति। हे मद्वाणि, मदीयभारति। त्वम्। मात्सर्येति। असूयापरनामा परोत्कर्षासहनजन्मा तत्प्रातिकूल्यप्रवीणो मनोविकारो मत्सरः। तत्र सूर्योत्कर्षासहनजन्मनि दिवाभीतानिलीनत्वादावतिव्याप्तिरिति तदादिप्रवीणान्तम्। तत्रापि शिशुपालकर्तृकश्रीकृष्णनिन्दारूपे वाग्व्यापारेऽतिप्रसङ्ग इति मनोविकार इति। तस्य भावो मात्सर्यम्। तत्र मग्नं न तु गतम्। तेन पङ्कादौ मग्नवत्तस्य दुरुद्धरत्वं ध्वन्यते। एतादृशं मनो येषां तथा तेषामित्यर्थः। एतेन तत्रोपेक्षैकप्रतीकार्यत्वं व्यज्यते। एतादृशां खलानाम्। पिशुनानामित्यर्थः। अनादरेण कर्तरि षष्ठी। सा तत्कर्तृकतिरस्कारेणेत्यर्थः। सहसा स्रोस्वाभाव्याद्गाभस्त्येनेति यावत्। विषादं खेदम्। मा कुरु मैव भजस्वेति योजना। अहो कथं मया न खेदः कार्यः, प्रागुक्तसकलगुणशालिन्या अपि मे पामरैरप्येतैस्तिरस्कारः केवलं कमप्यपराधं विनैव कृष्णाया इव कौरवैः क्रियत इत्यत आह—काव्येत्याद्युत्तरार्धेन। काव्यानि श्रीमद्रामायणादीन्येव। अरविन्दानि पद्मानि। तेन तेषां प्रसन्नत्वसरसत्वमृदुलत्वादीनि द्योत्यन्ते। तेषां यो मकरन्दः पुष्परस इव शृङ्गारादिरसस्तत्र ये मधुव्रता इव भ्रमरा इव संसक्तत्वतदास्वादकत्वादिना मधुव्रताः सहृदयास्तेषामित्यर्थः। अत्र रसमधुव्रतपदाभ्यां शृङ्गारादावास्वाद्यत्वतृप्तिजनकत्वादि सहृदयेषु तन्मात्रनिरतत्वादि च सूच्यते। तथा चैतादृशां पुरुषधौरेयाणाम्। आस्येषु मुखेषु। कति विलासान्नो धास्यसि। अपि तु बहूनपि विलासान्धास्यस्येवेत्यन्वयः। अत्र 'धास्यसितमां कियतो विलासान्' इत्यपि केचित्पठन्ति तत्र काकाश्रयणमेवोक्तार्थपोषार्थं दोष इति ध्येयम्। तस्मान्नैव भवत्या खेदः कार्य इति तात्पर्यम्। अत्रोक्त एव रसः। समासोक्तिः काव्यलिङ्गं लुप्तोपमादिश्चालंकारः॥ ४७॥

न केवलमसौ मत्काव्यश्रवणानानन्दी पशुरेव किंतु ततोऽपि नीच इति सूचयति—

> मधु द्राक्षा साक्षादमृतमथ वामाधरसुधा
> कदाचित्केषांचिन्न खलु विदधीरन्नपि मुदम्।
> ध्रुवं ते जीवन्तोऽप्यहह मृतका मन्दमतयो
> न येषामानन्दं जनयति जगन्नाथभणितिः॥ ४८॥

मधु द्राक्षेति । मधु माक्षिकमेव द्राक्षा । साहचर्यान्मधुरद्रव्यस्यैव प्रकृते सर्वस्य कविविवक्षितत्वाच्च । सुराद्रव्यस्य तु क्वापि तथात्वेनानुक्तत्वात्प्रत्युत दुर्गन्धत्वादिना दूरतोऽप्यतितरपराकरणीयत्वादनन्तकोटिशास्त्रनिन्दितत्वाच्च नात्र भ्रान्त्यापि प्रसङ्गः । तद्द्राक्षा मृद्वीकादिः प्रसिद्धैव । एतद्द्वयं त्वाबालसाधारणम् । अमृतं तु तेषामश्रुतत्वेन कामाभावात् । साक्षात्प्रत्यक्षम् । तेन 'अमृतं यज्ञशेषे स्यात्' इति विश्वोक्तगौणामृतव्यावृत्तिः । अमृतं पीयूषम् । इदं तु बालेतरसाधारणम् । तेन विशेषालम्भार्थोऽयमथशब्दः । वामाधरसुधा । 'वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे' इति विश्वात्स्त्रीत्वविवक्षायां टापि कृते वामेति रूपम् । तेन परमसुन्दरीत्यर्थः । तस्या याधरसुधा । अधरामृतमिति यावत् । इदं हि बालानां तत्प्रयोजकाविर्भावाभावेनाविशेषयत्, वृद्धानां तत्सत्त्वेऽपि तदुपोद्बलकशक्तिविशेषशून्यत्वेन 'वृद्धस्य तरुणी विषम्' इति वचनेन चाविषयत्वात्तरुणैकविषयं ज्ञेयम् । अथवेति पदच्छेदे तु माशब्देन लक्ष्मीः । शिष्टं तु प्राग्वदेव । अत्राधरसुधेति पदे रूपकलुप्तोपमाद्यलंकारविवक्षायामपि श्लेषादिवशात्सुधापदेन चूर्णोपस्थितिदोषस्त्वधरे लग्नाताम्बूलभक्षणलक्षणावच्छेदेन संबद्धा या सुधा चूर्णमिति शाकपार्थिवादिसमासं तस्मिन्पक्षे समाश्रित्य यावत्स्त्रीगुणविशिष्टस्वरमण्याः कमलाया वाधरसंपर्केण चूर्णस्याप्यमृताधिकमधुरिमासंपन्न इति शृङ्गारातिशयध्वनेः समवमोषणीय इति तत्त्वम् । एवं च जीवन्मुक्तानां विष्णुसायुज्यं संपाद्य तत्प्राशनकामनाव्यतिरेकस्यापि संभवाद्युक्तमेव तद्ग्रहणम् । सर्वासामप्यतिसुन्दरीणां तन्मात्रावधित्वात् । एते पदार्थाश्चत्वारोऽपि प्रत्येकं वा । कदाचिद्देशे काले वा । न तु सर्वदा । तत्रापि केषांचिज्जीवन्मुक्ताद्यधिकारिविशेषाणामेव । मुदं हर्षं यद्यपि न खलु विदधीरन्नैव कुर्वीरन्नित्यर्थः । तथापि न क्षतिरित्यार्थिकम् । तत्र मधुद्राक्षे पित्तोपहतरसनस्य सर्वस्य, अमृतवामाधरसुधे तु मिलिते चेज्जीवन्मुक्तानामेव, केवलवामाधरसुधा तु तादृशवृद्धस्यैवानादरविषय इति विभागो बोध्यः । अस्त्वेवम्, प्रकृते किमागतमित्यतस्तद्व्यनक्ति–ध्रुवमित्याद्युत्तरार्धेन । अहहेति खेदे । ते मन्दमतयो जीवन्तोऽपि मृतका ध्रुवं मृता एव सन्तीति सम्बन्धः । ते के । येषां जगन्नाथभणितिर्जगन्नाथशर्मणः पण्डितरायस्य मम

भणितिः । काव्यात्मकशब्दरचनेत्यर्थः । आनन्दं न जनयतीति योजना । यथा जीवन्मुक्तत्वं जीवेषु परमोत्तमकोटिरेवं जीवन्मृतत्वमपि चरमाधमकोटिरित्याशयः। तस्मान्मत्काव्यानादरशीलास्तु पश्वादिभ्योऽप्यतिनिन्द्या एवेति भावः । एवं चैतादृशोत्तमोत्तमकाव्यप्रचारार्थमुक्तेश्वरोपालम्भः संभवदुक्तिक एवेति व्यज्यते । अत्रापि कवित्ववीर एव रसः । अतिशयोक्तिः प्रतीपं लुप्तोपमा काव्यलिङ्गं परिकरस्तैर्मिलित्वा क्षीरनीरवत्संकरश्चालंकारः ।

अथ कवित्ववीररसावेशादेव कंचित्स्वप्रतिस्पर्धिनं पुरःस्थितं मया त्वदपेक्षयात्यतिरमणीयतमं काव्यं क्रियत इति वदन्तमिव प्रकल्प्य तं प्रत्याचष्टे—

निर्माणे यदि मार्मिकोऽसि नितरामत्यन्तपाकद्रव-
न्मृद्वीकामधुमाधुरीमदपरीहारोद्धुराणां गिराम् ।
काव्यं तर्हि सखे सुखेन कथय त्वं संमुखे मादृशां
नो चेद्दुष्कृतमात्मना कृतमिव स्वान्ताद्बहिर्मा कृथाः ॥ ४६ ॥

निर्माण इति । हे सखे । एतेन स्वस्य प्रतिमल्लेऽपि सौहार्दप्रकाशकत्वेनातिप्रौढत्वं व्यज्यते । त्वं यदि गिरां काव्यवाणीनां निर्माणे रचने नितरामत्यन्तम् । न तु यत्किंचित् । तत्रापि मार्मिकोऽसि तद्रचनचातुरीमर्मज्ञोऽसीत्यर्थः । तर्हि मादृशां सम्मुखे मत्समक्षं पण्डितधुरंधराणां समक्षमित्यर्थः । सुखेन काव्यं कथयेत्यन्वयः । एतेन स्वाग्रे काव्यप्रकाशनमलौकिकशक्तिमन्तरानुचितमेवेति द्योत्यते । ननु किमत्रालौकिकशक्त्या कविता हि शास्त्रव्युत्पत्तिमात्रसाध्येति तदाशयमनुमाय निरुक्तगिरो विशिनष्टि—अत्यन्तेति । अत्यन्तं स्वयमुन्मीलनपर्यन्तं न तु यत्किंचित् एतादृशो यः पाकः पक्वता ततो द्रवन्ती निरुक्तोद्भेदेन रसमुद्गिरन्ती एतादृशी या 'मृद्वीका गोस्तनी द्राक्षा' इत्यमराद्द्राक्षाजातिविशेषो गोस्तनाकार एव तस्या यो मधुमाधुरीमदो मधु माक्षिकं मकरन्दो वा तद्वद्या माधुरी मधुरता तया यो मदः । गर्व इति यावत् । तस्य यः परीहारः परीभावस्तत्रोद्धुरा अग्रेसरास्तासामित्यर्थः । एतेनालौकिकानन्तजन्मसंचितसुकृतपरिपाकैकजन्यतादृशकवित्वप्रयोजकबीजीभूतशक्तिविशेषमन्तरा निरुक्तरीतिककाव्यकल्पनं नैवाल्पायाससाध्यमिति ध्वन्यते । उक्तवैपरीत्ये त्वतितूष्णींभाव एव त्वया विधेय इत्युप-

देशव्याजेन विनिन्दति—नो चेदित्यादि चरमचरणेन । नो चेन्निरुक्तसामर्थ्यं नास्ति चेत्तर्हि त्वमात्मना बुद्ध्या कृतं न त्वज्ज्ञानात्संपन्नम् । एतेन व्यवहारे तस्य मौर्ख्यापादकत्वेनातिगोप्यत्ववद्भावत्ककाव्येऽपि तत्त्वमेव त्वयावश्यं कर्तव्यमिति द्योत्यते । एतादृशं दुष्कृतं पापमिव । आत्मना त्वया कृतं काव्यमपि स्वान्ताद-न्तःकरणात् बहिर्वाग्द्वारा प्रकटं मा कृथाः नैव कुर्वित्यन्वयः । एतस्मोदतादृक्सा-मर्थ्यमिदानीं मय्येव नान्यत्रेत्याकूतम् । अत्रोक्त एव रसः । प्रतीपोपमेऽलंकारौ ॥४९॥

तदेव स्पष्टयति—

धुर्यैरपि माधुर्यैर्द्राक्षाक्षीरेक्षुमाक्षिकसुधानाम् ।
वन्द्यैव माधुरीयं पण्डितराजस्य कवितायाः ॥ ५० ॥

धुर्यैरपीति । 'धूर्वहे धुर्यधौरेयधुरीणास्तु धुरंधराः' इत्यमराच्छ्रेष्ठैरपीत्यर्थः । एतादृशैरपि । द्राक्षेति सुधामृतम् । माधुर्यैः । पण्डितेति । कवितायाः इयं प्रत्यक्षप्रकृतग्रन्थगामाधुरी मधुरता वन्द्यैवास्तीति सम्बन्धः । रसस्त्वत्रोक्त एव । प्रतीपमलंकारः ॥ ५० ॥

ADDITIONS AND CORRECTIONS

Introduction

p. V. line 19, 21 :—Read Goethe for Geothe

Text

p.	2.	Stanza	*7d* :—	Read	विवृततां	for	निवृततां
p.	5.	,,	*23a* :—	,,	चतुर्दश	,,	चतर्दश
p.	28.	,,	*14a* :—	,,	श्मश्रु निरी०	,,	श्मश्रुनिरी०
p.	36.	,,	*33b* :—	,,	लता वात०	,,	लतावात०
p.	45.	,,	*6c* :—	,,	अयाचत०	,,	अयाचित०
p.	,,	,,	*6d* :—	,,	तपः	,,	तप
p.	77.	,,	*69a* :—	,,	वद	,,	वदं
p.	81.	,,	*75d* :—	,,	चरितं	,,	चरित
p.	85.	,,	*82a* :—	,,	विवर्द्धेन	,,	विवादिने
p.	86.	,,	*84d* :—	,	समाललम्बे	,,	समाललम्वे
p.	,,	,,	*85a* :—	,,	०यष्टि-	,,	०यष्ठि-
p.	153.	,,	*22c* :—	,,	०रामः	,,	०राम
p.	157.	,,	*7b* :—	,,	०मन्तः	,,	०मन्त
p.	161.	,,	*57d* :—	,,	०वल्च्यत	,,	०वक्ष्यत्
p.	162.	,,	*66a* :—	,,	धत्तूर०	,,	धूत्तर०
p.	,,	,,	*66d* :—	,,	०मयोमयम्	,,	०मयोभयम्
p.	163	,,	*76c* :—	,,	तस्थौ	,,	तस्था
p.	191	,,	*26c* :—	,,	कालागुरु०	,,	कालागरु०
p.	205	,,	*43a* :—	,,	०वानल-	,,	०वानल

Commentary

p.	1.	Stanza	1.	line	2,	Read	सम्प्रस्थितो	for	सम्प्रथितो
p.	,,	,,	2.	,,	1,	,,	राम	,,	रॉम
p.	,,	,,	4	,,	1,	,,	०कार्यकरयो	,,	०कायं करयो
p.	2.	,,	5.	,,	3,	,,	यस्मिंस्त०	,,	यस्मिन्त०
p.	,,	,,	7.	,,	3,	,,	स्तस्मा०	,,	स्तमा०
p.	,,	,,	8.	,,	1,	,,	प्रव्राजनं	,,	प्रवाजनं
p.	5.	,,	26.	,,	2,	,,	समीपेऽनु-	,,	समाप अनु-
p.	9.	,,	7.	,,	3	,,	अग्रत	,,	अग्रतो
p.	16	,,	4	,,	4,	,,	रामे	,,	रॉमे

p.	17.	stanza	8.	line	2	read	परेभ्य:	for	परेभ्यो
p.	17.	,,	9.	,,	4	,,	॰र्थः	,,	॰र्थ
p.	23.	,,	1.	,,	4	,,	कामिन्या	,,	कामिन्याः
p.	23.	,,	2.	,,	1	,,	प्रियाया	,,	प्रियायै
p.	25.	,,	6.	,,	5	,,	निर्मिता॰	,,	निर्भिता॰
p.	25.	,,	7.	,,	1	,,	धनुराकारे	,,	धनुषाकारे
p.	26.	,,	8.	,,	6	,,	॰रुत्पन्नोऽनु॰	,,	॰रुत्पन्नमनु॰
p.	26.	,,	,,	,,	,,	,,	॰त आनन्द उच्यते,		॰तं आनन्दमुच्यते
p.	27.	,,	11.	,,	5	,,	॰मीमदत्	,,	मदित्
p.	28.	,,	13.	,,	2	,,	सम्मुखं	,,	सन्मुखं
p.	28.	,,	13.	,,	5	,,	॰मेतानि	,,	॰मेते
p.	28.	,,	14	,,	6	,,	सन्दिह्य	,,	सन्धि
p.	29.	,,	15	,,	5	,,	जिह्मः कुटिलो	,,	जिह्मं कुटिलं
p.	29.	,,	16	,,	2	,,	॰स्यांसे	,,	॰स्यऽसे
p.	31.	,,	19.	,,	4	,,	मुखेन	,,	सुखेन
p.	31.	,,	21.	,,	1	,,	विशेषकेण	,,	विशेषकेन
p.	31.	,,	,,	,,	2	,,	ताम्रस्ताम्रवर्णोऽधरौष्ठोयत्र	,,	ताम्रस्य...यत्र
p.	31.	,,	,,	,,	6	,,	समन्ताद्	,,	समन्तात्
p.	33.	,,	25.	,,	2,3	,,	याच्ञा	,,	याञ्चा
p.	34.	,,	26	,,	3	,,	सुगन्धयुक्ताः	,,	सुगन्धियुक्ताः
p.	35.	,,	30.	,,	6	,,	प्रासादादपि	,,	प्रासाद्रापि
p.	36.	,,	31.	,,	4	,,	सोऽनिलेन	,,	स अनिलेन
p.	36.	,,	32.	,,	3	,,	याच्ञा॰	,,	याञ्चा॰
p.	36.	,,	33	,,	5	,,	कथयितु॰	,,	कथितु॰
p.	36.	,,	33.	,,	6	,,	निश्वसन्ती	,,	निश्वसती
p.	38.	,,	36	,,	4	,,	लिङ्गिष्यामि	,,	॰लिंगयिष्यामि
p.	39.	,,	40	,,	3	,,	अभिलसन्तीं	,,	अभिलसतीं
p.	40.	,,	41.	,,	1	,,	शातं	,,	शतं
p.	41.	,,	44	,,	3	,,	गच्छन्	,,	गच्छत्
p.	41.	,,	45	,,	6	,,	॰लिङ्गेय॰	,,	लिंगयेय॰
p.	42.	,,	46	,,	1	,,	॰पितु राजधान्यां	,,	॰पितु राजधानौ
p.	52.	,,	20.	,,	1	,,	सुमध्यमा	,,	सुमध्यमा
p.	52.	,,	,,	,,	2	,,	ऐक्षत	,,	ऐक्षत्